श्रीमन्मुनीन्द्रोत्तमरत्नवर्ग्गाः श्रीगौतमाद्याः प्रभविष्णवस्ते
तत्राम्बुधौ सप्तमहर्द्धियुक्तास्तत्सन्ततौ बोधनिधिर्ब्बभूव ॥३॥
[श्री] भद्रस्सर्व्वतो योहि भद्रबाहुरिति श्रुतः ।
श्रुतकेवलिनाथेषु चरमर्परमो मुनिः ॥४॥
चन्द्र-प्रकाशोज्वल-सान्द्र-कीर्त्तिः श्रीचन्द्रगुप्तोऽजनि तस्य शिष्यः ।
यस्य प्रभावाद्वनदेवताभिराराधितः स्वस्य गणो मुनीनां ॥५॥
तस्यान्वये भू-विदिते बभूव यः पद्मनन्दिप्रथमाभिधानः ।
श्रीकोण्डकुन्दादि-मुनीश्वराख्यस्सत्संयमादुद्गत-चारणर्द्धिः ॥६॥
अभूदुमास्वाति मुनीश्वरोऽसावाचार्य्य-शब्दोत्तरगृद्धपिच्छः ।

तदन्वये तत्सदृशोऽस्ति नान्यस्तात्कालिकाशेष-पदार्त्थ-वेदी ॥७॥

श्री **गृद्धपिच्छ**-मुनिपस्य **बलाकपिच्छः**

शिष्योऽजनिष्टभुवनत्रयवर्त्तिकीर्त्तिः।

चारित्रचञ्चुरखिलावनिपाल-मौलि-

माला-शिलीमुख-विराजितपादपद्मः ॥८॥

एवं महाचार्य्य-परम्परायां स्यात्कारमुद्राङ्कितत्वदीपः।

भद्रस्समन्ताद्गुणतोगणीशस्**समन्तभद्रो**ऽजनिवादिसिंहः ॥९॥

ततः ॥

यो **देवनन्दि**-प्रथमाभिधानो बुद्ध्या महत्या स **जिनेन्द्रबुद्धिः**।

श्री**पूज्यपादो**ऽजनिदेवताभिर्य्यत्पूजितं पाद-युगं यदीयं ॥१०॥

जैनेन्द्रं निज-शब्द-भोगमतुलं सर्व्वार्थसिद्धिः परा

सिद्धान्ते निपुणत्वमुद्धकवितां जैनाभिषेकःस्वकः।

छन्दस्सूक्ष्मधियं समाधिशतक-स्वास्थ्यं यदीयं विदा

माख्यातीह स **पूज्यपाद**-मुनिपः पूज्यो मुनीनां गणैः ॥११॥

ततश्च ॥

(पश्चिममुख)

अजनिष्टाकलङ्कं यज्जिनशासनमादितः।

अकलङ्कं बभौ येन सो**ऽकलङ्को** महामतिः ॥१२॥

इत्याद्युद्धमुनीन्द्रसन्ततिनिधौ श्रीमूलसङ्घे ततो

जाते **नन्दि**गण-प्रभेदविलसद्**देशी**गणेविश्रुते।

गोल्लाचार्य्य इति प्रसिद्ध-मुनिपोऽभूद्गोल्लदेशाधिपः

पूर्व्वं केन च हेतुना भवभिया दीक्षां गृहीतस्सुधीः ॥१३॥

श्रीमत्त्रैकाल्ययोगी समजनि महिका काय-लग्ना तनुत्रं
यस्याभूद्वृष्टि-धारानिशितशर-गणाग्रीष्ममार्त्तण्डविम्बं ।
चक्रं सद्वृत्तचापाकलित-यति-वरस्याघशत्रून्विजेतुं
गोल्लाचार्य्यस्य शिष्यस्स जयतु भुवने भव्यसत्कैरवेन्दुः ॥१४॥

तच्छिष्यस्य ॥

अविद्धकर्णादिक**पद्मनन्दिसैद्धान्तिका**ख्योऽजनि यस्य लोके ।
कौमारदेव-व्रतिताप्रसिद्धिर्जीयात्तुसो ज्ञाननिधिस्सधीर ॥१५॥

तच्छिष्यः **कुलभूषणा**ख्ययतिपश्चारित्रवाराान्निधि-
स्सिद्धान्ताम्बुधिपारगो नतविनेयस्तत्सधर्म्मो महान् ।
शब्दाम्भोरुहभास्करः प्रथिततर्कग्रन्थकारः **प्रभा**—
चन्द्राख्यो मुनिराज-पण्डितवरः श्रीकुण्डकुन्दान्वयः ॥१६॥

तस्य श्री**कुलभूषणा**ख्यसुमुनेश्शिष्यो विनेयस्तुत-
स्सद्वृत्तः कुलचन्द्रदेवमुनिपस्सिद्धान्तविद्यानिधिः ।
तच्छिष्योऽजनि **माघनन्दि**मुनिपः **कोल्लापुरे** तीर्थकृ-
द्राद्धान्तारार्णवपारगोऽचलधृतिश्चारित्रचक्रेश्वरः ॥१७॥

एले मावि वनवञ्जदिं तिलिगोलं माणिक्यदिं मण्डना—
वलिताराधिपनिं नभं शुभदमा गिर्प्पन्विरिदंत्तुनि-
र्म्मलवीगल् **कुलचन्द्रदेव**-चरणाम्भोजातसेवाविनि—
श्वलसैद्धान्तिक**माघनन्दि**मुनियिं श्रीकोण्डकुन्दान्वयम् ॥१८॥

हिमवत्कुत्कील-मुक्ताफल-तरलतरत्तार-हारेन्दुकुन्दो—
पमकीर्त्ति-व्याप्तदिग्मण्डलनवनत-भू-मण्डलं भव्य-पद्मो-
ग्र-मरीचीमण्डलं पण्डित-तति-विनतं माघनन्द्याख्यवाचं

यमिराजं वाग्वधूटीनिटिलतटहटन्नूत्नसद्रत्नप··· ॥१९॥
...व मद-रदनिकुलमं भरदिं निर्भेदिसल्के...सरियेनिपं
वरसंयमाब्धिचन्द्रं धरेयोल् . **माघनन्दि**-सैद्धान्तेश ॥२०॥
तच्छिष्यस्य ॥

प्रवर गुड्डुगलु सामन्त**केदार**नाकरस† दानश्रेयांस सामन्त **निम्बदेव** जगदोर्व्वगण्ड सामन्त**कामदेव** ॥

(उत्तरमुख)

गुरुसैद्धान्तिक**माघनन्दि**मुनिपं श्रीमच्चमूवल्लभं
भरतं छात्रनपारशास्त्रनिधिगल् श्री**भानुकीर्त्ति**प्रभा-
स्फुरितालङ्कृत-**देवकीर्त्ति**-मुनिपरिशिष्यर्ज्जगन्मण्डन-
-र्द्दोरेये गण्डविमुक्तदेवनिनगिन्नीनामसैद्धान्तिकर् ॥२१॥

क्षीरोदादिव चन्द्रमा मणिरिव प्रख्यात रत्नाकरात्
सिद्धान्तेश्वर**माघनन्दि**यमिनो जातो जगन्मण्डनः ।
चारित्रैकनिधानधामसुविनम्रो दीपवर्त्ती स्वयं
श्रीमद्**गण्डविमुक्तदेव**यतिपस्सैद्धान्तचक्राधिपः ॥२२॥

प्रवर सधर्म्मर् ।

आवों वादिकथात्रयप्रवणदोल् विद्वज्जनं मेच्चे वि-
द्यावष्टम्भमनप्पुकेय्दु परवादिक्षोणिभृत्पक्षमं ।
देवेन्द्रं कडिवन्ददिं कडिदेले स्याद्वादविद्यास्त्रदिं
त्रैविद्य**श्रुतकीर्त्ति**दिव्यमुनिवोल् विख्यातियं ताल्दिदों ॥२३॥

श्रुतकीर्ति-त्रैविद्य—

---

† निकरस

त्रति राघवपाण्डवीयमं विभु (बु) धचम-
त्कृतियेनिसि गत-प्रत्या —
गतदिं पेल्दमलकीर्त्तियं प्रकटिसिदं ॥२४॥

अवरग्रजरु ॥

यो बौद्धक्षितिभृत्करालकुलिशश्चार्व्वाकमेघान (नि) लो
मीमांसा-मत-वर्त्ति-वादि-मदवन्मातङ्ग कण्ठीरवः ॥
स्याद्वादाब्धि-शरत्समुद्गतसुधा-शोचिस्समस्तैस्स्तुत-
स्स श्रीमान्भुवि भासते **कनकनन्दि**-ख्यात-योगीश्वरः ॥२५॥

वेताली मुकुलीकृताञ्जलिपुटा संसेवते यत्पदे
भोट्टिङ्गः प्रतिहारको निवसति द्वारे च यस्यान्तिके ।
येन क्रीडति सन्ततं नुततपोलक्ष्मीर्य्यशः (:) श्रीप्रिय—
स्सोऽयं शुम्भति **देवचन्द्र**मुनिपो भट्टारकौघाग्रणीः ॥२६॥

अवर सधर्म्म**रमाघनन्दि**-त्रैविद्य-देवरु विद्याचक्रवर्त्ति-
श्रीम**द्देवकीर्त्ति**-पण्डितदेवर शिष्यरु श्री**शुभचन्द्र**त्रैविद्य-
देवरुं **गण्डविमुक्त**वादि-चतुर्म्मुख-**रामचन्द्र**त्रैविद्यदेवरुं
वादिवज्राङ्कुश-श्रीम**दकलङ्क**त्रैविद्यदेवरुमापरमेश्वरन गुड्डुगलु
माणिक्यभण्डारि मरियाने दण्डनायकरुं श्रीमन्महाप्रधानं
सर्व्वाधिकारिपिरियदण्डनायकं**भरतिमय्यङ्गलुं**श्रीकरणद हेग्गडे
बूचिमय्यङ्गलु जगदेक-दानि हेग्गडे कोरय्यनुं ॥

अकलङ्क पितृ **वाजि**-वंश-तिलक-श्री-**यक्षराजं** निजा-
-म्बिके **लोका**म्बिके लोक-वन्दिते सुशीलाचारे दैवं दिवी—

-ना-कदम्ब-स्तुत-पाद-पद्मनकटं नागं चतुर्वेदिपा-

-लक-चूडामणि नागसिंहनेननंशोभिप्पनो हुल्लपं ॥२७॥

श्रीमन्महाप्रधानं सर्व्वाधिकारि हिरियभण्डारि अभिनवगङ्ग-दण्डनायक-श्रीहुल्लराजं तम्म गुरुगलप्पश्रीकोण्डकुन्दान्वयद श्रीमूलसङ्घद देशियगणद पुस्तकगच्छद श्रीकोल्लापुरद श्रीरूप-नारायणन बसदिय प्रतिबद्धद श्रीमत्केल्लङ्गेरेय प्रतापपुरवं पुनर्भ्भ-रणवं माडिसि जिननाथपुरदलु कल्ल दानशालेयं माडिसिद श्रीमन्महामण्डलाचार्य्यरॆ देवकीर्त्तिपण्डितदेवर्ग्गे परोक्षविनय-वागि निसिदियं माडिसिद अवर शिष्यर्लक्खणन्दि-माधव-त्रिभुवनदेवर्महादान-पूजाभिषेक-माडि प्रतिष्ठेयं माडिदरु

मङ्गल महा श्री श्री श्री ॥

[इस लेख में गौतम गणधर से लगाकर मुनि देवकीर्त्ति पण्डितदेव की गुरु-परम्परा दी है† । कनकनन्दि और देवचन्द्र के भ्राता श्रुतकीर्त्ति त्रैविद्य मुनि की प्रशंसा में कहा गया है कि इन्होंने देवेन्द्र सदृश विपक्ष-वादियों को पराजित किया और एक चमत्कारी काव्य राघव-पाण्डवीय की रचना की जो आदि से अन्त को व अन्त से आदि को दोनों ओर पढ़ा जा सके × । प्रतापपुर की रूपनारायण बसदि का

† भूमिका देखो ।

× श्रुतकीर्त्ति की प्रशंसा के ये दोनों पद्य नागचन्द्रकृत 'रामचन्द्र-चरितपुराण' अपर नाम 'पम्प रामायण' के प्रथम आश्वास में नं० २४-२५ पर भी पाये जाते हैं । इस काव्य की रचना शक सं० १०२२ के लगभग हुई है । जिन विपक्ष-सैद्धान्तिक देवेन्द्र का यहाँ उल्लेख है वे सम्भवतः 'प्रमाणनय-तत्त्वालोकालङ्कार' के कर्त्ता वादि-प्रवर श्वेताम्बरा-

जीर्णोद्धार व जिननाथपुर में एक दानशाला का निर्माण कराने वाले महामण्डलाचार्य देवकीर्त्ति पण्डितदेव के स्वर्गवास होने पर यादव-वशी नारसिंह नरेश (प्रथम) के मंत्री हुल्लप ने यह निषद्या निर्माण कराई जिसकी प्रतिष्ठा देवकीर्त्ति आचार्य के शिष्य लक्खनन्दि, माधव और त्रिभुवनदेव ने दान सहित की।]

४१ (६५)

उसी मण्डप में

(शक सं० १२३५)

श्रीमत्स्याद्वादमुद्राङ्कितममलमहीनेन्द्रचक्रेश्वरेड्यं
जैनीयं शासनं विश्रुतमखिलहितं दोषदूरं गभीरं।
जीयात्कारुण्यजन्मावनिरमितगुणैर्व्वर्ण्यनीक-प्रवेकैः
संसेव्यं मुक्तिकन्या-परिचय-करणप्रौढमेतत्त्रिलोक्यां ॥१॥

श्रीमूलसङ्घ-देशीगण-पुस्तकगच्छ-कोण्डकुन्दान्वाये।
गुरुकुलमिह कथमिति चेद्ब्रवीमि सङ्क्षेपतो भुवने ॥२॥

यः सेव्यः सर्व्वलोकैः परहितचरितं यं समाराधयन्ते
भव्या येन प्रबुद्धं स्वपर-मत-महा-शास्त्र-तत्त्वं नितान्तं।
यस्मै मुक्त्यङ्गना संस्पृहयति दुरितं भीरुतां याति यस्मा—
द्यस्याशानास्ति यस्मिंस्त्रिभुवन-महितो विद्यते शीलराशिः ॥३॥

चार्य देवेन्द्र व देवसूरि हैं, जिनके विषय में प्रभावक-चरित में कहा गया है कि उन्होने वि० सं० ११८१ में दिगम्बराचार्य कुमुदचन्द्र को वाद में परास्त किया था।]

तन्मेघचन्द्रत्रैविद्यशिष्यो राद्धान्तवेदी लोकप्रसिद्धः।
श्रीवीरणंदी सोचुस्तदन्तेवासी गुणाब्धिः प्रास्ताङ्गजन्मा ॥४॥
य' स्याद्वाद-रहस्य-वादनिपुणोऽगण्यप्रभावो जना-
नन्दः श्रीमदनन्तकीर्त्तिमुनिपश्चारित्रभास्वत्तनुः।
कामोग्राहि-गर-द्विजापहरणे रूढा नरेन्द्रोऽभव-
त्तच्छिष्यो गुरुपञ्चकस्मृति-पथ-स्वच्छन्द-सन्मानसः ॥ ५ ॥
मलधारिरामचन्द्रो यमी तदीय-प्रशस्य-शिष्योऽसौ।
यच्चरणयुगलसेवापरिगतजनतेति चन्द्रतां जगति ॥ ६ ॥
परपरिणतिदूरोऽध्यात्मनस्सारधीरो
विषय-विरति-भावो जैनमार्गे-प्रभावः।
कुमत-वन-समीरो ध्वस्तमायान्धकारो
निखिलमुनिविनूतो रागकोपादिघात. ॥ ७ ॥
चित्ते शुभावनां जैनीं वाक्ये पञ्चनमस्क्रियां।
कायं व्रतसमारोपं कुर्व्वन्नध्यात्मविन्मुनि ॥ ८ ॥
पञ्चत्रिंशत्संयुत-शत-द्वयाधिक-सहस्र-नुतवर्षेषु।
वृत्तेषु शकनृपस्य तु काले विस्तीर्ण्णविलसदर्ण्णवनंमै॥ ९॥
प्रमादि (सं)वत्सरेमासे श्रावणे तनुमत्यजत्।
वक्षे कृष्णचतुर्दश्यां शुभचन्द्रो महायतिः ॥१०॥
अमरपुरममरवासं वद्गत-जिन-चैत्य-चैत्यभवनानां।
दर्शन-कुतूहलेन तु यातो यातार्त्त-रौद्र-परिणाम' ॥ ११ ॥

तच्छिष्यर् ॥

दुरितान्धकाररविहिम—

-कररोगेदर्प्पद्मणन्दिपण्डितदेवर् ।
वर-माधवेन्दु-समया—
भरणश्रीमूलसङ्घ-देशीगणदोल् ॥ १२ ॥

गुरु-रामचन्द्र-यतिपन
वर-शिष्य-शुभेन्दुमुनिय निस्तिगेय वि—
स्तरदिं माडिसिदं बेलु—
करेयविर्प राय-राज-गुरुगुम्मट्टं ॥ १३ ॥

श्रीविजय-पार्श्व-जिनवर-चरणारुण-कमल-युगल-यजन-रतः ।
बोगार-राज-नामा तद्वैयापृत्यतो हि शुभचन्द्रः ॥ १४ ॥

हेयादेय-विवेकता जनतया यस्मात्सदादीयते
तस्य श्रीकुलभूषणस्य वरशिष्योमाघनन्दिव्रती ।
सिद्धान्ताम्बुधितीरगो विशद-कीर्तिस्तस्य शिष्योऽभवत्
त्रैविद्यः शुभचन्द्र-योगि-तिलकः स्याद्वाद-विद्याञ्चितः॥१५॥

तच्छिष्य श्चारुकीर्त्ति-प्रथित-गुण-गण'पण्डितस्तस्य शिष्यः
ख्यातः श्री माघनन्दि-व्रति-पति-नुत-भट्टारकस्तस्य शिष्यः ।
सिद्धान्ताम्भोधिसीत-द्युतिरभयशशी तस्य शिष्यो महीयान्
बालेन्दुः पण्डितस्तत्पदनुतिरमलो रामचन्द्रोऽमलाङ्ग.।१६।

चित्रं सम्प्रति पद्मनन्दिनिह कृत्त'तावकीनं तपः
पद्मानन्द्यपि विश्रुताप्रमद इत्यासीस्सतां नम्रतां ।
कामं पूरयसे शुभेन्दु-पदं-भक्त्यासक्त-चेतः सदा
कामं दूरयसे निराकृत-महा-मोहान्धकारागम ॥१७॥

काम-विदारोदारः क्षमावृतोप्यक्षमो जगतिभासि

श्रीपद्मनन्दिपण्डित पण्डित-जन-हृदय-कुमुदशीतकर ॥१८॥
पण्डित-मयुदयवति शुभचन्द्र-प्रिय-शिष्य भवति
सुदयास्ति।
श्री-पद्म-नन्दि-पण्डित-यमीश भवदितर-मुनिपुनालोके।१९।
श्रीमदध्यात्मिशुभचन्द्रदेवस्य स्वकीयान्तेवासिना पद्म
नन्दि-पण्डित-देवेन माधवचन्द्रदेवेन च परोक्ष-विनय-निमित्तं
निषद्यका कारयिता ॥ भद्रं भवतु जिनशासनाय ॥

[इस लेख में शुभचन्द्र मुनि की आचार्यपरम्परा और इनके स्वर्गवास की तिथि दी हुई है। कुन्दकुन्दान्वय, मूल संघ, पुस्तक गच्छ, देशी गण में गुरुशिष्य परम्परा से मेघचन्द्र त्रैविद्य, वीरनन्दि, अनन्तकीर्त्ति, मलधारि रामचन्द्र और शुभचन्द्र मुनि हुए। शुभचन्द्र मुनि का शक सं० १२२१ श्रावण कृष्ण १४ को स्वर्गवास हुआ। इनके शिष्य पद्मनन्दि पण्डितदेव और माधवचन्द्र ने इनकी निषद्या निर्माण कराई। लेख में रामचन्द्र मुनि की आचार्य परम्परा इस प्रकार दी है। कुलभूषण, माघनन्दि व्रती, शुभचन्द्र त्रैविद्य, चारुकीर्त्ति पण्डित, माघनन्दि भट्टारक, अभयचन्द्र, बालचन्द्र पण्डित और रामचन्द्र।]

---

४७ (६६)

महानवमी मण्डप के उत्तर में एक स्तम्भ पर

(शक सं० १०९९)

(पूर्वमुख)

श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छनं।
जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनं ॥ १ ॥

श्रीमन्नाभेयनाथाद्यमल-जिनवरानीक-सौधोरु-वार्द्धिः
प्रध्वस्ताघ-प्रमेय-प्रचय-विषय-कैवल्य-बोधोरु-वेदिः ।
शस्त-स्यात्कार-मुद्रा-शवलित-जनतानन्द-नादोरु-घोषः
स्थेयादाचन्द्रतारं परम-सुख-महावीर्य्य-वीची-निकायः ॥२॥

श्रीमन्मुनीन्द्रोत्तमरत्नवर्ग्गा श्रीगौतमाद्याप्रभविष्णवस्ते ।
तत्राम्बुधौ सप्तमहर्द्धि-युक्तास्तत्सन्ततौ नन्दिगणे बभूव ॥३॥

श्रीपद्मनन्दीत्यनवद्यनामा ह्याचार्य्यशब्दोत्तरकोण्डकुन्दः
द्वितीयमासीदभिधानमुद्यच्चरित्रसञ्जातसुचारणर्द्धिः ॥४॥

अभूदुमास्वातिमुनीश्वरोसावाचार्य्य-शब्दोत्तरगृद्धपिञ्छः ।
तदन्वये तत्सदृसो(शो)ऽस्ति नान्यस्तात्कालिकाशेष-
पदार्त्थ-वेदी ॥५॥

श्रीगृद्धपिञ्छ-मुनिपस्य बलाकपिञ्छ-
शिष्योऽजनिष्ट भुवनत्रय-वर्ति-कीर्त्तिः ।
चारित्रचुञ्चुरखिलावनिपालमौलि-
माला-शिलीमुख-विराजित-पाद-पद्मः ॥६॥

तच्छिष्यो गुणनन्दिपण्डितयतिश्चारित्रचक्रेश्वर
स्तर्क्क-व्याकरणादि-शास्त्र-निपुणस्साहित्य-विद्यापतिः ।
मिथ्यावादिमदान्ध-सिन्धुर-घटासङ्घट्टकण्ठीरवो
भव्याम्भोज-दिवाकरो विजयतां कन्दर्प्प-दर्प्पापहः ॥ ७ ॥

तच्छिष्यास्त्रिशता विवेक-निधयश्शास्त्राब्धिपारङ्गता
स्तेषूत्कृष्टतमा-द्विसप्रतिमितास्सिद्धान्त-शास्त्रार्थक —
व्याख्याने पटवो विचित्र-चरितास्तेषु प्रसिद्धोमुनि —

ज्ञानानून-नय-प्रमाणनिपुणो देवेन्द्र-सैद्धान्तिकः ॥ ८ ॥

अजनि महिपचूडा-रत्नराराजिताङ्घ्रि

स्त्रिजित-मकरकेतूद्दण्ड-दोर्द्दण्ड-गर्व्वः ।

कुनय-निकर-भूध्रानीक-दम्भोलि-दण्ड

स्सजयतु विबुधेन्द्राभारती-भाल-पट्टः ॥ ९ ॥

तच्छिष्य' **कलधौतनन्दि**मुनिपस्सिद्धान्त-चक्रेश्वरः

पारावार-परीत-धारिणि-कुल-व्याप्तोरुकीर्तीश्वरः ।

पञ्चास्त्रोन्मद-कुम्भि-कुम्भ-दलन-प्रोन्मुक्त-मुक्ताफल-

प्रांशु-प्राञ्चितकेसरी बुधनुतो वाक्कामिनी-वल्लभः ॥ १० ॥

अवर्गे **रविचन्द्र**-सिद्धान्तविदर्स्सम्पूर्णचन्द्रसिद्धान्तमुनि-

प्रवररवरवर्गे शिष्यप्रवर श्री**दामनन्दि**-सन्मुनि-पतिगल् ।११।

बोधित-भव्यरस्त-मदनर्म्मद-वर्जित-शुद्ध-मानसर्

श्रीधरदेवरेम्बरवर्गग्र-तनूभवरादरा यश---।

श्रीधरर्गादि शिष्यरवरोल् नेगल्दर्म्मलधारिदेवरुं

श्रीधरदेवरुं नत-नरेन्द्र-ति (कि)रीट-तटार्च्चितक्रमर् ।१२।

आनम्रावनिपाल-जालकशिरो-रत्न-प्रभा-भासुर-

श्रीपादाम्बुरुह-द्वयो वर-तपोलक्ष्मीमनोरञ्जनः ।

मोह-व्यूह-महीध्र-दुर्द्धर-पवि' सच्छीलशालिर्ज्जग-

त्ख्यात**श्रीधरदेव** एष मुनिपो भाभाति भूमण्डले ॥१३॥

तच्छिष्यर् ॥

भव्याम्भोरुह-षण्ड-चण्ड-किरणः कर्प्पूर-हार-स्फुर-

त्कीर्त्तिश्रीधवलीकृताखिलदिशाचक्रश्चरित्रोन्नतः ।

(दक्षिणमुख)

भातिश्री जिन-पुङ्गव-प्रवचनाम्भोराशि-राका-शशी
भूमौ विश्रुत-**माघनन्दि**मुनिपस्सिद्धान्तचक्रेश्वरः ॥१४॥

तच्छिष्यर् ॥

सच्छीलश् शरदिन्दु-कुन्द-विशद-प्रोद्यद्यश-श्रीपति-
र्द्दप्यद्दर्प्पक-दर्प्प-दाव-दहन-ज्वालालि-कालाम्बुदः ।
श्रीजैनेन्द्र-वचःपयोनिधि-शरत्सम्पूर्ण-चन्द्रः क्षितौ
भाति श्री**गुणचन्द्र**-देव-मुनिपो राद्धान्त-चक्राधिपः ॥१५॥

तत्सधर्म्मर् ॥

उद्भूते नुत-**मेघचन्द्र**-शशिनि प्रोद्यद्यशश्चन्द्रिके
संवर्द्धेत तदस्तु नाम नितरां राद्धान्त-रत्नाकरः ।
चित्र तावदिदं पयोधि-परिधि-क्षोणौ समुद्रीक्ष्यते
प्रायेणात्र विजृम्भते भरत-शास्त्राम्भोजिनी सन्ततं ॥१६॥

तत्सधर्म्मर् ॥

चन्द्र इव धवल-कीर्त्तिर्द्धवलीकुरुते समस्त-भुवनं यस्य ।
त**च्चन्द्रकीर्त्ति**सञ्ज्ञ-भट्टारक-चक्रवर्त्तिनोऽस्य विभाति ।१७।

तत्सधर्म्मर् ॥

नैयायिकेभ-सिंहो **मी**मांसकतिमिर-निकरनिरसन-तपन.
बौद्ध-वन-दाव-दहनोजयतिमहानु**दयचन्द्र**पण्डितदेव. ।१८।
सिद्धान्त-चक्रवर्त्ती श्री**गुणचन्द्र**व्रतीश्वरस्यं बभूव
श्री**नयकीर्त्ति**-मुनीन्द्रो जिनपति-गदिताखिलार्थवेदी शिष्यः
॥१९॥

स्वस्त्यनवरत-विनत-महिप-मुकुट-मौक्तिक-मयूख-माला-सरो-मण्डनीभूत-चारुचरणारविन्दरुं। भव्यजन-हृदयानन्दरुं। कोण्डकुन्दान्वय-गगन-मार्त्तण्डरुं। लीला-मात्र-विजिताखण्ड-कुसुमकाण्डरुं। देशीय-गण-गजेन्द्र-सान्द्र-मद-धारावभासरुं। वितरणविलासरुं। पुस्तकगच्छस्वच्छ-सरसी-सरोजरुं। वन्दि-जनसुरभूजरुं। श्रीमद्गुणचन्द्र-सिद्धान्त-चक्रवर्त्ति-चारुतर-चरण सरसीरुह-षट्चरणरुं। अशेष-दोषदूरीकरणपरिणतान्तःकरण-रुमप्प श्रीमन्नयकीर्त्ति-सिद्धान्त-चक्रवर्त्ति गले-न्तप्परेन्दडे ॥

साहित्य-प्रमदा-मुखाब्जमुकुरश्चारित्र-चूडामणि
श्रीजैनागम-वार्द्धि-वर्द्धन-सुधाशोचिस्समुद्भासतं।
यश्शल्य-त्रय-गारव-त्रय-लसद्दण्ड-त्रय-ध्वंसक —
स्म श्रीमान्नयकीर्त्ति देवमुनिपस्सैद्धान्तिकाग्रेसरः ॥२०॥

माणिक्यनन्दिमुनिप श्रीनयकीर्त्तिव्रतीश्वरस्य सधर्म्मः।
गुणचन्द्रदेवतनयो राद्धान्त-पयोधि-पारगो-भुवि भाति॥२१॥

हार-क्षीर-हराट्टहास-हलभृत्कुन्देन्दु-मन्दाकिनी—
कर्पूर-स्फटिक-स्फुरद्धरयशो-धौतत्रिलोकोदरः।
उच्चण्ड-स्मर-भूरि-भूधरपविःख्यातो बभूवक्षितौ
सश्रीमान्नयकीर्त्ति देवमुनिपस्सिद्धान्तचक्रेश्वरः ॥२२॥

शाके रन्ध्रनवद्युचन्द्रमसि दुर्म्मुख्याच*संवत्सरे
वैशाखेधवले चतुर्द्दशदिने वारे च सूर्य्यात्मजे।
पूर्व्वाह्णे प्रहरेगतेऽर्द्धसहिते स्वर्गं जगामात्मवान्

---

* स्य

विख्यातो **नयकीर्त्ति**-देव-मुनिपो राद्धान्त-चक्राधिपः ॥२३॥

श्रीमज्जैन-वचोब्धि-वर्द्धन-विधुस्साहित्यविद्यानिधिस्

(पश्चिम मुख)

सर्प्पद्दर्प्पक-हस्ति-मस्तक-लुठत्प्रोत्कण्ठ-कण्ठीरवः ।

स श्रीमान् **गुणचन्द्र**देवतनयस्मौजन्यजन्यावनि

स्थेयात् श्री**नयकीर्त्ति** देवमुनिपस्सिद्धान्तचक्रेश्वरः ॥२४॥

गुरुवादं खचराधिपङ्गे बलिगं दानक्के विण्पिङ्गे तां

गुरुवादं सुर-भूधरक्के नेगल्दा कैलास-शैलक्के तां ।

गुरुवादं विनुतङ्गे राजिसुविरुङ्गोलङ्गे लोकक्के सद्

गुरुवादं **नयकीर्त्ति**देवमुनिपं राद्धान्त-चक्राधिपं ॥२५॥

तच्छिष्यर् ॥

हिमकर-शरदभ्र-चीर-कल्लोल-जाल-स्फटिक-सित-यश-श्री-

शुभ्र-दिक्-चक्रवालः ।

मदन-मद-तिमिस्र-श्रेणितीव्रांशुमाली जयति निखिल-वन्द्यो

मेघचन्द्र-व्रतीन्द्रः ॥२६॥

तत्सधर्म्मर् ॥

कन्दर्प्पाहवकपातोद्धुरतनुत्राणोपमोरस्थली

चञ्चद्भूरमला विनेय-जनता-नीरेजिनी-भानवः ।

त्यक्ताशेष-बहिर्व्विकल्प-निचयाश्चारित्र-चक्रेश्वर.

शुम्भन्त्यण्णितटाक-वासि-**मलधारि**-स्वामिनो भूतले ॥२७॥

तत्सधर्म्मर् ॥

षट्-कर्म्म-विषय-मन्त्रे नानाविध-रोग-हारि-वैद्ये च ।

जगदेकसूरिरपि श्रीधरदेवो बभूव जगति प्रवणः ॥२८॥

तत्सधर्म्मर् ॥

नर्क व्याकरणागम-साहित्य-प्रभृति-सकल-शास्त्रार्थज्ञः ।
विख्यात-दामनन्दि-त्रैविद्य-मुनीश्वरो धरामे जयति ॥२९॥
श्रीमज्जैनमताब्जिनीदिनकरो नैय्यायिकाम्भानिल
श्चार्व्वाकावनिभृत्करालकुलिशो बौद्धाब्धिकुम्भोद्भवः ।
योमीमांसकगन्धसिन्धुरशिरोनिर्भेदकण्ठीरव—
स्त्रैविद्योत्तमदामनन्दिमुनिपस्सोऽयं भुविभ्राजते ॥३०॥

तत्सधर्म्मर् ॥

दुग्धाब्धि-स्फटिकेन्दु-कुन्द-कुमुद-व्याभासि-कीर्त्तिप्रिय-
स्सिद्धान्तोदधि-वर्द्धनामृतकर-पारात्थ्यै-रत्नाकरः ।
ख्यात-श्री-नयकीर्त्तिदेवमुनिपश्रीपाद-पद्म-प्रियो ।
भात्यस्यांभुवि भानुकीर्त्ति-मुनिपस्सिद्धान्तचक्राधिपः ॥३१॥
उरगेन्द्र-चीर-नीराकर-रजत-गिरि-श्रीसितच्छत्र-गङ्गा—
हरहासैरावतेभ-स्फटिक-वृषभ-शुभ्राभ्रनीहार-हार—।
मर-राज-श्वेत-पङ्केरुह-हलधर-वाक्-शङ्ख-हंसेन्दु-कुन्दो-
त्करचञ्चत्कीर्त्तिकान्तं धरेयोळ्सेसेदनी भानुकीर्त्ति-व्रतीन्द्रं

तत्सधर्म्मर् ॥ ॥३२॥

सद्वृत्ताकृति-शोभिताखिलकला-पूर्ण्णं स्मर-ध्वंसकः
शश्वद्विश्व-वियोगि-हृत्सुखकर-श्रीबालचन्द्रो मुनिः ।
वक्रेणान-कलेन-काम-सुहृदा चञ्चद्वियोगिद्विषा
लोकेस्मिन्नुपमीयते कथमसौ तेनाथ बालेन्दुना ॥३३॥

उच्चण्ड-मदन-मद-गज-निर्भेदन-पटुतर-प्रताप-मृगेन्द्रः ।
भव्य-कुमुदौघ-विकसन-चन्द्रो भुवि भाति **बालचन्द्र**-मुनीन्द्र.
॥३४॥

ताराद्रि-चीर-पूर-स्फटिक-सुर-सरित्तारहारेन्दु-कुन्द—
श्वेताद्यत्कीर्त्ति-लक्ष्मी-**प्रसर**-धवलिताशेषदिक्-चक्रवालः ।
श्रीमत्सिद्धान्त-चक्रेश्वर-नुत-**नयकीर्त्ति**-व्रतीशाङ्घ्रि-भक्तः

(उत्तर मुख)

श्रीमान्भट्टारकेशो जगति विजयते मेघचन्द्र-व्रतीन्द्रः ॥३५॥
गाम्भीर्य्ये मकराकरो वितरणे कल्पद्रुमस्तेजसि
प्रोच्चण्ड-द्युमणिः कलास्वपि शशी धैर्य्ये पुनर्मन्दरः ।
सर्व्वोर्व्वी-परिपूर्ण-निर्म्मल-यशो-लक्ष्मी-मनो-रञ्जनो
भात्यस्यां भुवि **माघनन्दि**मुनिपो भट्टारकाग्रेसरः ॥३६॥
वसुपूर्णसमस्ताशःक्षितिचक्रे विराजते ।
चञ्चत्कुवलयानन्द-**प्रभाचन्द्रो**मुनीश्वरः ॥३७॥

तत्सधर्म्मर् ॥

उच्चण्डग्रहकोटयो नियमितास्तिष्ठन्ति येन क्षितौ
यद्वाग्जातसुधारसोऽखिलविषव्युच्छेदकश्शोभते ।
यत्तन्त्रोद्धविधिःसमस्तजनतारोग्याय संवर्त्तते
सोऽयं शुम्भति **पद्मनन्दि**मुनिनाथो मन्त्रवादीश्वरः ॥३८॥

तत्सधर्म्मर् ॥

चञ्चच्चन्द्र-मरीचि-शारद-घन-क्षीराब्धि-ताराचल—
प्रोद्यत्कीर्त्ति-विकास-पाण्डुर-तर-ब्रह्माण्ड-भाण्डोदरः ।

वाक्कान्ता-कठिन-स्तन-द्वय-तटी-हारो गभीरस्थिर'
सोऽयं सन्नुत-**नेमिचन्द्र**-मुनिपो विभ्राजते भूतले ॥३९॥
भण्डाराधिकृत-समस्त-सचिवाधीशो जगद्विश्रुत—
श्रीहुल्लो **नयकीर्त्ति**-देव-मुनि-पादाम्भोज-युग्मप्रियः।
कीर्त्ति-श्री-निलयः परार्थ्य-चरितो नित्यं विभाति क्षितौ
सोऽयं श्रीजिनधर्म्म-रक्षणकरः सम्यक्त्व-रत्नाकरः ॥४०॥
श्रीमच्छ्रीकरणाधिपस्सचिवनाथो विश्व-विद्वन्निधि-
श्चातुर्व्वर्ण्ण-महान्नदान-करणोत्साही क्षितौ शोभते।
श्री**नीलो** जिन-धर्म्म-निर्म्मल-मनास्साहित्य-विद्याप्रिय-
स्सौजन्यैक-निधिश्शशाङ्क-विशद-प्रोद्यद्यश-श्रीपतिः ॥४१॥
आराध्यो जिनपो गुरुश्च **नयकीर्त्ति**-ख्यात-योगीश्वरो
जोगाम्बा जननी तु यस्य जनकः ( ) श्री**बम्मदेवो** विभुः।
श्रीमत्कामलता-सुता पुरपति श्री **मल्लिनाथ**स्सुतो
भात्यस्या भुवि **नागदेव**-सचिवश्चण्डाम्बिकावल्लभः ॥४२॥
सुर-गज-शरदिन्दु-प्रस्फुरत्कीर्त्ति-शुभ्री
भवदखिल-दिगन्तो वाग्वधू-चित्तकान्तः।
बुध-निधि-**नयकीर्त्ति**-ख्यात-योगीन्द्र-पादा—
म्बुज-युगकृत-सेवः शोभते **नागदेवः** ॥४३॥
ख्यातश्री**नयकीर्त्ति**देवमुनिनाथानां पयःप्रोल्लस-
त्कीर्त्तीनां परमं परोक्ष-विनयं कर्त्तुं निषध्यालयं।
भक्त्याकारयदाशशाङ्क-दिनकृत्तारं स्थिरं स्थायिनं
श्री**नाग**स्सचिवोत्तमो निजयशश्शुभ्र-दिग्मण्डलः ॥४४॥

[इस लेख में नागदेव मंत्री द्वारा अपने गुरु श्री नयकीर्त्ति योगीन्द्र की निषद्या निर्माण कराये जाने का उल्लेख है। नयकीर्त्तिमुनि का स्वर्गवास शक सं० १०९९ वैशाख शुक्ल १४ को हुआ था। मुनि की विस्तार-सहित वर्णन की हुई गुरु-परम्परा में निम्नलिखित आचार्यों का उल्लेख आया है। पद्मनन्दि अपर नाम कुन्दकुन्द, उमास्वाति गृद्धपिच्छ, बलाकपिच्छ, गुणनन्दि, देवेन्द्र सैद्धान्तिक, कलधौतनन्दि, रविचन्द्र अपर नाम सम्पूर्णचन्द्र, दामनन्दिमुनि, श्रीधरदेव, मलधारिदेव, श्रीधरदेव, माघनन्दि मुनि, गुणचन्द्रमुनि, मेघचन्द्र, चन्द्रकीर्त्ति भट्टारक और उदयचन्द्र पण्डितदेव। नयकीर्त्ति गुणचन्द्रमुनि के शिष्य थे और उनके सधर्म गुणचन्द्र मुनि के पुत्र माणिक्यनन्दि थे। उनकी शिष्य-मण्डली में मेघचन्द्र व्रतीन्द्र, मलधारिस्वामी, श्रीधरदेव, दामनन्दि त्रैविद्य, भानुकीर्त्ति मुनि, बालचन्द्र मुनि, माघनन्दि मुनि, प्रभाचन्द्र मुनि, पद्मनन्दि मुनि और नेमिचन्द्र मुनि थे।]

४३ (११७)

चामुण्डराय वस्ति के दक्षिण की ओर मण्डप में प्रथम स्तम्भ पर

(शक सं० १०४५)

(पूर्वमुख)

श्रीमत्परम गम्भीर-स्याद्वादामोघ-लाञ्छनं।
जीयात् त्रैलोक्यनाथस्य शासनं जिन-शासनं ॥१॥
श्रीमन्नाभेयनाथाद्यमल-जिनवरानीकसौधोरु-वार्द्धिः
प्रध्वस्ताघ-प्रमेय-प्रचय-विषय-कैवल्य-बोधोरु-वेदिः।
शस्तस्यात्कार-मुद्रा-शबलित-जनतानन्द-नादोरुघोष-
स्थेयादाचन्द्रतारं परम-सुख-महा-वीर्य्य-वीची-निकायः ॥२॥

श्रीमन्मुनीन्द्रोत्तमरत्न-वर्गाश्श्रीगौतमाद्याः प्रभविष्णवस्ते।
तत्राम्बुधौ सप्तमहर्द्धियुक्तास्तत्सन्ततौ नन्दिगणे बभूव ॥३॥
श्रीपद्मनन्दीत्यनवद्यनामा ह्याचार्य्यशब्दोत्तरकोण्ड-
कुन्दः।
द्वितीयमासीदभिधानमुद्यच्चरित्रसञ्जातसुचारणर्द्धिः ॥४॥
अभूदुमास्वातिमुनीश्वरोऽसावाचार्य्यशब्दोत्तरगृद्ध्र
पिञ्छः।
तदन्वये तत्सदृशोऽस्ति नान्यस्तात्कालिकाशेषपदार्थवेदी ॥५॥
श्रीगृद्ध्रपिञ्छ-मुनिपस्य बलाकपिञ्छश्शिष्योऽजनिष्टभुवन-
त्रयवर्त्तिकीर्त्तिः।
चारित्रचुञ्चुरखिलावनिपालमौलिमाला-शिलीमुख-विरा-
जित-पाद-पद्मः ॥६॥
तच्छिष्यो गुणनन्दिपण्डितयतिश्चारित्रचक्रेश्वरः
तर्कव्याकरणादिशास्त्रनिपुणस्साहित्यविद्यापतिः।
मिथ्यावादिमदान्धसिन्धुर-घटा-सङ्घट्ट-कण्ठीरवो
भव्याम्भोजदिवाकरो विजयतां कन्दर्प्प-दर्प्पापहः ॥७॥
तच्छिष्यास्त्रिशता विवेकनिधयश्शास्त्राब्धिपारङ्गता-
स्तेषूत्कृष्टतमाद्विसप्ततिमिता. सिद्धान्तशास्त्रार्थक-
व्याख्यानेपटवो विचित्र-चरितास्तेषु प्रसिद्धोमुनि
नानानूननयप्रमाणनिपुणोदेवेन्द्रसैद्धान्तिकः ॥७॥
अजनिमहिप-चूडा-रत्न-राराजिताङ्घ्रिर्व्विजितमकरकेतूद्द
ण्डदोर्दण्डगर्व्वः।

कुनयनिकरभूभ्रानीकदम्भोलिदण्डःसजयतु विबुधेन्द्रो
भारती-भालपट्टः ॥९॥

(दक्षिणमुख)

तच्छिष्यः**कलधौतनन्दि**मुनिपः सैद्धान्तचक्रेश्वरः
पारावारपरीतधारिणि-कुल-व्याप्तोरुकीर्त्तीश्वरः।
पञ्चाचोन्मदकुम्भि-कुम्भ-दलन-प्रोन्मुक्त-मुक्ताफल—
प्रांशुप्राञ्चितकेसरी बुधनुतो वाक्कामिनीवल्लभः ॥१०॥
अवर्गे **रविचन्द्र**सिद्धा—
न्तविदर्सम्पूर्णचन्द्र-सिद्धान्त-मुनि-।
प्रवररवरवर्गेशिष्य—
प्रवरश्री**दामनन्दि**-सन्मुनि-पतिगलु ॥११॥
बोधितभव्यरस्तमदनम्र्मद-नज्जित-शुद्ध-मानसर्
श्रीधरदेवरेम्बरवर्गप्रतनूभवरादरायशस्
श्रीधरगोद शिष्यरवरोल् नेगल्दम्म्मे**लधारि**-देवरं।
श्रीधरदेवरुंनतनरेन्द्र-किरीट-तटाच्चिंत-क्रमर् ॥१२॥
मलधारिदेवरिन्दं
बेलगिदुदु जिनेन्द्रशासनं मुन्नलि—
म्मेलमागिमत्तमीगल्
बेलगिदपुदु **चन्द्रकीर्त्ति**भट्टारकरि ॥१३॥
अवर शिष्यर् ॥
परमाप्ताखिल-शास्त्र-तत्वनिलय सिद्धान्त-चूडामणि
स्फुरिताचारपरं विनेयजनतानन्दं गुणानीकसु—

न्दरनेम्बुन्नतियिं समस्त-भुवन-प्रस्तुत्यनाद **दिवा—**
करणन्दि-व्रतिनाथनुज्वलयशो विभ्राजिताशातटं ॥१४॥
विदितव्याकरणद तर्कद सिद्धान्तद विशेषदि त्रैविद्या—
स्पदरेन्दी-धरेवण्णिपुदु **दिवाकरणन्दिदेव**सिद्धान्तिगरं।१५।
वरराद्धान्तिकचक्रवर्त्ति दुरितप्रध्वंसि कन्दर्पसि—
न्धुरसिंहं वर-शील-सद्गुण-महाम्भोराशि पङ्कजपु-
ष्कर-देवेभ-शशाङ्क-सन्निभ-यश-श्री-रूपनो हो**दिवा**-
करणन्दिव्रतिनिर्म्मदं निरुपमं भूपेन्द्रवृन्दार्च्चितं ॥१६॥

(पश्चिममुख)

वर-भव्यानन-पद्ममुल्ललरलज्ञानीकनेत्रोत्पलं
कोरगल्पापतमस्तमं परयलेत्त जैनमार्गामला—
म्बरमत्युज्वलमागले बेलगितोभूभागमं श्री**दिवा—**
करणन्दिव्रतिवाक्दिवाकरकराकारम्बोलुर्व्वीनुत ॥१७॥
यद्वक्तृचन्द्रविलसद्वचनामृताम्भःपानेनतुष्यतिविनेयचको
रवृन्द. ।
जैनेन्द्रशासनसरोवरराजहंसो जीयादसौभुवि**दिवाकरण**-
न्दिदेवः ॥१८॥

अवर शिष्यरु ॥

गण्डविमुक्तदेव-मलधारि-मुनीन्द्ररपादपद्ममं
कण्डोडसाध्यमें नेनेद भव्यजनक्रमकोण्डचण्ड —
दण्ड-विरोधि-दण्ड-नृप-दण्ड-रतत्पृथु-वज्रदण्ड-को—
दण्ड-कराल-दण्डधर-दण्डभयं-पेरपिङ्गि-पोगवे ॥१९॥

वलयुतरं बलल्चुव लतान्तशरङ्गिदिरागिवागिस
च्चलिसे पलभ्चि तूल्दवननोडिसिमेय् वगेयाद दूसरिं ।
कलेयदे निन्द कव्वुंनद कगिंद सिप्पिनमक्के-वेत्त क —
त्तलमेनिसित्तु पुत्तडहंमेय्य मलं मलधारि-देवरं ॥२०॥
मरेदुमदोम्मे लैाकिकद वार्त्तेयनाडद केत्त बागिलं
तेरेयद भानुवस्तमितमागिरे पोगद मेय्यनोम्मेयुं ।
तुरिसद कुक्कुटासनके सोलद गण्डविमुक्तवृत्तियं
मरेयद घोर-दुश्चर-तपश्चरितं मलधारिदेवर ॥२१॥

आ-चारित्र-चक्रवर्त्ति गल शिष्यरु ॥

पञ्चेन्द्रिय-प्रथित-सामज-कुम्भपीठ-निर्ल्लोट-लम्पट-महोग्र-
समग्र-सिंहः ।
सिद्धान्त-वारिनिधि-पूर्ण्ण-निशाधिनाथो वाभाति भूरिभुवने
शुभचन्द्रदेवः ॥२२॥

शुभ्राभ्राभसुरद्विपामरसरित्तारापतिस्प्रस्फुट—
ज्योत्स्ना-कुन्द-शशाङ्क-कम्बु-कमलाभाशा-तरङ्गोत्कर. ।
प्रख्य-प्रज्वल-कीर्त्तिमन्वहमिमां गायन्ति देवाङ्गना
दिकन्याः शुभचन्द्रदेव भवतश्चारित्रभूंभामिनि ॥२३॥

शुभचन्द्रमुनीन्द्रयश
स्प्रमेयोल् सरियागलारदिन्तीं चन्द्रं ।
प्रभुतेगिदे कन्दि कुन्दिद—
नभव-शिरोमणिगदेकं कन्दुं कुन्दुं ॥२४॥

एत्तलु विजयङ्गय्वद—

मत्तज़ं धर्म्मप्रभावमधिकोत्सवदि ।

• वित्तरिपुदेनलं पेल्वरे

मत्तिनवरु श्रीशुभेन्दुसैद्धान्तिगर ॥२४॥

कन्तुमदापहर्स्सकल-जीव दयापर-जैन-मार्ग्ग-रा—

द्धान्त-पयोधिगलू विषयवैरिगलुद्धत-कर्म्म-भञ्जनर् ।

स्मन्तत-भव्य पद्म-दिनकृत्प्रभरं शुभचन्द्र-देव-सि—

द्धान्तमुनीन्द्ररं पोगल्वुदम्बुधि-वेष्टित-भूरि-भूतलं ॥२५॥

(उत्तरमुख)

ख्यातश्रीमलधारिदेवयमिनश्शिष्योत्तमे स्वर्गते

हा हा श्री शुभचन्द्रदेवयतिपे सिद्धान्तचूडामणै ।

लोकानुग्रहकारिणि चितिनुतं कन्दर्प्पदर्प्पान्तकं

चारित्रोज्वलदीपिका प्रतिहता वात्सल्यवल्ली गता ॥२६॥

शुभचन्द्रे महस्मान्द्रेऽन्विक्रिते काल-राहुणा ।

सान्धकारं जगज्जातं जायतेत्थेति नाद्भुत ॥२७॥

वाणाम्भोधिनभश्शशाङ्कतुलितेजाते शकाब्दे

ततो वर्षे शोभकृताह्वये व्युपनते मासे पुन श्रावणे ।

पक्षे कृष्णविपक्षवर्त्ति नि सिते वारे दशम्यां तिथैा

स्वर्यातः शुभचन्द्रदेवगणभृत्सिद्धान्तवाराम्निधिः ॥२८॥

श्रीमद्वरगुड्ं ॥

समधिगतपञ्चमहाशब्दमहासामन्ताधिपतिमहाप्रचण्डदण्ड

नायक । वैरिभयदायक । गोत्रपवित्र । बुधजनमित्र । स्वामिद्रोहगोधूमघरट्ट । सङ्ग्रामजत्तुट्ट । विष्णुवर्द्धन-पोयसल

महाराजराज्यसमुद्धरणकलिगलाभरणश्रीजैनधर्म्मामृताम्बुधिप्रवर्द्ध-न-सुधाकर-सम्यक्त—रत्नाकराद्यनेकनामावलीसमालङ्कृतरप्पश्रीमन्महाप्रधानदण्डनायकगङ्गराजं तम्म गुरुगल् श्रीमूलसङ्घददेसियगणद पुस्तकगच्छद **शुभचन्द्र** सिद्धान्तदेवर्गे परोक्षविनयक्के निसिधिगेय निलिसि महापूजेयं माडि महादानमं गेय्दरु ॥ आमहानुभावनत्तिगे ॥ **शुभचन्द्र**सिद्धान्तदेवर गुड्डि ॥

वरजिनपूजेयनत्या—
दरदिन्दं जक्कणब्बे माडिसुवल्लुस—।
च्चरिते गुणान्विते ये—
न्दी धरणीतल मेच्चि पोगल्लुतिप्पुंदु निच्चं ॥२९॥
देरेये जक्कणिकब्बेगी भुवनदोल् चारित्रदोल् शीलदोल्
परमश्रीजिनपूजेयोल् सकलदानाश्चर्य्यदोल् सत्यदोल् ।
गुरुपादाम्बुजभक्तियोल् विनयदोल् भव्यर्कलं कन्ददा—
दरदिं मन्निसुतिप्पे पेम्पिनेडेयोल् मत्तन्यकान्ताजनम् ॥ ३०॥
श्रीमत्**प्रभाचन्द्र** सिद्धान्तदेवर गुड्ड हेग्गडेमर्द्दिमय्यंबरेदं ॥
विरुदरूवारिमुखतिलकं **बर्द्धमानाचारि** खंडरिसिद
मङ्गल महा ॥ श्री श्री ॥

[इस लेख में पोय्सल महाराज गङ्गनरेश विष्णुवर्द्धन द्वारा उनके गुरु शुभचन्द्र देव की निषद्या निर्माण कराये जाने का उल्लेख है। शुभचन्द्र देव का स्वर्गारोहण शक सं० १०४५, श्रावण कृष्ण १० को हुआ था। इनके गुरु परम्परा-वर्णन में मलिधारिदेव और श्रीधरदेव के उल्लेख तक के प्रथम ग्यारह श्लोक वे ही है जो उपर्युक्त शिलालेख नं० ४२ (६६) के हैं। इसके पश्चात् चन्द्रकीर्त्ति भट्टारक, दिवाकरनन्दि,

गण्डविमुक्तदेव मलधारि मुनीन्द्र और शुभचन्द्र देव का उल्लेख है। लेख में विष्णुवर्द्धन नरेश की भावज जवकणब्बे की जैन धर्म में भारी श्रद्धा का भी उल्लेख है। यह लेख प्रभाचन्द्र सिद्धान्तदेव के शिष्य हेग्गडे मर्डिमय्य द्वारा रचित और वर्द्धमानाचारि द्वारा उत्कीर्ण है।]

४५ (११८)

उसी मण्डप में द्वितीय स्तम्भ पर

(शक सं० १०४३)

श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छनं।
जीयात् त्रैलोक्य नाथस्य शासनं जिनशासनं ॥१॥
भद्रमस्तु जिनशासनाय सम्पद्यतां प्रतिविधानहेतवे।
अन्यवादिमदहस्तिमस्तकस्फाटनाय घटने पटीयसे ॥२॥

नमस्सिद्धेभ्यः ॥

जनताधारनुदारनन्यवनितादूरं वचस्सुन्दरी
वनवृत्तस्तनहारनुभरणधीरं मारनेनेन्दपै।
जनकं तानने माकणब्बे विबुधप्रख्यातधर्म्मप्रयु-
क्के निकामात्त-चरित्रे तायंनलिदेनेचं महाधन्यनो ॥३॥

कन्द ॥ वित्रस्तमलं बुधजनमित्रं
द्विजकुलपवित्रनेचं जगदोलु।
पात्रं रिपुकुलकन्दखनित्रं
कौशिडन्य गोत्रनमलचरित्र ॥४॥

वृ [त्त] ॥ परमजिनेश्वरं तनगेदेय्वमलुर्कोयिनोल्पु-वेत्त सु-
स्फुरदुरितचयकंनकनन्दिमुनीश्वररुत्तमोत्तम—

गुरुगलुदात्तवित्तनवदात्तयशं नृपकामवोय्सलं
पेरेद महीशनेन्दोडेले वण्णिपरार्नेगल्देचिगाङ्कन ॥५॥

कं [द] ॥ मनुचरितनेचिगाङ्कन
मनेयोल् मुनिजनसमूहमुं बुधजनमुं ।
जिनपूजने जिनवन्दने
जिनमहिमेगलावकालमुं शोभिसुगुं ॥६॥

आमहानुभावनर्द्धाङ्गियेन्तप्पलेन्दोडे ।
उत्तम-गुण-ततिवनिता—
वृत्तियनोलकोण्डुदेन्दु जगमेल्लं क—।
य्येत्तुविनममलगुणस—
म्पत्तिगे जगदोलगे पोचिकब्वेये नान्तलु ॥७॥
तनुवं जिनपतिनुतियि ।
धनमं मुनिजनदतृप्तियि सफलमिदि—
न्ननगेम्बी नम्बुगेयोल्
मनमं जगदोलगे पोचिकब्वेयेनिरिपलु ॥८॥
जन विनुतनेचिगाङ्कन—
मनस्सरोहँसि गङ्गराजचमूना—
थन जननि जननि भुवन—
क्केने नेगल्दल् पोचिकब्वे गुणदुन्नतियि ॥९॥
एनिसिद पोचाम्बिके परि—
जनमुं बुधजनमु मोम्मेंगोम्में मनन्त—
ण्णाले तणिदु परसे पुण्यम—

[न] नन्तमं नेरपि परपि जसमंजगदोलु ॥१०॥

व [चन] ॥ इन्तेनिसिदापोचाम्बिके बेल्गोलद तीर्थं मोदलागनेकतीर्थगलोलु पलवुं चैत्यालयङ्गल माडिसि महादान गेय्दु ॥

वृ [त्त] ॥ अदनिन्नेनेम्बेनानोन्दमलद सुकृतमं नोड रोमाञ्च माद—

प्पुदु पेल्वुद्योगदिन्दं स्मरियिपदेनमो वीतरागाय गार्ह-
स्थ्यद योपिद् भावदी कालद परिणतियिं गेय्दु सल्लेखनास-
म्पददिन्दं देविपोचाम्बिके सुरपदमं लीलेयिं सूरेगोण्डल् ॥११॥

सकवर्ष १०४३ नेय सार्व्वरि संवत्सरदाषाढ़ सुद्ध ५ सोमवारदन्दु सन्यसनमं कैकोण्डु एकपार्श्वनियमदिं पञ्चपदमनुच्चारिसुत्त देवलोकक्के सन्दलु ॥ आ जगज्जननियपुत्रं ॥ समधिगतपञ्चमहाशब्द महासामन्ताधिपति महाप्रचण्डदण्डनायकं । वैरिभयदायकं । गोत्रपवित्रं । वुधजनमित्र । श्रीजैनधर्म्मामृताम्बुधिप्रवर्द्धनसुधाकरं । सम्यक्त्वरत्नाकरं । आहाराभयभैषज्य-शास्त्रदानविनोद । भव्यजनहृदयप्रमोद । **विष्णुवर्द्धन** भूपालहोय्सलमहाराजराज्याभिषेकपूर्ण्णकुम्भ । धर्म्महर्म्योद्धरणमूलस्तम्भ । नुडिदन्तेगण्डपगेवरं वेङ्कोण्ड । द्रोहघरट्टाद्यनेक नामावलीसमालङ्कृतनप्प श्रीमन्महाप्रधानं दण्डनायकं गङ्गराजं तन्नात्माम्बिके पोचलदेवियरु दिवक्के सललु परोक्षविनयक्केन्दी निसिधिगेय निलिसि प्रतिष्ठे गेय्दु महादानपूजार्च्चनाभिषेकङ्गलं माडिद मङ्गलमहा श्री श्री ॥

श्री प्रभाचन्द्रसिद्धान्तदेवगुड्डं पेर्गडे चावराजं बरेदं ॥
रूवारिहोय्सलाचारियमगं वर्द्धमानाचारि बिरुदरूवारि-
मुखतिलकं कण्डरिसिद ॥

[इस लेख में 'मार' और 'माकणब्बे' के सुपुत्र 'एचि' व 'एचिगाङ्क' की भार्या 'पोचिकब्बे' की धर्मपरायणता और अन्त में संन्यास-विधि से स्वर्गारोहण का उल्लेख है । पोचिकब्बे ने अनेक धार्मिक कार्य किये । उन्होंने बेल्गोल में अनेक मन्दिर बनवाये । शक सं० १०४३, आषाढ़ सुदि ५ सोमवार को इस धर्मवती महिला का स्वर्गवास हो जाने पर उसके प्रतापी पुत्र महासामान्ताधिपति, महाप्रचण्ड दण्डनायक, विष्णुवर्द्धन महाराज के मंत्री गङ्गराज ने अपनी माता की स्मारक यह निषद्या निर्माण कराई ।

यह लेख प्रभाचन्द्र सिद्धान्त देव के गृहस्थ शिष्य चावराज का रचा हुआ और होय्सलाचारि के पुत्र वर्धमानाचारि द्वारा उत्कीर्ण है]

४५ (१२५)

एरडु कट्टे वस्ति के पश्चिम की ओर एक पाषाण पर ।

(लगभग शक सं० १०४०)

श्रीमत्परमगम्भीर-स्याद्वादामोघलाञ्छनं ।
जीयात् त्रैलोक्यनाथस्य शासनं जिनशासनं ॥ १ ॥
भद्रमस्तु जिनशासनाय सम्पद्यतां प्रतिविधानहेतवे ।
अन्यवादिमदहस्तिमस्तकस्फाटनाय घटने पटीयसे ॥ २ ॥
स्वस्ति 'समधिगतपञ्चमहाशब्द महामण्डलेश्वर द्वारवतीपुर वराधीश्वरं यादवकुलाम्बरद्युमणि सम्यक्त्वचूडामणि मलपरोल्

गण्डाद्यनेकनामावली-समालङ्कृतरप्प श्रीमन्महामण्डलेश्वरं **त्रिभुवनमल्ल** तलकाडुगोण्ड भुज-बलवीर-गङ्ग **विष्णुवर्द्धन** होय्सलदेवर विजयराज्यमुत्तरोत्तराभिवृद्धिप्रवर्द्धमानमा चन्द्रार्क्कतारं मलुत्तंइरे तत्पादपद्मोपजीवि ॥

वृत्त ॥ जनताधारनुदारनन्यवनितादूर वचस्सुन्दरी-
धनवृत्त-स्तन-हारनुग्ररणधीर मारनेनेन्दपै ।
जनकं तानेने **माकणब्बे** विबुधप्रख्यातधर्म्मप्रयु-
क्ते निकामात्तचरित्रे तायेनलिदेनेचं महाधन्यनो ॥ ३ ॥

कन्द ॥ वित्रस्तमलं बुधजन—
मित्र द्विजकुलपवित्रनेचम् जगदोलु ।
पात्रमृरिपुकुलकन्दखनित्रं
कौण्डिन्यगोत्रन मलचरित्र ॥ ४ ॥
मनुचरितनेचिगाङ्कन
मनेयोलुमुनिजनसमूहमुं बुधजनमुं ।
जिनपूजनेजिनवन्दने
जिनमहिमेगलाव कालमुं शोभिसुगुं ॥ ५ ॥
उत्तमगुणवतिवनिता-
वृत्तियनोलकोण्डुदेन्दु जगमेल्लं कै-
य्येत्तुविनममलगुणस-
म्पत्तिगे जगदोलगे पोचिकब्बेयेनोन्तलु ॥ ६ ॥

म्मन्तेनिसिदेचिराजन पोचिकब्बेय पुत्रनखिल-तीर्थकर-परम-देव-परम-चरिताकर्ण्णनोदीर्ण्ण-विपुल-पुलक-परिकलित वार

बाणनुवसम-समर-रस-रसिक-रिपु-नृप-कलापावलेप-लोप-लोलुप-कृपाणनुवाहाराभय-भैषज्य-शास्त्रदान-विनोदनुं सकल - लोक-शोकापनोदनुं ॥

वृत्त ॥ वज्रं वज्रभृतो हलं हलभृतश्चक्रं तथा चक्रिण
    श्शक्तिश्शक्तिधरस्य गाण्डिवधनुर्गाण्डीव-कोदण्डिनः ।
    यस्तद्वत् वितनोति विष्णुनृपतेष्कार्य्यं कथं मादृशै-
    र्गङ्गो गाङ्ग-तरङ्गरञ्जित-यशो-राशिस्सवर्ण्णो भवेत् ॥ ७ ॥

इन्तेनिप श्रीमन्महाप्रधानं दण्डनायकं द्रोहघरट्टगङ्गराजं चालुक्यचक्रवर्त्ति त्रिभुवनमल्ल पेर्म्माडिदेवनदलं पन्निर्व्वर्-स्सामन्तर्व्वेरसुकण्णेगालबीडिनलुविट्टिरे ॥

कन्द ॥ तेगेवारुवमं हारुव
    वगेयं तनगिरुल बवरवेनुत सवङ्गं ।
    बुगुवकटकिगरनलिरं
    पुगिसिदुदु भुजासि गङ्गदण्डाधिपन ॥ ८ ॥

वचन ॥ एम्बिनमवस्कन्दकेलियिन्दमनिवरुं सामन्तरुमं भङ्गिसि
    तदीयवस्तु-वाहनसमूहमं निजस्वामिगे तन्दु कोट्टुनिज-
    भुजावष्टम्भकेमेच्चि मेच्चिदें बेडिकोल्लेने ॥

कन्द । परमप्रसादमं पडेदु
    राज्यमं धनमनेनुमं बेडदन-
    स्वरमागे बेडिकोण्डं
    परमननिदनर्हदर्च्चनार्च्चितचित्त ॥ ९ ॥

अन्तुबेडिकोण्डु ॥

वृत्त ॥ पसरिसेकीर्त्तनं जननिपोचल-देवियरस्थिवट्ट मा-
डिसिदजिनालयकमोसेदात्म-मनोरमे लचिदेविमा-।
डिसिद जिनालयकमिदुपूजनेयोजितमेन्दुकोट्टुस-
न्तोममनजन्त्रमाम्पनेनेगङ्गचमूपनिदेनुदात्तनो ॥ १० ॥

अक्कर ॥ आदियागिर्प्पुदार्हत-समयके मूलसङ्घं कोण्डकुन्दान्वयं
वादुवेडदं वलयिपुदलिय देसिगगणद पुस्तकगच्छद ।
वाघ-विभवद कुक्कुटासनमलधारिदेवर शिष्यरेनिप पेम्पिङ्ग
आदमंसेदिर्प्पशुभचन्द्र-सिद्धान्त-देवरगुरुंगङ्ग-चमूपति ११।
गङ्गवाडिय बसदिगलेनितोलवनितुमन्तानेव्दे पोसयिसिदं
गङ्गवाडिय गोम्मटदेवर्गे सुत्तालयमनेव्दे माडिसिदं ।
गङ्गवाडिय तिगुलरं वेङ्कोण्डु वीरगङ्गङ्गे निमिर्च्चिकोट्ट
गङ्गराजना मुन्निन गङ्गररायङ्गं नूर्मडियन्यनल्ते ॥ १२ ॥

[यह लेख शिलालेख नं० ५६ (७३) के प्रथम पैंतीस पद्यों का उद्धरण मात्र है। देखो नं० ५९]

४६ (१२६)

एरडु कट्टे वस्तिके पश्चिम की ओर मण्डप में पहले स्तम्भ पर

(शक सं० १०३७)

(उत्तरमुख)

भद्रमस्तु जिनशासनस्य ॥

जयतु दुरितदूरः क्षीरकूपारहारः
प्रथितपृथुलकीर्तिर्ग श्री शुभेन्द्रव्रतीशः ।

गुणमणिगणसिंधु शिशष्टलोकैकबन्धुः
विबुधमधुपफुल्ल. फुल्लबाणादिसल्लः ॥१ ॥
श्रीवधुचन्द्रलेखं सुरभूरुहदुद्भवदिं पयोधिवे-
लावधु पेम्पुवेत्तवोल निन्दिते नागले चारुरूपली- ।
लावति दण्डनायकिति लक्कलेदेमति बूचिराजनं-
म्बीविभु पुट्टे पेम्पु वडेदाज्जिंसिदलु पिरिदप्प कीर्त्तिय ॥ २ ॥
श्रावयव्वेय मगनेन्तप्पनेन्दडे ॥

स्वस्ति समस्तभुवनभवनविख्यातख्यातिकान्तानिकामकमनीयमुखकमलपरागपरभागसुभगीकृतात्मीयवक्त्रनुं । स्वकीयकायकान्तिपरिहसितकुसुमचापगात्रनुं । आहाराभयभैषज्यशास्त्रदानविनोदनुं । सकललोकशोकामनोदनुं । निखिलगुणगणाभरणनुं । जिनचरणशरणनुमेनिसिद बूचणं ।

वृत्त ॥ विनयद सीमे सत्यद तवर्म्मने शौचद जन्मभूमि ये—
न्दनवरतं पोगल्वुदु जनं विबुधोत्करकैरवप्रबो-
धनहिमरोचियं नेगर्द्द बूचियनुद्धपरात्थसद्गुणा-
भिनवदधीचियं सुभटभीकरविक्रमसव्यसाचियं ॥ ३ ॥

आ-यण्णं **सकवर्ष १०३७ नेय विजयसंवत्सरद-वैशाखसुद्ध १० आदित्यवार** दन्दु सर्व्वसङ्गपरित्यागपूर्व्वकं मुडिपिदं ॥

(पश्चिममुख)

पद्य ॥ त्यागंसर्व्वगुणाधिकं तदनुजं शौर्य्यं च तद्बान्धवं
धैर्य्यं गर्व्वगुणातिदारुणरिपुं ज्ञानं मनोऽन्यं सतां ।

शेषाशेषगुणं गुणैकशरणं श्रीवूचणोऽस्याहितं
सत्यं सत्यगुणीकरोति कुरुते किं वा न चातुर्य्यभाक् ॥ ४ ॥
यो वीर्य्ये गजवैरिभूयमतुले दानक्रमे वूचणो
यस्साक्षात्सुरभूजभूयमवनौ गम्भीरताया विधौ ।
यो रत्नाकरभूयमुन्नति-गुणे यो मेरुभूयं गत-
स्सोऽन्ते सान्तमना मनीषिलषितं गीर्व्वाणभूयगतः ॥ ५ ॥
माराकारइति प्रसिद्धतरइत्यत्यूर्ज्जित-श्रीरिति
प्राप्तस्वर्गपतिप्रभुत्वगुणइत्युच्चैर्म्मनीषीति च ।
श्रीमद्गङ्गचमूपते प्रियतमा लक्ष्मीसहृक्षा शिला—
स्तम्भं स्थापयतिस्म वूचणगुणप्रख्यातिवृद्धिं प्रति ॥ ६ ॥
धरे लघुत्वाव्तु विश्रुतविनेयनिकायमनाथमाव्तुवाक्-
तरुणियुमीगली जगदोलार्ग्गमनादरणीयेयादले—
न्दिरदे विषादमादमोदवुत्तिरे भव्यजनान्त [रङ्ग] दोलु
निरुपमनेय्दिदं नेगर्द वूचियणं दिविजेन्द्रलोकमं ॥७॥
श्री मूलसङ्घद देसिगगणद पुस्तकगच्छद शुभचन्द्रसिद्धान्त-
देवर गुड्डं वूचणन निशिधिगे ॥

[इस लेख में 'नागले' माता के सुपुत्र 'वूचिराज' व वूचण के सौन्दर्य, शौर्य और सद्गुणों का उल्लेख है। यह तेजस्वी और धर्मिष्ट पुरुष शक सं० १०३७ वैशाख सुदि १० रविवार को सर्व-परिग्रह का त्यागकर स्वर्गगामी हुआ। उनके स्मरणार्थ सेनापति गङ्ग ने एक पाषाण-स्तम्भ आरोपित कराया।

वूचिराज के गुरु मूल संघ, देशीगण पुस्तक गच्छ के शुभचन्द्र सिद्धान्त देव थे।]

४७ (१२७)

उसी मण्डप में द्वितीय स्तम्भ पर

(शक सं० १०३७)

(दक्षिणमुख)

भद्रं भूयाज्जिनेन्द्राणां शासनायाघनाशिने ।
कुतीर्थ-ध्वान्तसङ्घातप्रभिन्नघनभानवे ॥ १ ॥
श्रीमन्नाभेयनाथाद्यमलजिनवरानीकसौधोरुवार्द्धिः
प्रध्वस्ताघ-प्रमेय-प्रचय-विषय-कैवल्यबोधोरु-वेदिः ।
शस्तस्यात्कारमुद्राशबलितजनतानन्दनादोरुघोषः
स्थेयादाचन्द्रतारं परमसुखमहावीर्य्यवीचीनिकायः ॥ २ ॥
श्रीमन्मुनीन्द्रोत्तमरत्नवर्ग्गाः श्रीगौतमाद्याः प्रभविष्णवस्ते ।
तत्राम्बुधौ सप्तमहर्द्धियुक्तास्तत्सन्ततौ **नन्दि**गणे बभूव ॥३॥
श्री**पद्मनन्दी**त्यनवद्यनामाह्याचार्य्यशब्दोत्तर**कोण्डकुन्दः** ।
द्वितीयमासीदभिधानमुद्यच्चरित्रसञ्जातसुचारणर्द्धिः ॥४॥
अभूदु**मास्वाति**मुनीश्वरोऽसावाचार्य्यशब्दोत्तरगृद्धपिञ्छः ।
तदन्वये तत्सदृशोऽस्ति नान्यस्तात्कालिकाशेषपदार्त्थवेदी ॥५॥
श्रीगृद्धपिञ्छमुनिपस्य**बलाक**पिञ्छः
शिष्योऽजनिष्टभुवनत्रयवर्त्तिकीर्त्तिः ।
चारित्रचुञ्चुरखिलावनिपालमौलि-
मालाशिलीमुखविराजितपादपद्मः ॥६॥
तच्छिष्योगु**णनन्दि**पण्डितयतिश्चारित्रचक्रेश्वर-
स्तर्क्कव्याकरणादिशास्त्रनिपुणस्साहित्यविद्यापतिः ।

मिथ्यावादिमदान्धसिन्धुरघटासङ्घट्टकण्ठीरवो
भव्याम्भोजदिवाकरो विजयतां कन्दर्प्पदर्प्पापहः ॥७॥
तच्छिष्याखिशता विवेकनिधयश्शास्त्राब्धिपारङ्गता-
स्तेपूत्कृष्टतमा द्विसप्ततिमितास्सिद्धान्तशास्त्रार्थक-
व्याख्याने पटवो विचित्रचरितास्तेषु प्रसिद्धो मुनिः
नानानूननयप्रमाणनिपुणो देवेन्द्रसैद्धान्तिकः ॥८॥
अजनि महिपचूडारत्नराराजिताङ्घ्रि -
र्व्विजितमकरकेतूद्दण्डदोर्द्दण्डगर्व्वः ।
कुनयनिकरभूध्रानीकदम्भोलिदण्ड
स्सजयतु विबुधेन्द्रो भारतीभालपट्ट. ॥९॥
तच्छिष्यः कलधौतनन्दिमुनिपस्सैद्धान्तचक्रेश्वरः
पारावारपरीतधारिणिकुलव्याप्तोरुकीर्त्तीश्वरः ।
पञ्चाचोन्मदकुम्भिकुम्भदलनप्रोन्मुक्तमुक्ताफल—
प्रांशुप्राञ्चितकेसरी बुधनुतो वाक्कामिनीवल्लभः ॥१०॥
तत्पुत्रको महेन्द्रादिकीर्त्तिर्म्मदनशङ्कर. ।
यस्य वाग्देवता शक्ता श्रीर्ति मालामयूयुजत् ॥११॥
तच्छिष्यांवीरणन्दीकवि-गमक-महावादि-वाग्मित्वयुक्तो
यस्य श्रीनाकसिन्धुत्रिदशपतिगजाकाशगङ्गाशकीर्त्ति ।
गायन्त्युच्चैर्द्दिगन्ते त्रिदशयुवतयः प्रीतिरागानुबन्धात्
सोऽयं जीयात्प्रमादप्रकरमहिधराभीलदम्भोलिदण्डः ॥१२॥
श्रीगोल्लाचार्य्यनामा समजनि मुनिपश्शुद्धरत्नत्रयात्मा
सिद्धात्माधर्त्थ-सार्त्थ-प्रकटनपटु-सिद्धान्त-शास्त्राब्धि-वीची—

सङ्ग्रातचालिताहः प्रमदमदकलालीढवुद्धिप्रभावः
जीयाद्भू पाल-मौलि-द्युमणि-विदलिताङ्घ्र्यब्जलक्ष्मीविलासः ॥
पेर्ग्गडे चावराजं बरेदंमङ्गल ॥

(पश्चिममुख)

वीरणन्दि विवुधेन्द्रसन्ततौ नूलचन्दिलनरेन्द्रवंशचू-
डामणिः प्रथितगोल्लदेशभूपालकः किमपि कारणेन सः ॥१४॥
श्रीमत्**त्रैकाल्ययोगी** समजनि महिकाकायलग्नातनुत्रं
यस्याभूद्वृष्टिधारा निशित-शर-गणा ग्रीष्ममार्त्तण्डविम्वं।
चक्रंसद्वृत्तचापाकलितयतिवरस्याघशत्रून्विजेतुं
गोल्लाचार्य्यस्य शिष्यस्सजयतु भुवने भव्यसत्कैरवेन्दुः ॥१५॥
तपस्सामर्थ्यतो यस्य छात्रोऽभूद्ब्रह्मराक्षसः।
यस्य स्मरणमात्रेण मुञ्चन्ति च महाग्रहाः ॥१६॥
प्राज्याज्यतां गतं लोके करञ्जस्य हि तैलकं।
तपस्सामर्थ्यतस्तस्य तपः किं वर्ण्णितुं क्षमं ॥१७॥
त्रैकाल्य-योगि-यतिपाग्र-विनेयरत्न-
स्सिद्धान्तवार्द्धिपरिवर्द्धनपूर्णचन्द्रः।
दिग्नागकुम्भलिखितोज्ज्वलकीर्त्तिकान्तो
जीयादसाव**भयनन्दि**मुनिर्ज्जगत्यां ॥१८॥
येनाशेषपरीषहादिरिपवस्सम्यग्जिताः प्रोद्धताः
येनाप्ता दशलक्षणोत्तममहाधर्म्माख्यकल्पद्रुमाः।
येनाशेष-भवोपताप-हननस्वाध्यात्मसंवेदनं
प्राप्तं स्वादभयादिनन्दिमुनिपस्सोऽयं कृतार्थो भुवि ॥१९॥

तच्छिष्यस्सकलागमार्थनिपुणो लोकज्ञतासंयुत-
स्सच्चारित्रविचित्रचारुचरितस्सौजन्यकन्दाङ्कुरः ।
मिथ्यात्वाब्जवनप्रतापहननश्रीसोमदेवप्रभु-
र्जीयात्सत्सकलेन्दुनाममुनिपः कामाटवीपावकः ॥२०॥
अपिच **सकलचन्द्रो** विश्वविश्वम्भरेश
प्रणुतपदपयोजः कुन्दहारेन्दुरोचि. ।
त्रिदशगजभुवङ्गव्योमसिन्धुप्रकाश
प्रतिमविशदकीर्त्तिर्व्याप्तविश्वान्तरालः ॥२१॥
शिष्यस्तस्य दृढव्रतश्शमनिधिस्सत्संयमाम्भोनिधिः
शीलानां विपुलालयस्समितिभिर्युक्तिस्त्रिगुप्तिश्रितः ।
नानासद्गुणरत्नरोहणगिरिर् प्रोद्यत्तपो जन्मभूः
प्रख्यातो भुवि **मेघचन्द्र**मुनिपस्त्रैविद्यचक्राधिपः ॥ २२ ॥
त्रैविद्ययोगीश्वर-मेघचन्द्रस्याभूत्**प्रभाचन्द्र**मुनिस्सुशिष्यः ।
शुम्भद्व्रताम्भोनिधिपूर्णचन्द्रो निर्धूतदण्डत्रितयो विशल्यः २३
पुष्पास्त्रानून-दानोत्कट-कट-करटिच्छेद-दृप्यन्मृगेन्द्रः
नानाभव्याब्जषण्डप्रतति-विकसन-श्रीविधानैकभानुः ।
संसाराम्भोधिमध्योत्तरणकरणतायानरत्नत्रयेशः
सम्यग्जैनागमार्थान्वित-विमलमतिः श्री **प्रभाचन्द्र**
योगी ॥ २४ ॥

(उत्तरमुख)

श्रीभूपालकमौलिलालितपदस्सज्ज्ञानलक्ष्मीपति—
श्चारित्रोत्करवाहनश्शितयशश्शुभ्रातपत्राञ्चितः ।

त्रैलोक्याद्भुतमन्मथारिविजयस्सद्धर्म्मचक्राधिपः
पृथ्वीसंस्तवतूर्य्यघोषनिनदस्त्रैविद्यचक्रेश्वरः ॥ २५ ॥
शाब्दौघस्य शिरोमणिः प्रविलसत्तर्कज्ञचूड़ामणिः
सैद्धान्तेद्धशिरोमणिः प्रशमवद् व्रातस्य चूड़ामणिः ।
प्रोद्यत्संयमिनां शिरोमणिरुदग्भव्यरत्नामणि-
र्जीयात्सन्नुतमेघचन्द्रमुनिपस्त्रैविद्यचूड़ामणिः ॥ २६ ॥
त्रैविद्योत्तममेघचन्द्रयमिनः पत्युर्म्ममासि प्रिया
वाग्देवी दिसहावहित्थहृदया तद्वश्यकर्म्मार्त्थिनी ।
कीर्त्तिर्व्वारिधिदिक्कुलाचलकुले खादात्मा प्रष्टुम-
प्यन्वेष्टुं मणिमन्त्रतन्त्रनिचयं सा सम्भ्रमाभ्राम्यति ॥२७॥
तर्क्कन्यायसुवज्रवेदिरमलार्हत्सूक्तितन्मौक्तिकः
शब्दग्रन्थविशुद्धशङ्खकलितस्स्याद्वादसद्विद्रुमः ।
व्याख्यानोर्जितघोषणर् प्रविपुलप्रज्ञोद्धवीचीचयो
जीयाद्विश्रुत**मेघचन्द्र**-मुनिपस्त्रैविद्य-रत्नाकरः ॥ २८ ॥

श्रीमूलसङ्घकृत-पुस्तक-गच्छ-देशी
योद्यद्गणाधिपसुतार्क्किकचक्रवर्त्ती ।
सैद्धान्तिकेश्वरशिखामणि**मेघचन्द्र**-
स्त्रैविद्यदेव इति सद्विबुधा(:) स्तुवन्ति ॥ २९ ॥

सिद्धान्ते जिन-**वीरसेन**-सदृशः शास्त्राब्ज-भा-भास्करः
षट्तर्केष्व**कलङ्कदेव**विबुधः साक्षादयं भूतले ।
सर्व्व-व्याकरणे विपश्चिदधिपः श्री**पूज्यपाद**स्स्वयं
त्रैविद्योत्तममेघचन्द्रमुनिपो वादीभपञ्चाननः ॥ ३० ॥

रुद्राणीशस्य कण्ठं धवलयति हिमज्योतिषोजातमङ्कं
पीतं सौवर्णशैलं शिशुदिनपतनुं राहुदेहं नितान्तं ।
श्रीकान्तावल्लभाङ्गं कमलभववपुर्म्मेघचन्द्रव्रतीन्द्र—
त्रैविद्यस्याखिलाशावलयनिलयसत्कीर्त्तिचन्द्रातपोऽसौ ॥३१॥
मुनिनाथं दशधर्म्मधारि दृढषट्-त्रिंशद्गुणं दिव्य-वा-
णनिधानं निनगिल्जुचापमलिनीज्यासूत्रमोरेन्दे पू-
विन वाणङ्गलुमयदे हीननधिकङ्गाचेपमंमाप्पुदा—
व नयं दर्प्पक मेघचन्द्र मुनियोल् माणनिन्नदोर्द्दप्पेमं ॥३२॥
मृदुरेखाविलासं चावराज-वलहदल्बरेदुद विरुद रूवा-
रिमुख-तिलकगङ्गाचारि कण्डरिसिद शुभचन्द्रसिद्धान्त-
देवरगुड्ड ।

(पूर्वमुख)

श्रवणीयं शब्दविद्यापरिणति महनीयं महातर्क्कविद्या—
प्रवणत्वं श्लाघनीयं जिननिगदित-संशुद्धसिद्धान्तविद्या-
प्रवणप्रागल्भ्यमेन्देन्दुपचितपुलकं कीर्त्तिसल् कूर्त्तु-विद्व-
त्रिवहं त्रैविद्यनाम-प्रविदितनेसेदं मेघचन्द्रव्रतीन्द्र ॥३३॥
क्षमेगीगल् जीवनं तीविदुदतुलतप श्रीगे लावण्यमीगल्
समसन्दिर्द्दत्तु तन्नि श्रुतवधुगधिकप्रौढियायतीगलेन्द-
न्दे महाविख्यातियं तालिददनमलचरित्रोत्तमं भव्यचेतो-
रमणं त्रैविद्यविद्योदितविशदयशं मेघचन्द्रव्रतीन्द्र ॥३४॥
इदे हंसीवृन्दमीण्टल् बगेदपुदु चकोरीचयं चञ्चुविन्दं
कदुकल् सार्द्दप्पुदीशं जडेयोलिरिसलेन्दिर्द्दपं सेज्जेगेरल् ।

पदेदप्पं कृष्णनेम्बन्तेसेदु विस-लसत्कन्दलीकन्दकान्त
पुदिदत्तो **मेघचन्द्र**व्रतितिलकजगद्वर्त्तिकीर्त्तिप्रकाश ॥३५॥
पूजितविदग्धविबुधस-
माजं त्रैविद्य-**मेघचन्द्र**-व्रति रा-
राजिसिदं विनमितमुनि-
राजं वृषभगणभगणताराराजं ॥३६॥

सक वर्ष १०३७ नेय मन्मथसंवत्सरद मार्ग्ग-सिर सुद्ध १४ बृहवारं धनुलग्नद पूर्व्वाह्णदारुघलिगेयप्पागलु श्रीमूलसङ्घद देसिगगणद पुस्तकगच्छद श्री**मेघचन्द्र**त्रैविद्य देवर्त्तम्मग्रशानकालमनरिदु पल्यङ्काशनदोलिद्दु आत्मभावनेयं भाविसुत्तुं देवलोकक्के सन्दराभावनेयेन्तप्पुदेन्दोडे ॥

अनन्त-बोधात्मकमात्मतत्त्वं निधाय चेतस्यपहाय हेयं ।
त्रैविद्यनामा मुनि**मेघचन्द्रो** दिवं गतोबोधनिधिर्व्विशिष्टाम् ॥

अवरग्रशिष्यरशेष-पद-पदार्त्थ-तत्त्व-विदरु सकलशास्त्रपारावारपारगरु गुरुकुलसमुद्धरणरुमप्प श्री **प्रभाचन्द्र**-सिद्धान्त-देवर्त्तम्म गुरुगलगे परोक्षविनेयं कारणमागि श्री**कब्बप्पु**-तीर्त्थदलु तम्म गुड्डं ॥

समधिगतपञ्चमहाशब्द महासामन्ताधिपति महाप्रचण्ड दण्डनायक वैरिभयदायकं गोत्रपवित्रं बुधजनमित्र स्वामिद्रोह-गोधूमघरट्ट सङ्ग्रामजत्तलट्ट **विष्णुवर्द्धन**भूपालहोय्सलमहाराज-राज्य-समुद्धरण कलिगलाभरण श्रीजैनधर्म्मामृताम्बुधि-प्रवर्द्धन-सुधाकर सम्यक्तरत्नाकर श्रीमन्महाप्रधानं दण्डनायकगङ्गराजनु-

मातन मनस्सरोवरराजहंसे भव्यजनप्रशंसे गोत्र-निधाने रुक्मिणी
समाने लक्ष्मीमतिदण्डनायकितियुमन्तवरिन्दमतिशयमहा-
विभूतियिं सुभलग्नदोलु प्रतिष्ठेय माडिसिदर् आमुनीन्द्रोत्तमर्
डनिसिधिगेयन् अवर तपःप्रभावमेन्तप्पुदेन्दोडे ॥

समदोद्यन्मार-गन्ध-द्विरद-दलन १-कण्ठीरव क्रोध-लोभ-
द्रुम-मूलच्छेदनं दुर्द्धरविषयशिलाभेद-वज्र-प्रतापं ।
कमनीयं श्रीजिनेन्द्रागमजलनिधिपारं प्रभाचन्द्र-सिद्धान्तमु-
नीन्द्रं मोहविध्वंसनकरनेसेदं धात्रियोल् योगिनाथ ॥ ३८ ॥

चावराज बरेद ॥

मत्तिन मातवन्तिरलि जीर्ण्णजिनाश्रयकोटियं क्रमं
बेत्तिरे मुन्निनन्तिरनितुर्व्वलोल् नेरे माडिसुत्तम-
स्युत्तमपात्रदानदोदवं मेरेवुत्तिरे गङ्गवाडितो-
म्वत्तरु मासिरं कोपणमादुदु गङ्गणदण्डनाथनिं ॥ ३९ ॥

सोभेयनं कैकोण्डुदो
सौभाग्यद-कणियेनिप्प लक्ष्मीमतियि-
न्दीभुवनतलदोला हा-
राभयभैसज्यशास्त्र-दान-विधान ॥४०॥

[यह लेख मेघचन्द्र त्रैविद्यदेव की प्रशस्ति है। प्रथम श्लोक को छोड़ आदि के नव पद्य वे ही हैं जो शिलालेख नं० ४२ (६६) में भी पाये जाते हैं। उनमें कुन्दकुन्दाचार्य, उमास्वाति गृद्ध पिच्छ, बलाक पिच्छ, गुणनन्दि, देवेन्द्र सैद्धान्तिक और कलधौतनन्दि मुनि का उल्लेख है।

१ द्विरदन-घल

कलधौतनन्दि के पुत्र महेन्द्रकीर्त्ति हुए जिनकी आचार्य परम्परा में क्रम से वीरनन्दि, गोल्लाचार्य, त्रैकाल्ययोगी, अभयनन्दि और सकल-चन्द्र मुनि हुए। लेख में इन आचार्यों के तप और प्रभाव का अच्छा वर्णन है। त्रैकाल्ययोगी के विषय मे कहा गया है कि तप के प्रभाव से एक ब्रह्मराक्षस उनका शिष्य होगया था। उनके स्मरणमात्र से बड़े बड़े भूत भागते थे, उनके प्रताप से करञ्ज का तैल घृत में परिवर्तित होगया था। सकलचन्द्रमुनि के शिष्य मेघचन्द्र त्रैविद्य हुए जो सिद्धान्त में वीरसेन, तर्क में अकलङ्क और व्याकरण मे पूज्यपाद के समान विद्वान् थे।

शक सं० १०३७ मार्गसिर सुदि १४ बृहस्पतिवार को उन्होंने सद्ध्यानसहित शरीर-त्याग किया। उनके प्रमुख शिष्य प्रभाचन्द्र सिद्धान्त देव ने महाप्रधान दण्डनायक गङ्गराज द्वारा उनकी निषद्या निर्माण कराई।

लेख चावराज का लिखा हुआ है।]

४८ (१२८)

उसी मण्डप में तृतीय स्तम्भ पर

(शक सं० १०४४)

श्रीमत्परमगम्भीर-स्याद्वादामोघलाञ्छनं।
जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनं॥ १ ॥
जयतु दुरितदूरः चोरकूपारहारः
प्रथितपृथुलकीर्त्तिश्रीशुभेन्दुव्रतीशः।
गुणमणिगणसिन्धुः शिष्टलोकैकबन्धुः
विबुध-मधुप-फुल्लः फुल्लबाणादि-सल्लः॥ २ ॥

अवर गुड्डि ॥

परमपदार्थनिर्ण्णयमनान्त विदग्धते दुर्न्नयङ्गलोल्
परिचयमेन्दुमिल्लदतिमुग्धते तन्निनियङ्गे चित्तदोल् ।
पिरिदनुरागमं पडेव रूपु विनेयजनान्तरङ्गदोल्
निरुपमभक्तियं पडेव पेम्पिनु लक्ष्मलेगेन्दुमन्वितं ॥ ३ ॥

चतुरतेयोल् लावण्य दो-
लतिशयमेने नेगल्द देवभक्तियोलिन्ती
क्षितियोलगे गङ्गराजन
सति लक्ष्म्यम्बिकेयोलितरसतियर्दोरेये ॥ ४ ॥

सौभाग्यदोलमद्दीदं
सोभास्पदमादरूपिनोलिं प्रत्य-
क्षोभूत लक्ष्मियेन्दपु-
दी भूतलमिनितुमेय्दे लक्ष्मीमतियं ॥ ५ ॥

शोभेयनें कय्कोण्डुदो
सौभाग्यद कणियेनिप्प लक्ष्मीमतियि-
न्दी भुवन-तलदोलाहा-
राभय-भैश(ष)ज्यशास्त्रदानविधानं ॥ ६ ॥

वितरणगुणमदे वनिता-
कृतियं कय्कोण्डुदेनिप महिमेय लक्ष्मी-
मतियेलवो देवताधि-
ष्टितेयल्लदे केवलं मनुष्याङ्गनेये ॥ ७ ॥

इभगमने हरिणलोचने

शुभलक्षणे गङ्गराजनङ्गने ता-
नभिनवरुग्मिणियेनलौ
त्रिभुवनदोल् पोल्वरोलरे लक्ष्मीमतियं ॥ ८ ॥

श्रीमूलसङ्घद देशियगणद पुस्तकगच्छद श्रीमत्-शुभचन्द्र सिद्धान्तदेवर गुड्डि दण्डनायकिति लक्कव्वे सक वर्षं १०४४ नेय प्लव सम्वत्सरद शुद ११ शुक्रवारदन्दु सन्यसनं गेय्दु समाधिवेरसि मुडिपि देवलोकक्के सन्दल् ॥

परोक्षविनेयक्के निषिधिगेयं श्रीमद्दण्डनायक-गङ्गराजं निलिसि प्रतिष्ठेमाडि महादानमहापुजेगलं माडिदरु मङ्गल महा श्री श्री ॥

[इस लेख में दण्डनायक गङ्गराज की धर्मपत्नी लक्ष्मीमति के गुण, शील और दान की प्रशंसा की गई है। इस धर्मपरायण साध्वी महिला ने शक सं० १०४४ में संन्यास-विधि से शरीर त्याग किया। वह मूलसंघ पुस्तक-गच्छ देशीगण के शुभचन्द्राचार्य की शिष्या थी। अपनी साध्वी स्त्री की स्मृति में दण्डनायक गङ्गराज ने यह निषद्या निर्माण कराई।]

४९ (१२९)

उसी मण्डप में चतुर्थ स्तम्भ पर

(शक सं० १०४२)

(उत्तरमुख)

भद्रमस्तु जिनशासनस्य ॥

जयतु दुरितदूरः चीरकूपारहारः

प्रथितपृथुलकीर्त्तिश्श्री शुभेन्द्र ब्रतीशः।
गुणमणिगणसिन्धु' शिष्ट लोकैकबन्धुः
विबुधमधुपफुल्ल' फुल्लबाणादिसल्लः ॥ १ ॥

श्रीवधुचन्द्रलेखे सुरभूरुहदुद्भवदि पयोधि-वे-
लावधु पेम्पु वेत्तवोलनिन्दिते नागले चारुरूपली-
लावति दण्डनायकिति लक्कले देमति बूचिराजने
म्वी विभु पुट्टे पेम्पु वडेदार्ज्जिसिदल् पिरिदप्पकीर्त्तियं ॥२॥

वचन ॥ आ यब्बेय मगलेन्त्वप्पलेन्दडे। स्वस्ति निस्तुषाति-जितवृजिन-भाग - भगवदर्हदर्हणीयचारुचरणारविन्दद्वन्द्वानन्दव-न्दनवेलाविलोकनीयाद्माथमाण—लक्ष्मीविलासेयुं। अपहसनी-यस्वीयजीवितेशजीवितान्तजीवनविनोदानारतरतरतिविलासेयुं। कालेयकालराक्षसरक्षाविकलसकलवाणिजत्राणतिप्रचण्डचा-मुण्डातिश्रेष्ठराजश्रेष्ठिमानसराजमानराजहंसवनिताकल्पेयुं। परमजिनमतपरित्राणकरणकारणीभूत —जिनशासनदेवताकारा-कल्पेयु। अभिरामगुणगणवशीकरणीयतानुकरणीयधरणीसुतेयुं। श्रीसाहित्यसत्यापितक्षीरोदसुतेयुं। सद्धर्म्मानुरागमतियुंएनिसि-ददेमियक ॥

पद्य ॥ श्रीचामुण्डमनोमनोरथरथव्यापारणैकक्रिया
श्रीचामुण्डमनस्सरोजरजसाराजद्द्विरेफाङ्गना।
श्रीचामुण्डगृहाङ्गणोद्गतमहाश्रीकल्पवल्ली स्वयं
श्रीचामुण्डमनःप्रिया विजयतांश्रीदेमवत्यङ्गना ॥ ३ ॥

(पश्चिममुख)

आहारं त्रिजगज्जनाय विभयं भीताय दिव्यौषधं
व्याधिव्यापदुपेतदीनमुखिने श्रोत्रे च शास्त्रागमं ।
एवं देवमतिस्सदैव ददती प्रप्रचये स्वायुषा—
मर्हद्देवमतिंविधाय विधिना दिव्या वधू प्रोदभू ।। ४ ।।
आसीत्परक्षोभकरप्रतापाशेषावनीपालकृतादरस्य ।
चामुण्डनाम्नो वणिज:प्रियास्त्री मुख्यामती या भुविदे-
मतीति ।। ५ ।।

भूलोक-चैत्यालय-चैत्य-पूजा-व्यापार-कृत्यादरतोऽवतीर्णा
स्वर्गात्सुरस्त्रीतिविलोक्यमाना पुण्येनलावण्यगुणेनयात्र ।।६।।
आहारशास्त्राभयभेषजानां दायिन्यलंवर्णचतुष्टयाय ।
पश्चात्समाधिक्रिययायुरन्ते स्वस्थानवत्स्व: प्रविवेशयोच्चै: ।।७।।
सद्धर्म्मशत्रुं कलिकालराजं जित्वा व्यवस्थापितधर्म्मवृत्या ।
तस्याजयस्तम्भनिभंशिलाया स्तम्भंव्यवस्थापयतिस्म लक्ष्मी :।।८।।

श्रीमूलसङ्घद देसिगगणद पुस्तकगच्छद शुभचन्द्र सिद्धान्तदेवर गुड्डि सकवर्ष १०४२ नेय विकारिसंवत्सर-दफाल्गुणब ११ बृहवारदन्दु सन्यासन विधियि देमियक मुडिपिदलु ।।

[इस लेख में चामुण्ड नाम के किसी प्रतिष्ठित और राजसन्मानित वणिक् की धर्मवती भार्या 'देमति' व 'देवमति' की प्रशंसा है । इस महिला की माता का नाम 'नागवे' व उसके एक भाई और बहिन के नाम क्रमश: बूचिराज और लक्कले थे । दान-पुण्य के कार्यों में जीवन

स्वीन कर इस महिला ने शक सं० १०४७, फाल्गुण वदि ११ बृहस्पति वार को सन्यास-विधि से शरीर त्याग किया। यह महिला शुभचन्द्र सिद्धान्तदेव की शिष्या थी।]

५० (१४०)

गन्धवारण बस्ती के प्रथम मण्डप में एक स्तम्भ पर

(शक सं० १०६८)

(पूर्वमुख)

भद्रं भूयाज्जिनेन्द्राणां शासनायाघनाशिने।
कुतीर्थ्यध्वान्तसङ्घातप्रभिन्नघनभानवे ॥ १ ॥
श्रीमन्नाभेयनाथाद्यमलजिननगानीकसंधारुवार्द्धिः
ध्वस्ताघप्रमेयप्रचयविषयकैवल्यबोधोरुवेदिः।
शस्त्यात्कारमुद्राशबलितजनतानन्दनादोरुघोष.
स्थेयादाचन्द्रतारं परमसुखमहावीर्य्यवीचीनिकायः ॥ २ ॥
श्रीमन्मुनीन्द्रोत्तमरत्नवर्गाः श्रीगौतमाद्याः प्रभविष्णवस्ते।
तत्राम्बुधौ सप्तमहर्द्धियुक्तास्तत्सन्ततौ नन्दिगणे बभूव ॥ ३ ॥
श्रीपद्मनन्दीत्यनवद्यनामा ह्याचार्य्यशब्दोत्तरकोण्डकुन्दः।
द्वितीयमासीदभिधानमुद्यच्चरित्रसञ्जातसुचारणर्द्धिः ॥ ४ ॥
अभूदुमास्वाति मुनीश्वरोऽसावाचार्य्यशब्दोत्तरगृद्ध-
पिञ्छः।
तदन्वये तत्सदृशोऽस्ति नान्यस्तात्कालिकाशेषपदार्थवेदी ॥५॥
श्रीगृद्धपिञ्छमुनिपस्य बलाकपिञ्छः
शिष्योऽजनिष्ट भुवनत्रयवर्त्तिकीर्त्तिः।

चारित्रचञ्चुरखिलावनिपालमौलि-
मालाशिलीमुखविराजितपादपद्मः ॥ ६ ॥
तच्छिष्यो **गुणनन्दि**पण्डितयतिश्चारित्रचक्रेश्वर-
स्तर्क्कव्याकरणादिशास्त्रनिपुणस्साहित्यविद्यापतिः ।
मिथ्यावादिमदान्धसिन्धुरघटासङ्घट्टकण्ठीरवो
भव्याम्भोजदिवाकरो विजयतां कन्दर्प्पदर्प्पापहः ॥ ७ ॥
तच्छिष्यास्त्रिशता विवेकनिधयश्शास्त्राब्धिपारङ्गता-
स्तेषूत्कृष्टतमा द्विसप्ततिमितास्सिद्धान्तशास्त्रार्थक-
व्याख्याने पटवो विचित्रचरितास्तेषु प्रसिद्धो मुनिः
नानानूननयप्रमाणनिपुणो **देवेन्द्र**सैद्धान्तिकः ॥ ८ ॥
अजनि महिपचूड़ारत्नराराजिताङ्घ्रि -
र्व्विजितमकरकेतूद्दण्डदोर्द्दण्डगर्व्वः ।
कुनयनिकरभूध्रानीकदम्भोलिदण्ड
स्सजयतु **विबुधेन्द्रो** भारतीभालपट्टः ॥ ६ ॥
तच्छिष्यः **कलधौतनन्दि**मुनिपस्सैद्धान्तचक्रेश्वरः
पारावारपरीतधारिणिकुलव्याप्तोरुकीर्त्तीश्वरः ।
पञ्चाक्षोन्मदकुम्भिकुम्भदलनप्रोन्मुक्तमुक्ताफल—
प्रांशुप्राञ्चितकेसरी बुधनुतो वाक्कामिनीवल्लभः ॥ १० ॥
तत्पुत्रको **महेन्द्रादिकीर्त्तिर्म्मदनशङ्करः** ।
यस्य वाग्देवता शक्ता श्रौती मालामयूयुजत् ॥ ११ ॥
तच्छिष्यो **वीरणन्दी** कवि-गमक-महावादि-वाग्मित्वयुक्तो
यस्य श्रीनाकसिन्धुत्रिदशपतिगजाकाशसङ्काशकीर्त्तिः ।

गायन्त्युच्चैर्द्दिगन्ते त्रिदशयुवतय: प्रीतिरागानुबन्धात्
सोऽयं जीयात्प्रमादप्रकरमहिधराभीलदम्भोलिदण्ड: ॥१२॥
श्री**गोल्लाचार्य्य**नामा समजनि मुनिपश्शुद्धरत्नत्रयात्मा
सिद्धात्माद्यर्त्थ-सार्त्थ-प्रकटनपटु-सिद्धान्त शास्त्राब्धि-वीची-
सङ्घातक्षालिताङ्ह: प्रमदमदकलालीढबुद्धिप्रभाव:
जीयाद्भूपाल-मौलि-द्युमणि-विदलिताङ्घ्रि रुञ्जलक्ष्मी-
विलास: ॥ १३ ॥

वीरणन्दिविबुधेन्द्रसन्ततौ नूत्नचन्दिलनरेन्द्रवंशचू-
डामणि. प्रथितगोल्लदेशभूपालक: किमपि कारणेन स: ॥१४॥
श्रीमत्**त्रैकाल्ययोगी** समजनि महिकाकायलग्नातनुत्रं
यस्याभूद्वृष्टिधारा निशित-शर-गणा ग्रीष्ममार्त्तण्डबिम्बं ।
चक्रंसद्वृत्तचापाकलितयतिवरस्याघशत्रून्विजेतुं
गोल्लाचार्य्यस्य शिष्यस्सजयतु भुवने भव्यसत्कैरवेन्दु. ॥१५॥
गङ्गणण लिखित

(दक्षिणमुख)

तपस्सामर्त्थ्यता यस्य छात्रोऽभूद्ब्रह्मराक्षस: ।
यस्य स्मरणमात्रेण मुञ्चन्ति च महाग्रहा: ॥ १६ ॥
प्राज्याज्यतां गतं लोके करञ्जस्य हि तैलकं ।
तपस्सामर्त्थ्यतस्तस्य तप: किं वर्ण्णितुंक्षमं ॥ १७ ॥
त्रैकाल्य-योगि-यतिपाग्र-विनेयरत्न-
स्सिद्धान्तवार्द्धिपरिवर्द्धनपूर्णचन्द्र: ।
दिग्नागकुम्भलिखितोज्ज्वलकीर्त्तिकान्तो

जीयादसावभयनन्दिमुनिर्ज्जगत्यां ॥ १८ ॥

येनाशेषपरीषहादिरिपवस्सम्यग्जिताः प्रोद्धताः
येनाप्ता दशलक्षणोत्तममहाधर्म्माख्यकल्पद्रुमाः ।
येनाशेष-भवोपताप-हननं स्वाध्यात्मसंवेदनं
प्राप्तं स्यादभयादिनन्दिमुनिपस्सोऽयं कृतार्थो भुवि ॥ १९ ॥

तच्छिष्यस्सकलागमार्थनिपुणो लोकज्ञतासंयुत-
स्सच्चारित्रविचित्रचारुचरितस्सौजन्य कन्दाङ्कुरः ।
मिथ्यात्वाञ्जवनप्रतापहननश्श्रीसोमदेवप्रभु—
र्जीयात्सत्सकलेन्दु नाममुनिपः कामाटवीपावकः ॥ २० ॥

अपिच सकलचन्द्रो विश्वविश्वम्भरेश-
प्रणुतपदपयोजः कुन्दहारेन्दुरोचिः ।
त्रिदशगजसुवज्रव्योमसिन्धुप्रकाश-
प्रतिमविशदकीर्त्तिर्व्वाग्वधूकर्ण्णपूरः ॥ २१ ॥

शिष्यस्तस्य दृढव्रतश्शमनिधिस्सत्संयमाम्भोनिधिः
शीलानां विपुलालयस्समितिभिर्य्युक्तिस्त्रिगुप्तिश्रितः ।
नानासद्गुणरत्नरोहणगिरिः प्रोद्यत्तपोजन्मभूः
प्रख्यातो भुवि मेघचन्द्र मुनिपस्त्रैविद्यचक्राधिपः ॥२२॥

श्रीभूपालकमौलिलालितपदस्सज्ज्ञानलक्ष्मीपति—
श्चारित्रोत्करवाहनश्शितयशश्शुभ्रातपत्राश्वितः ।
त्रैलोक्याद्भुतमन्मथारिविजयस्सद्धर्म्मचक्राधिपः
पृथ्वीसंस्तवतूर्य्यघोषनिनदस्त्रैविद्यचक्रेश्वरः ॥ २३ ॥

शाब्दौघस्य शिरोमणिः प्रविलसत्तर्क्काङ्गचूडामणिः
सैद्धान्तेपुशिरोमणिः प्रशमवद्-व्रातस्य चूडामणि ।
प्रोद्यत्संयमिनां शिरोमणिरुदश्चद्भव्यरत्नामणि—
र्जीयात्सन्नुतमेघचन्द्रमुनिपस्त्रैविद्यचूडामणिः ॥ २४ ॥
त्रैविद्योत्तममेघचन्द्रयमिनः पत्युर्म्ममासि प्रिया
वाग्देवी दिसहात्रहित्थहृदया तद्वश्यकर्म्मार्त्थिनी ।
कीर्त्तिर्व्वारिधि दिक्कुलाचलकुलस्वादात्म [. .] प्रण्टुम-
प्यन्वेष्टुं मणिमन्त्रतन्त्रनिचयं सा सम्भ्रमाभ्राम्यति ॥२५॥
तर्क्कन्यायसुवज्रवेदिरमलार्हत्सूक्तितन्मौक्तिक.
शब्दग्रन्थविशुद्धशङ्खकलितस्स्याद्वादसद्विद्रुमः ।
व्याख्यानोर्ज्जितघोषणः प्रविपुलप्रज्ञोद्भवीचीचयो
जीयाद्विश्रुतमेघचन्द्र-मुनिपस्त्रैविद्य-रत्नाकरः ॥ २६ ॥

श्रीमूलसङ्घकृत-पुस्तक-गच्छ-देशी
योद्यद्गणाधिपसुतार्किकचक्रवर्ती ।
सैद्धान्तिकेश्वरशिखामणिमेघचन्द्र—
स्त्रैविद्यदेव इति सद्विबुधा (:) स्तुवन्ति ॥ २७ ॥

सिद्धान्ते जिनवीरसेन-सदृशश्शास्त्राब्ज-भा-भास्करः
षट्तर्केष्वकलङ्कदेवविबुधस्साक्षादयं भूतले ।
सर्व्व-व्याकरणे विपश्चिदधिपः श्रीपूज्यपादस्स्वयं
त्रैविद्योत्तममेघचन्द्रमुनिपो वादीभपञ्चाननः ॥ २८ ॥
लिखिता मनोहर परनारीसहोदरनप्प गङ्गणणन लिखित

(पश्चिममुख)

रुद्राणीशस्य कण्ठं धवलयति हिमज्योतिषोजातमङ्कं
पीतं सौवर्ण्णशैलं शिशुदिनपतनुं राहुदेहं नितान्तं ।
श्रीकान्तावक्षभाङ्गं कमलभववपुर्म्मेघचन्द्रव्रतीन्द्र-
त्रैविद्यस्याखिलाशावलयनिलयसत्कीर्त्तिचन्द्रातपोऽसौ ॥२९॥

मूवत्तारं गुणदिं
भावजनं कट्टि पेट्ट-वेल्लेदर् वृषदि ।
भाविपडे मेघचन्द्र-
त्रैविद्यरदेन्तो शान्तरसमं तलेदर् ॥ ३० ॥

मुनिनाथं दशधर्म्मधारिदृढषट्त्रिंशद्गुणं दिव्यबा-
ण-निधानं निनगिच्चु चापमलिनीज्यासूत्रमोरोन्देपू—
विन बाणङ्गलुमयूदे हीननधिकङ्गात्तेपमं माल्पुदा—
अ नयं दर्प्पक मेघचन्द्रमुनियोल् माण्निन्नदोर्द्दर्प्पमं ॥३१॥

श्रवणीयं शब्दविद्यापरिणतिमहनीयं महातर्क्कविद्या—
प्रवणत्वं श्लाघनीयं जिननिगदितसंशुद्धसिद्धान्तविद्या—
प्रवणप्रागल्भ्यमेन्देन्दुपचितपुलकं कीर्त्तिसल् कूर्त्तु विद्व-
न्निवहं त्रैविद्यनामप्रविदितनेसेदं मेघचन्द्रव्रतीन्द्रं ॥ ३२ ॥

क्षमेगीगल् जौवनं तीविदुदतुलतपःश्रीगे लावण्यमीगल्
समेसन्दिर्द्दत्तु तन्नि श्रुतवधुगधिकप्रौढियाय्तो गलेन्द-
न्दे महाविख्यातियं तालिददनमलचरित्रोत्तम भव्यचेतो—
रमणं त्रैविद्यविद्योदितविशदयशं मेघचन्द्र व्रतीन्द्रं ॥३३॥

इदे हंसीवृन्दमीण्टल् बगेदपुदु चकोरीचयं चञ्चुविन्दं
कदुकल् सार्द्दप्पुदोशं जडेयोलिगिरिसलेन्दिर्द्दपसेञ्जेगेरल् ।

पदेदप्पं कृष्णनेम्बन्तेसेदु विसलसत्कन्दलीकन्दकान्तं
पुदिदत्ती **मेघचन्द्र**व्रतितिलकजगद्वर्त्तिकीर्त्तिप्रकाशं ॥३४॥
पूजितविदग्धविबुध-स—
माजं त्रैविद्यमेघचन्द्रव्रतिरा—
राजिसिदं विनमितमुनि—
राजं वृषभगणभगणताराराजं ॥ ३५ ॥
स्तब्धात्मरत्नतनुशर—
लुब्धरने वोगल्वे पोगले जिनशासन-दु—
ग्धाब्धिसुधांशुवनखिल क—
कुद्ववलिमर्क्कीर्त्ति **मेघचन्द्र**व्रतियं ॥ ३६ ॥

तत्सधर्म्मरु ॥

श्री**बालचन्द्र**मुनिराजपवित्रपुत्र.
प्रोद्दसवादिजनमानलतालवित्रः ।
जीयादयं जितमनोजभुजप्रताप:
स्याद्वादसूक्तिशुभगश्**शुभकीर्त्ति**देव. ॥ ३७ ॥
किंवापस्मृतिविस्मृत: किमुफणिग्रस्त· किमुग्रग्रह-
व्यग्रोऽस्मिन्स्तवदश्रुगद्गदवचोम्लानाननं दृश्यते ।
तज्ज्ञाने**शुभकीर्त्ति**देवविदुपा विद्वेपिभापाविप-
ज्वालाजाङ्गुलिकेन जिह्मितमतिर्व्वादीवराकस्त्वयं ॥ ३८ ॥
वनदर्प्पोन्नद्धवौद्ध-चितिधरपविर्यीवन्दनी वन्दनी वन्—
दनेसन्नैयायिकोद्यत्तिमिरतरणियी वन्दनी वन्दनी वन्-
दनेसन्मोमांसकोद्यत्करि-करिरिपु यी वन्दनी वन्दनी वन

दने पो पो वादि पोगेन्दुलिवुद्ध शुभकीर्त्तिद्धकीर्त्तिप्रघोषं॥३९॥
वितथोक्तियल्तजंपशु—
पतिसाङ्गियेनिप्प मूवरुं शुभकीर्त्ति—
व्रतिसन्निधियोल् नामो—
चितचरितरेंताडर्हडितरवादिगलल्लवे ॥ ४० ॥
सिङ्गद सरमं केल्द म–
तङ्गजदन्तलुकि बलुकलल्लदे सभेयोल् ।
पोङ्गि शुभकीर्ति-मुनिपनो—
लेङ्गल नुडियल्के वादिगलोन्तेलदेयें ॥ ४१ ॥
पो साल्वुदु वादि वृथा–
यासं विबुधोपहासमनुमनोप—
न्यासं निन्नीतेथे—
वासं संदपुदे वादिवज्राङ्कुशनोल् ॥ ४२ ॥

गङ्गण्णन लिखित ॥ सेवणुबक्षरदेव रूवारिरामोजन भग दासोज कण्डरिसिद ॥

(उत्तरमुख)

त्रैविद्ययोगीश्वरमेघचन्द्रस्याभूत्प्रभाचन्द्र-
मुनिस्सुशिष्यः ।
शुम्भद्व्रताम्भोनिधिपूर्णचन्द्रो निर्द्धूतदण्डत्रितयो विशल्यः ।४३।
त्रैविद्योत्तममेघचन्द्रसुतपःपीयूषवारासिजः
सम्पूर्णोत्तयवृत्तनिर्म्मलतनुःपुष्यद्बुधानन्दनः ।
त्रैलोक्यप्रसरद्यशः शुचिरुचिःयः प्रात्थपोषागमः

सिद्धान्ताम्बुधिवर्द्धनो विजयते ऽपूर्व्वप्रभाचन्द्रमाः ॥४४॥

संसाराम्भोधिमध्योत्तरणकरणयानरत्नत्रयेशः ।

सम्यग्जैनागमार्त्थान्वितविमलमतिःश्रीप्रभाचन्द्रयोगी ॥४५॥

सकलजनविनूतं चारुबोधत्रिनेत्रं

सुकरकविनिवासं भारतीनृत्यरङ्गम् ।

प्रकटितनिजकीर्तिं दिव्यकान्तामनोज्ञं

सकलगुणगणेन्द्रं श्रीप्रभाचन्द्रदेवं ॥ ४६ ॥

तत्सधर्म्मर् ॥

गणधररं श्रुतदोल् चा-

रण-रिपयरनमलचरितदोल् योगिजना-

ग्रणिगणयंन्नदे मिक्कर—

नेणयंम्बुदे वीरणन्दिसैद्धान्तिकराल् ॥ ४७ ॥

हरिहर-हिरण्यगर्भर—

नुरवणियिं गेल्द कामनं दीप्ततपो—

भरदिन्दुरिपिदरंने वि—

स्तरिसदराव्वीरणन्दिसैद्धान्तिकरं ॥ ४८ ॥

यन्मूर्त्तिर्ज्जगतां जनस्य नयने कर्प्पूरपूरायते ।

यत्कीर्त्तिः ककुभां श्रियः कचभरे मल्लीलतान्तायते ॥

.... ।

जेजीयाद्भुविवीरणन्दिमुनिपो राद्धान्तचक्राधिपः ॥४९॥

वैदग्धश्रीवधूटीपतिरन्नगुणालङ्कृतिर्म्मेघचन्द्र-

त्रैविद्यस्यात्मजातो मदनमहिभृतो भेदने वज्रपातः ।

सैद्धान्तव्यूहचूड़ामणिरनुपलचिन्तामणिर्भूजनानां
योऽभूत्सौजन्यरुन्द्रश्रियमवतिमहो **वीरणन्दी** मुनीन्द्रः ॥५०॥

श्री**प्रभाचन्द्र** सिद्धान्तदेवर गुड्डि **विष्णुवर्द्धन** भुज-
७७ **वीरगङ्ग बिट्टिदेव**न हिरियरसि पट्टमहादेवी ॥

शान्तल-देविय सद्गुण-
वन्तेगे सौभाग्यभाग्यवतिगे वचश्री-
कान्तेयुमच्युत [......]
कान्तेयुमेणेयल्लदुलिद सतियर्दोरेये ॥ ५१ ॥

शान्तल-देविय तायि ।

दानमननूनमं कः
केनार्त्थी येन्दु कोट्टु जिननं मनदोल् ।
ध्यानिसुतं मुडिपिदलिन्
नेनेम्बुदो माचिकब्बे येन्दुन्नतियम् ॥ ५२ ॥

सकवर्षं १०६८ नेय **क्रोधनसंवत्सरद् आश्विज-
सुद्ध-दशमी बृहवार** दन्दु धनुलग्नद पूर्व्वाह्लद् आरुघलिगे-
यप्पागल् श्री**मूल**सङ्घद **कोण्डकुन्दा**न्वयद **दे**शिगगणद पुस्तक-
गच्छद श्री **मेघचन्द्र**त्रैविद्यदेवर हिरियशिष्यरप्प श्री **प्रभाचन्द्र**
सिद्धान्तदेवरु स्वर्गस्तरादरु ॥

[इस लेख के प्रथम इकतीस पद्य शिलालेख नं० ४७ (१२७) के प्रथम बत्तीस पदों के समान ही हैं, केवल ४७ वें लेख में पद्य नं० २३ और २४ और इस लेख में पद्य नं० ३० अधिक है । कुन्दकुन्दाचार्य से प्रारम्भ कर मेघचन्द्र व्रती तक की गुरु-परम्परा का वर्णन करने के

पश्चात् लेख में मेघचन्द्र के गुरुभाई बालचन्द्र मुनिराज का उल्लेख है। तत्पश्चात् शुभकीर्ति आचार्य का उल्लेख है जिनके सम्मुख वाद में बौद्ध, मीमांसकादि कोई भी नहीं ठहर सकता था। इसके पश्चात् लेख में मेघचन्द्र त्रैविद्यदेव के शिष्य प्रभाचन्द्र और वीरनन्दि का उल्लेख है। प्रभाचन्द्र आगम के अच्छे ज्ञाता और वीरनन्दि भारी सैद्धान्तिक थे। लेख के अन्तिम भाग में विष्णुवर्द्धन-नरेश की पटरानी शान्तलदेवी की धर्मपरायणता का भी उल्लेख है। वे प्रभाचन्द्र की शिष्या थीं। प्रभाचन्द्रदेव का स्वर्गवास शक स० १०६८ आसोज सुदि १० बृहस्पतिवार को हुआ। यह लेख उन्हीं का स्मारक है।]

५१ (१४१)

उसी स्थान के द्वितीय मण्डप में प्रथम स्तम्भ पर

(शक स० १०४१)

(पूर्वमुख)

श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छनं।
जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनं ॥ १ ॥

सकल-जन-विनूतं चारु-बोध-त्रिनेत्रं
सुकरकविनिवासं भारतीनृत्यरङ्गं।
प्रकटितनिजकीर्त्तिर्दिव्यकान्तामनोज
सकलगुणगणेन्द्रं श्रीप्रभाचन्द्रदेव ॥ २ ॥

अवर गुड्डनेन्तप्पनेन्दडे ॥

स्वस्ति समस्तभुवनजनवन्द्यमानभगवदर्हत्सुरभिगन्धि-गन्धोदककणव्यक्तमुक्तावलीकृतोत्तंशहंस सुजनमनःकमलिनी-राजहंस महाप्रचण्डदण्डनायक। शत्रुभयदायक। प्रतिहित

प्रकारन् । एकाङ्गवीर । सङ्ग्रामराम । साहसभीम । मुनिजन-विनयजनबुधजनमनस्सरोवरराजहंसननूनदानाभिनवश्रेयांस । जिनमतानुप्रेक्षाविचक्षण । कृतधर्म्मरक्षण । दयारसभरितभृङ्गार । जिनवचनचन्द्रिकाचकोरनुमप्प श्रीमतु बलदेवदण्डनायकनेने नेगर्दे ॥

पलरुं मुन्निल पुण्यदोन्दोदविनि भाग्यके पक्कादोडं
चलदि तेजदिनोल्पिनि गुणदिनादौदार्य्यदिं धैर्य्यदि ।
ललनाचित्तहरोपचारविधियिं गांभीर्य्यदि सौर्य्यदि
बलदेवङ्गे समानमप्परोलरे मत्तन्यदण्डाधिपरु ॥ ३ ॥

बलदेवदण्डनायक—
नलङ्घ्यभुजबलपराक्रमं मनुचरितं ।
जलनिधिवेष्टितधात्री—
तलदोलु समनारो मन्त्रिचूडामणियोलु ॥ ४ ॥

आ महानुभावनर्द्धाङ्गलक्ष्मियेन्तप्पलेन्दडे ॥

सतिरूपमल्तु नोर्प्पडे
क्षितियोल् सौभाग्यवतियनुन्नतमतियं ।
पतिहितेयं गुणवतियं
सततंकीर्त्तिपुदु बाचिकब्बेयं भुवनजनं ॥ ५ ॥

अवर्गों सुपुत्रर्प्पुट्टिद—
रवनितलं पोगले रामलक्ष्मीधर र-
न्तवरिर्व्वर्ग्गुणगणदिं
रवितेज न्नागदेवनुं सिङ्गणनुं ॥ ६ ॥

(पश्चिम मुख)

अन्तरोलगे ॥

देरेयारी भुवनङ्गलोलु दिटके केलु सम्यक्त्वदोलु सत्यदोलु
परमश्रीजिनपूजेयोलु विनयदोलु सौजन्यदोलु पेम्पिनोलु ।
परमोत्साहदे मार्प्पदानदेडेयोलु सौचव्रताचारदोलु
निरुतं नोप्पंडे नागदेवने वल धन्यंपेरर्द्धन्यरे ॥ ७ ॥

अन्तेनिप नागदेवन
कान्ते मनोरमणसकलगुणगणधरणी—
कान्तेगवधिकं नोप्पंडे
कोन्तिय देरेयेनिसि नागियक्कं नेगरद्लु ॥ ८ ॥

अन्तवरिर्व्वर तनयं
मन्ततमखिलोर्व्वियोलगे जसवेसेविनेगं ।
चिन्तितवस्तुवनीयलु
चिन्तामणिकामधेनुवेनिपं वल्ल ॥ ९ ॥

एन्तेन्तु नोप्पंडं गुण—
वन्तं कलिसुचिदयापरं सत्यविदं ।
भ्रान्तेनेनुतं वुधर—
श्रान्तं कीर्त्तिपुदु धात्रियोलु वल्लणनं ॥ १० ॥

आतननुजाते भुवन—
ख्यातियनेरे तालिद दानगुणदुन्नतियिं ।
सीतादेविगवधिकं
भूतलदोलगेच्चियक्कनेनेमेच्चदरारु ॥ ११ ॥

आजगज्जननि योब्बुट्टिदं ॥

भाविसिपञ्चपदङ्गल—

नोवदे परिदिक्कि मोहपासद तोडरं ।

देव-गुरु-सन्निधानद—

ला विभु बलदेवनमरगतियं पडेद ॥ १२ ॥

सकवर्ष १०४१नेय सिद्धार्थि[1] संवत्सरद मार्ग्गशिर-शुद्धपाडिव सोमवारदन्दु मोरिङ्गेरेय तीर्त्थदलु संन्यसनविधियि मुडिपिद ॥

आतन जननि नागियक्कनु एचियक्कनु परोच्चविनयक्के कब्बप्पुनाडोल् ओम्मालिगेय हलुपट्टसालेय माडिसि तम्म गुरुगल् प्रभाचन्द्रसिद्धान्त-देवर काल कर्च्चिधारापूर्व्वकं माडिकोट्टरु आरेयकेरेयुमं आ केरेय मूडण देसेयलु खण्डुग बेद्दले ॥

[इस लेख में किसी बल्ल व बल्लण नामक धर्मवान् पुरुप के संन्यासविधि से शरीर त्याग करने पर उसकी माता और भगिनी द्वारा उसकी स्मृति में एक पट्टशाला (वाचनालय) स्थापित करने और उसके चलाव के लिए कुछ ज़मीन दान करने का उल्लेख है। बल्लण के वंश का यह परिचय दिया गया है कि वह एक बड़े पराक्रमी दण्डनायक बलदेव और उनकी पत्नी बाचिकब्बे का पौत्र और धर्मवान् नागदेव और उसकी स्त्री नागियक्क का पुत्र था। उसकी भगिनी का नाम एचियक्के था। बल्लण ने शक सं० १०४१ मगसिर सुदि १ सोमवार को शरीर त्याग किया। इस के पश्चात् उक्त दान दिया गया और यह लेख लिखा गया। लेख के द्वितीय पद्य में प्रभाचन्द्रदेव का उल्लेख है।]

---

१ सिद्धार्थ।

लेख में यह सम्वत् सिद्धार्थि सम्वत्सर कहा गया है पर मिलान करने से शक सं० १०४१ विकारी और शक सं० १०६१ सिद्धार्थी पाया जाता है। लेख में सम्वत की भूल है।

५२ (१४२)

उसी मण्डप में द्वितीय स्तम्भ पर

(शक सं० १०४१)

(पूर्व्वमुख)

श्रीमत्परमगम्भीर-स्याद्वादामोघलाञ्छनं।

जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनं ॥ १ ॥

स्वस्त्यनवरतप्रबलरिपुबलविषमसरावनीमहामहारिसंहारक-रणकारणप्रचण्डदण्डनायकमुखदर्प्पणकर्णजपकुभृत्कुलिश जिन-धर्म्महर्म्यमाणिक्यकलश मलयजमिलितकाश्मीरकालागरुधूपधूम-ध्यामलीकृतजिनार्च्चनागार। निर्व्विकार मदनमनोहराकार। जिनगन्धोदकपवित्रीकृतोत्तमाङ्ग वीरलक्ष्मीभुजङ्गनाहाराभयभैष-ज्यशास्त्रदानविनोद जिनधर्म्मकथाकथनप्रमोदनुमप्प श्रीमतुबल-देवदण्डनायकनेनेनेगर्द ॥

स्थिरनं बाप्पमराद्रियिन्दवधिकं गम्भीरने बाप्पु सा-

गरदिन्दग्गलमन्तु दानियं सुरोर्व्वीजकं मारण्हलम्।

सुरराजङ्गेण येन्दु कीर्त्तिपुदुकय्कोण्डर्फार सन्ततं

धरेयेल्लंबलदेवमात्यननिलालोकैकविख्यातनं ॥ २ ॥

बलदेव दण्डनायक—

नलङ्घ्यभुजबलपराक्रमं मनुचरितं।

जलनिधिवेष्टितधात्री—
तलदोलु समनारो मन्त्रिचूडामणियोलु ॥ ३ ॥
पलरुं मुन्निन पुण्यदोन्दोदविनिंभाग्यकेपकादोडं
चलदिं तेजदिनोल्पिनिं गुणदिनादौदार्य्यदिंधैर्य्यदि ।
ललनाचित्तहरोपचारविधियिं गाम्भीर्य्यदिं सौर्य्यदिं
वलदेवङ्गे समानमप्परोलरे मत्तन्यदण्डाधिपरु ॥ ४ ॥
आ वलदेवङ्ग मृग—
शावेचणेयेनिप वाचिकव्वे गवखिलो—
र्व्वीवन्धु पुट्टिदं गुण—
लोवरनदटलेव सिङ्गिमय्यनुदारं ॥ ५ ॥
जिनधर्म्माम्बरतिग्मरोचिसुचरित्रं भव्यवंशोत्तम
सिष्टिनिधानं मन्त्रिचूडामणि वुधविनुतं गोत्रवंशाम्बरार्कं ।
वनिताचित्तप्रियं निर्म्मलननुपमनत्युत्तमं कूरे कूर्प्पं
विनयाम्भोराशि विद्यानिधिगुणनिलयं धात्रियोलिसङ्गि-
मय्यं ॥ ६ ॥

(पश्चिममुख)

जिनपदभक्तनिष्टजनवत्सलनाश्रितकल्पभूरुहं
मुनिचरणाम्बुजातयुगभृङ्गनुदारननूनदानि म—
त्तिन पुरुषर्ग्गे पोलिपुददार्होरियेम्बिनेगं नेगर्द्दनी—
मनुजनिधाननेन्दु पोगल्गुं धरे पेर्ग्गडे सिङ्गिमय्यन ॥ ७ ॥
एने नेगल्द सिङ्गिमय्यन
वनिते मनोरथन लक्ष्मियेनिपलु रूपि ।

जनविनुतं सिरिय देविय—
ननुनयदि पोगल्वुदखिल भूतलवेल्लं ॥ ८ ॥

वचन ॥ आ महानुभावनवसानकालदोलु ॥

परमश्री जिनपादपङ्करुहमं सद्भक्तियिं तालिद नि—
र्भरदि पञ्चपदङ्गलं नेनेयुनं दुर्म्मोहसन्दोहमं ।
त्वरितं खण्डिसुतं समाधिविधियिं भव्याब्जिनीभास्करं
निरुतं पेर्गडे सिङ्गिमय्यनमरेन्द्रावासमं पोर्दिदं ॥ ९ ॥

स्वस्ति समधिगतपञ्चमहाकल्याणाष्ट-महाप्रातिहार्य्य-चतुस्त्रिंश-दतिशयविराजमान-भगवदर्हत्परमेश्वर-परमभट्टारक - मुखकमल-विनिर्ग्गतसदसदादिवस्तुस्वरूपनिरूपणप्रवण - राद्धान्तादिसकल-शास्त्रपारावारगपरमतपश्चरणनिरतरुमप्प श्रीमन्मण्डलाचार्य्य प्रभाचन्द्रसिद्धान्तदेवर गुड्डि नागियक्क सिरियब्बेयुं सकवर्ष १०४१ नेय सिद्धार्त्थसम्वत्सरद कार्त्तिक सुद्ध द्वादस सोमवा-रदन्दु महापूजेयं माडिनिशिधियं निरिसिदरु ॥

[महाधर्मवान्, कीर्त्तिवान् और बलवान् दण्डनायक बलदेव और उसकी धर्मपत्नी बाचिकब्बे का पुत्र सिङ्गिमय हुआ जो उदारचरित और गुणवान् था। उसकी धर्मपत्नी का नाम सिरिय देवी था। सिङ्गिमय ने समाधिमरण कर स्वर्गलोक प्राप्त किया। मण्डलाचार्य प्रभाचन्द्र के शिष्य सिरियब्बे और नागियक्क ने सिङ्गिमय्य की स्मृति में शक सं० १०४१ कार्त्तिक सुदि १२ सोमवार को यह निषद्या निर्माण कराई]

[नोट—जैसा कि लेख नं० ४१ के नोट में कहा जा चुका है शक सं० १०४१ सिद्धार्थी नहीं था जैसा कि इस लेख में भी मूल से कहा गया है]

५३ (१४३)

उसी मंडप में तृतीय स्तम्भ पर—

(शक सं० १०५०)

(पूर्वमुख)

श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छनम् ।
जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनम् ॥ १ ॥

श्रीमद् यादववंशमण्डनमणिः क्षोणीशरक्षामणि-
र्लक्ष्मीहारमणिः नरेश्वरशिरःप्रोत्तुङ्गशुम्भन्मणिः ।
जीयान्नीतिपथेक्षदर्प्पणमणिः लोकैकचूडामणि
श्श्रीविष्णुर्व्विनयार्च्चितो गुणमणिः सम्यक्तचूड़ामणिः ॥ २ ॥

एरेदमनुजङ्गे सुर-भू-
मिरुहं शरणेन्दवङ्गे कुलिशागारं ।
परवनितेगनिलतनयं ।
धुरदोलु पेणर्देङ्गे मृत्तु विनेयादित्यं ॥ ३ ॥

एने तानुं केरे देगुलङ्गलेनितानुं जैनगेहङ्गल-
न्तेनेतुं नार्कलनूर्गलं प्रजेगलं सन्तोषदिं माडिदं ।
विनयादित्यनृपालपोय्सलने सन्दिर्द्दा वलिन्द्रङ्गे मे-
लेने पेम्पं पोगलवन्ननात्रनो महागम्भीरनं धीरनं ॥ ४ ॥

इट्टिगेगेन्दगल्द कुलिगल्केरेयादवु कल्लुगे गोण्ड पेर्-
व्वेट्टु धरातलक्के सरियादवु सुण्णद भण्डि बन्द पे-

र्व्वट्टेये पञ्चमादुवेन्ने माडिसिदं जिनराजगेहमं
नेट्टने पोय्सलेसनेने वण्णि पराम्मले राजराजनं ॥ ५ ॥
कन्दं ॥ आ पोय्सल भूपङ्गे म-
हीपाल कुमारनिकरचूडारत्नं ।
श्रीपति-निज-भुज-विजय-म-
हीपति जनियिसिदनदटनेरेयङ्गनृप ॥ ६ ॥
वृत्त ॥ विनयादित्यनृपालनात्मजनिलालोकैककल्पद्रुम
मनुमार्ग्ग जगदेकवीरनेरेयङ्गोर्व्वीश्वरं मिक्कना-
तनपुं रिपुभुमिपालकमदस्सम्मर्दनं विष्णुव-
र्द्धन भूपं नेगल्दं धरावलेयदोल् आराजकण्ठीरवं ॥ ७ ॥
कन्दं ॥ आ नेगल्देरेयङ्ग नृपा—
लन सूनुव्वहद्वैरिमर्दनं सकलधरि—
त्री नाथनर्त्थि जनता—
भानुसुतं विष्णुभूपनुदयं गेय्दं ॥ ८ ॥
अरिनरपसिरास्फालन—
करनुद्धतवैरिमण्डलेश्वरमदसं—
हरणं निजान्वयैका—
भरणं श्री विट्टि देवनी वरदेव ॥ ९ ॥

स्वस्ति समधिगतपञ्चमहाशब्द महामण्डलेश्वरं। द्वारावतीपुरवराधीश्वर। यादवकुलाम्बरद्युमणि। सम्यक्त्वचूडामणि। मलपरोलगण्ड। चलकेचलु गण्डन्। आलिमुन्निरिव। सौर्य्येमं मेरे व। तलकाडुगोण्ड। गण्डप्रचण्ड। पट्टिपेरुमाल-

निजराज्याभ्युदयैकरचणदचक। अविनयनरपालकजनशिचक।
चक्रगोट्ट वनदावानलन्। अहितमण्डलिककालानल। तोण्ड-
मण्डलिकमण्डलप्रचण्डदोर्व्वानल। प्रबलरिपुबलसंहरणकारण।
विद्विष्टमण्डलिकमदनिवारणकरण। नोलम्बवाडिगोण्ड।
प्रतिपचनरपाललक्ष्मियनिर्कुलिगोण्ड। तप्पं तप्पुव। जय
श्रीकान्तेयनप्पुव। कूरेकूर्प्पं सौर्य्यसं तेर्प्पं। वीराङ्गना-
लिङ्गितदचिणदोर्द्दण्ड। नुडिदन्ते गण्ड। अदियमनहृदय-
शूल। वीराङ्गनालिङ्गित लोल। उद्धताराति कञ्जवनकुञ्जर।
सरणागतवज्रपञ्जर। सहजकीर्त्तिध्वज। सङ्ग्रामविजयध्वज।
चेङ्गिरेय मनोभङ्ग। वीरप्रसङ्ग। **नरसिङ्गवर्म्म**निर्म्मूलनं। कल-
पालकालानलं। हानुङ्गलु गोण्ड। चतुर्म्मुख गण्ड। चतुरचतु-
र्म्मुखन्। आहवषण्मुख। सरस्वतीकर्णावतंसन्। उन्नतविष्णुवंस।
रिपुहृदयसेल्ल। भीतरंकोल्ल। दानविनोद। चम्पकामोद।
चतुस्समयसमुद्धरण। गण्डराभरण। विवेकनारायण। वीरपारा-
यण। साहित्यविद्याधर। समरधुरन्धर। पोयूसलान्वयभानु।
कविजनकामधेनु। कलियुगपार्त्थ। दुष्टर्गोधूर्त्त। सङ्ग्रामराम।
साहसभीम। हयवत्सराज। कान्तामनोज। मत्तगजभगदत्तन्।
अभिनवचारुदत्त। नीलगिरिसमुद्धरण। गण्डराभरण। कोङ्ग-
रमारि। रिपुकुलनलप्रहारि। तेरेयुरनलेव। कोयतूरतुलिव।
हेञ्जेरुदिसापट्ट। सङ्ग्रामजत्तलट्ट। पाण्ड्यनंबेङ्कोण्ड। उच्चङ्गि
गोण्ड। एकाङ्गवीर। सङ्ग्रामधीर। पोम्बुच्चनिर्द्धाटण। साविमले
निर्लोटण। वैरिकालानलन्। अहितदावानल। शत्रुनरपाल-

दिशापट्ट मित्रनरपालललाटपट्ट । घट्टवनलिव । तुलुवर सेलेव । गोयिन्दवाडिभयङ्करन् । अहितबलसङ्कर । रोद्दवतुलिव । सिलगरं पिडित्र । रायरायपुरसूरेकार । वैरिभङ्गार । वीरनारायण । सौर्य्यपारायण । श्रीमतुकेशवदेवपादाराधक । रिपुमण्डलिकसाधकाद्यनेकनामावलीसमालङ्कृतनुं गिरिदुर्गवनदुर्गजलदुर्गाद्यनेकदुर्गङ्गलनश्रमदिं कोण्ड चण्डप्रतापदिं गङ्गवाडितोम्भत्तरु-सासिरमुमं लोक्किगुण्डिवर मुण्डिगे साध्यम्माडि । मत्तं ॥

वृत्त—एलेयोलदृष्टरनुद्धतारिगल नाटन्दोत्ति बेङ्कोण्डुदो—
र्व्वलदिं देशमनावगं तनगे साध्यं माडिरलु गङ्गम—
ण्डलमेन्दोलेगे तेत्तु मित्तु बेसनं पूण्दिर्प्पिनं विष्णु पो—
य्सलनिर्द्द सुखदिन्दे राज्यदोदविन्दं सन्ततोत्साहदिं ॥१०॥
एत्तिद नेत्तलत्तलिदिराद-नृपालकरल्कि बल्कि क—
ण्डित्तु समस्तवस्तुगलनालुतनमंसलेपुण्दु सन्ततं ।
सुत्तलुमोलगिप्परेने मुन्निनवर्गमनेकरादव—
र्गत्तलगं पोगर्त्तेगेने वण्णिपनावनो विष्णुभूपनं ॥ ११॥

अन्तु त्रिभुवनमल्ल तलकाडुगोण्ड भुजबलवीरगङ्ग विष्णुवर्द्धन पोय्सलदेवर विजयराज्यमुत्तरोत्तराभिवृद्धिप्रवर्द्धमानमाचन्द्रार्क्कतारं बरं सलुत्तमिरे तत्पादपद्मोपजीवि पिरियरसि पट्टमहादेवि सान्तलदेवी ॥

(दक्षिणमुख)

स्वस्त्यनवरतपरमकल्याणाभ्युदयसहस्रफलभोगभागिनि

द्वितीयलक्ष्मीलक्षणसमानेयुं । सकलगुणगणानूनेयुं । अभिनव रुग्गुमिणीदेवियुं । पतिहितसत्यभावेयुं । विवेकैकबृहस्पतियुं । प्रत्युत्पन्नवाचस्पतियुं । मुनिजनविनेयजनविनीतेयुं । चतुस्समय-समुद्धरणेयुं । व्रतगुणशीलचारित्रान्तःकरणेयुं । लोकैक विख्यातेयुं । पतिव्रताप्रभावप्रसिद्धसीतेयुं । सकलवन्दिजन-चिन्तामणियुं । सम्यक्तचूडामणियुं । उद्वृत्तसवतिगन्ध-वारणेयुं । पुण्योपार्ज्जनकरणकारणेयुं । मनोजराजविजेयपताकेयुं । निजकलाभ्युदयदीपिकेयुं । गीतवाद्यसूत्रधारेयुं । जिनसमयसमु-दितप्राकारेयुं । जिनधर्म्मकथाकथनप्रमोदेयुं । आहाराभयभैषज्य-शास्त्रदानविनोदेयुं । जिनधर्म्मनिर्म्मलेयुं । भव्यजनवत्सलेयुं । जिनगन्धोदकपवित्रीकृतोत्तमाङ्गेयुमप्प ॥

कंद ॥ आ नेगर्द विष्णुनृपन म—
नो-नयन-प्रिये चलालनीलालकि च—
न्द्रानने कामन रतियलु
तानेणे तोणे सरिसमाने शान्तलदेवी ॥ १२ ॥

वृत्त । धुरदोलु विष्णुनृपालकङ्गे विजयश्रीवक्षदोलु सन्ततं
परमानन्ददिनोलु निल्व विपुलश्रीतेजदुद्दानियं ।
वरदिग्भित्तियनेय्दिसलूनेरेव कीर्तिश्रीयेनुतिप्पुंदी
धरेयोलु शान्तलदेविय नेरेये बण्णिप्पण्णानेवण्णिपं ॥ १३ ॥

कलिकाल विष्णुवक्ष—
स्थलदोलुकलिकाललक्ष्मि नेलसिदलेने शा—

न्तलदेविय सौभाग्यम—
नेल गलवण्णि सुवेनेम्बनेवण्णिसुव ॥ १४ ॥

शान्तलदेविगे सद्गु ण—
मन्तेगे सौभाग्यभाग्यवतिगे वचःश्री—
कान्तेयुमगजेयुमच्युत—
कान्तेयुमेणेयल्लदुलिद सतियर्द्दोरेये ॥ १५ ॥

अक्कर ॥ गुरुगलु प्रभाचन्द्रसिद्धान्तदेवरे पेत्ततायि गुणनिधि-
माचिकव्वे

पिरियपेर्ग्गडे मारसिङ्गय्यं तन्दे मावनुं पेर्ग्गडे सिङ्गिमय्य ।
अरसं विष्णुवर्द्धननृपं वल्लभं जिननाथंतनगेन्दु मिष्टदेय्वं
अरसि शान्तलदेविय महिमेयंवण्णिसलुवक्कुमेभूतलदोलु॥१६॥

सकवर्षं १०५० मूरेनेय विरोधिकृत्सम्वत्सरद. चैत्र शुद्धपञ्चमी
सोमवारदन्दु सिवगङ्गेय तीर्थदलु मुडिपि स्वर्ग्गतेयादलु ॥

वृत्त ॥ ई कलिकालदोल् मनुबृहस्पतिबन्दि जनाश्रयं जग—
व्यापितकामधेनुवभिमानि महाप्रभुपण्डिताश्रयं ।
लोकजनस्तुतं गुणगणाभरणं जगदेकदानिय—
व्याकुलमन्त्रियेन्दुपोगल्गुं धरे पेर्ग्गडे मारसिङ्गन ॥ १७ ॥

दोरेयेपेर्ग्गडे मारसिङ्ग विभुविङ्गी कालदोलु [......]
पुरुषार्थङ्गलोलत्युदारतेयोलं धर्म्मानुरागङ्गलोलु ।
हरपादाम्बुजभक्तियोलु नियमदोलु शीलङ्गलोलु तानेनलु
सुरलोकक्के मनोमुदंबेरसु पोदं भूतलं कीर्त्तिसलु ॥ १८ ॥

कन्द ॥ अनुपम-शान्तल देवियु—
मनुनयदिं तन्दे मारसिङ्गय्यनुमिं-
बिने जननि-माचिकब्बेयु—
मिनिबरु मोडनोडने मुडिपि स्वर्गतरादरु ॥ १६ ॥
लेखक बोकिमय्य ।
(पश्चिममुख)
अरसि सुरगतियनेय्‌दिद—
लिरलागेनगेन्दु बन्दु बेलुगोलदल्लु दु—
र्द्धर-सन्यासनदि [न्दं]
परिणते तायि माचिकब्बे तानुं तोरेदल्लु ॥ २० ॥
वृत्त ॥ अरेमगुल्दिर्दकण्मलर्गलोडुव पञ्चपदं जिनेन्द्रनं
स्मरियिसुबोजे बन्धुजनमं बिडिपुन्नति सन्यसकेव
न्दिरलो सेदोन्दुतिङ्गलुपवासदोलिम्बिनेमाचिकब्बे ता
सुरगतिगेय्‌दिदल्लु सकलभव्यरसन्निधियोल्लु समाधियिं ॥२१॥
कन्द ॥ आ मारसिङ्ग मय्यन
कामिनिजिनचरणभक्ते गुणसंयुतं उ-
द्दाम-पतिब्रते पन्दी—
भूमिजनं पोगल्ले माचिकब्बेये नेगल्दल्लु ॥ २२ ॥
जिनपदभक्ते बन्धुजनपूजितेयाश्रितकामधेनुका—
मन सतिगं महासतिगुणाभरणि दानविनोदे सन्ततं ।
मुनिजनपादपङ्करुहभक्ते जनस्तुते मारसिङ्गम—
य्यन सति माचिकब्बे येने कीर्त्तिसुगुं धरे मेच्चिनिश्चलं ॥२३॥

जिननाथं तनगाप्तनागे वलदेवं तन्दे पेत्तव्वे स—
द्वनितामेसरे वाच्चिकव्वे येने तम्मं सिङ्गणं सन्दमान्—
तनदिन्दग्गद माचिकव्वे सुर-लोकक्कोदलेन्देन्दुमे—
दिनियेल्लं पोगलुत्तमिप्पुदेने वण्णिप्पणानेवण्णिपं ॥ २४ ॥

कन्द ॥ पेण्डिर्स्सन्यासनं गोण्डवरोलगिनितंवल्लरारेम्बिनं कै-
कोण्डागलुघोरवीरव्रतपरिणतेयं मेच्चि सन्तोषदिन्दं ।
पाण्डित्य चित्तदोलु तल्तिरे जिनचरणाम्भोजमं भाविसुत्तं
कोण्डाडलुधात्रितन्नं सुरगतिवडेदलुलीलेयिं माचिकव्वे ॥२५॥

दानमननूनमं कः
केनार्त्थी येन्दु कोट्टु जिननं मनदोलु ।
ध्यानिसुतं मुडिपिदलि—
न्नेनेम्चुदो माचिकव्वेयोन्दुन्नतियं ॥२६॥

इन्तु तम्म गुरुगलु **प्रभाचन्द्रसिद्धान्तदेवरं वर्द्धमानदेवरं रविचन्द्रदेवरं** समस्तभव्यजनङ्गल सन्निधियोलु सन्यसनमं कैकोण्डवर पेल्व समाधियं केलुत्त मुडिपिदलु ॥

पण्डितमरणदिनी भू—
मण्डलदोलु माचिकव्वेयन्तेवोलार्कें—
कोण्डिन्तु नेगल्दलरिगल—
खण्डितमं घोर-वीर-सन्यासनम ॥ २७ ॥

अवर वंशावतारमेन्तेन्दडे ॥

कन्द ॥ जिनधर्म्मनिर्म्मलं भ—
व्य-निधानं गुणगणाश्रयं मनुचरितं ।

मुनिचरण-कमल-भृङ्ग
जन-विनुतं **नागवर्म्म**दण्डाधीशं ।। २८ ।।

वृत्त ।। अनुपम-नागवर्म्मनकुलाङ्गने पेम्पिन चन्दिकब्बे स--
ज्जननुते मानिदानिगुणिमिक्कपतिव्रते सीलदिन्दे मे---
दिनिसुतेगं मिगिलुपोगलल्लानरियें गुणदङ्ककार्त्तियं
जिनपदभक्तेयं भुवनसंस्तुतेयं जगदेकदानियं ।।२९।।

अवर्गों सुपुत्रं वुधजन —
निवहक्कार्त्तीव कामधेनु वेनुत्तं ।
भुवनजनं पोगलल्दु मि—
क्कनुदयं गेय्दनुत्तमं **बलदेव** ।।३०।।

वृत्त ।। सकलकलाश्रयं गुणगणाभरणं प्रभु पण्डिताश्रयं
सुकविजनस्तुतं जिनपदाब्जभृङ्गननूनदानिलौ—
किकपरमार्त्थमेम्बेरडुमन्नेरे बल्लनेनुत्ते दण्डना—
यक बलदेवनं पोगल्वुदम्बुधि-वेष्टित-भूरि-भूतलं ।।३१।।

मुनिनिवहक्के भव्यनिकरक्के जिनेश्वर-पूजेगल्गे मि—
क्कनुपमदानधर्म्मदोदविङ्गे निरन्तरमोन्दे मार्गदिं ।
मनेयोलनाकुलं मडुवेयन्दद पाङ्गिनोलुण्वुदेन्दडिं
मनुजनिधाननं पोगल्वने वोगल्वं **बलदेव**मार्त्थन ।।३२।।

स्थिरने मेरु-गिरीन्द्रदिन्दे मिगिले गम्भीरने वाय्पु सा-
गरदिन्दगल मेन्तु दानिये सुरोर्व्वीजक्केमेलु भोगिये ।
सुरराजङ्गेणे येन्दु कीर्त्तिपुदु कय् कोण्डल्करिं सन्ततं
धरेयोल् श्रीबलदेवमांत्यननिलालोकैकविख्यातन ।।३३।।

कन्द ॥ बलदेव-दण्डनायक—

नलङ्घ्य-भुजबल-पराक्रमं मनुचरितं ।

जलनिधिवेष्टितधात्री—

वलदोल्लु समनारो मन्त्रिचूड़ामणियोल्लु ॥२४॥

श्रीमत् चारुकीर्त्तिदेवर गुड्ड लेखकबोकिमय्य वरद विरुदरूवारि-मुखतिलक गङ्गाचारिय तम्म कांवाचारि कण्डरिसिद॥

(उत्तर मुख)

स्वस्त्यनवरतप्रबलरिपुबलविषमसमरावनिमहामहारिसंहार-करणकारण । प्रचण्डदण्डनायकमुखदर्प्पण । कथकमागध-पुण्यपाठककविगमकिवादिवाग्मिजनतादारिद्रसन्तर्प्पण । जिन-समयमहागगनशोभाकरदिवाकर । सकलमुनिजननिरन्तरदान-गुणाश्रयश्रेयांस । सरस्वतीकर्ण्णावतंस । गोत्रपवित्र । पराङ्ग-नापुत्र । बन्धुजनमनोरञ्जन । दुरितप्रभञ्जन । क्रोधलोभानृत-भयमानमदविदूर । गुत्तचारुदत्तजीमूतवाहनसमानपरोपका-रोदार । पापविदूर । जिनधर्म्मनिर्म्मल । भव्यजनवत्सल । जिनगन्धोदकपवित्रीकृतोत्तमाङ्गन् । अनुपमगुणगणोत्तुङ्ग । मुनिचरणसरसिरुहभृङ्ग । पण्डितमण्डलीपुण्डरीकवनप्रसङ्ग । जिनधर्म्मकथाकथनप्रमोदनुं । आहाराभयभैषज्यशास्त्रदानविनो-दनुमप्प श्रीमत् बलदेव दण्डनायकनेने नेगल्द ॥

आ बलदेवङ्ग मृग—

शावेक्षणे यनिप बाचिकब्बेगव खिलो—

र्व्वी-बन्धु पुट्टिदं गुणि—

लोबरनदटलेव सिङ्गिमय्यनुदारं ॥३५॥

वृत्त ॥ जिनपतिभक्तनिष्टजनवत्सलनाश्रितकल्पभूरुहं

मुनिचरणाम्बुजातयुगभृङ्गनुदारननूनदानि म–

त्तिन पुरुषर्ग्गे पोलिसुवडार्द्दोरेयेम्बिनेगं नेगल्दनी-

मनुज निधाननेन्दु पोगल्गुं धरे पेग्गडे सिङ्गिमय्यन ॥३६॥

जिनधर्म्माम्बरतिग्मरोचि सुचरित्रं भव्यवंशोत्तमं सि–

ष्टनिधानं मन्त्रिचिन्तामणि बुधविनुतं गोत्रवंशाम्बरार्क्कं ।

वनिताचित्तप्रियं निर्म्मलननुपमनत्युत्तमं कूरे कूर्प्पं

विनयाम्भोराशि विद्यानिधि गुणनिलयं धात्रियोलिसङ्गिमय्यं ॥

॥ ३७ ॥

कन्द ॥ श्रीयादेवि गुणाग्रणि–

यी युगदोलु दानधर्म्मचिन्तामणि भू–

देविय कोन्ती देविय

दोरेयन्न सिङ्गिमय्यन वधुव ॥ ३८ ॥

स्वस्त्यनवरतपरमकल्याणाभ्युदयसतसहस्रफलभोगभागिनि द्वितीयलक्ष्मीसमानेयुं । सकलकलागमानूनेयुं विवेकैकबृहस्पतियुं मुनिजनविनेयजनविनीतेयुं पतिव्रताप्रभावप्रसिद्धसीतेयुं सम्यक्त चूड़ामणियुं उद्वृत्तसवतिगन्धवारणेयुं आहाराभयभैषज्यशास्त्र दानविनोदेयुं अप्प श्रीमद्विष्णुवर्द्धन-पोय्सलदेवर पिरियरसिपट्ट-महादेवि शान्तलदेवियश्रीबेल्गोलतीर्थदोलु सवतिगन्धवारण जिनालयमं माडिसियिदक्केदेवतापूजेगं रिषिसमुदायकाहारदानक्कं जीर्णोद्धारक्कं कल्कणिनाड मोट्टेनविलेयुमं गङ्गसमुद्रद नडुवयल-

लयय्वत्तुकोलगगर्दैय तोण्टमुमं नाल्वत्तुगधाणपोन्ननिक्कि कट्टिसि चारुगिङ्गे विलसनकट्टमुमं श्रीमद्विष्णुवर्द्धन पोय्सलदेवरं बेडि-कोण्डु सकवर्ष सायिरद नाल्वत्तयूदेनेय शोभकृत्सम्वत्सरद चैत्रशुद्धपडिवबृहस्पतिवारदन्दु तम्म गुरुगलु श्रीमूलसङ्घद देशियगणद पोस्तकगच्छद श्रीमन्मेघचन्द्रत्रैविद्यदेवरशिष्यरप्प प्रभाचन्द्रसिद्धान्तदेवर्गे पादप्रक्षालनं माडि सर्व्वबाधापरिहार-वागि बिट्टदत्ति ॥

वृत्त ॥ प्रियदिन्दिन्तिदनेय्दे काव पुरुषर्गायुं महाश्रीयुम—
केयिदं कायदे काय्व पापिगे कुरुक्षेत्रोर्व्वियोलु वाणरा-
सियोलेक्कोटिमुनीन्द्ररं कविलेयं वेदाढ्यरं कोन्दुदो-
न्दयशं सार्गुमिदेन्दु सारिदपुवी शैलाक्षर सन्ततं ॥३९॥

श्लोक ॥ स्वदत्तां परदत्तां वा यो हरेति वसुन्धरां ।
षष्टिर्वर्षसहस्राणि विष्टायां जायते क्रमिः ॥४०॥

[यह लेख तीन भागों में विभक्त है । आदि से वत्तीसवें पद्य तक इसमें द्वारावती के यादव व शीय पोय्सल नरेश विनयादित्य व उनके पुत्र और उत्तराधिकारी एरेयङ्ग व उनके पुत्र और उत्तराधिकारी विष्णु-वर्द्धन का वर्णन है । विष्णुवर्द्धन बड़ा प्रतापी नरेश हुआ । इसने अनेक माण्डलिक राजाओं को जीतकर अपना राज्य-विस्तार बढ़ाया । इसकी पटरानी शान्तलदेवी जैनधर्मावलम्बिनी, धर्मपरायणा और प्रभा-चन्द्र सिद्धान्तदेव की शिष्या थी । इसने शक सं० १०५० चैत्र सुदि ५ सोमवार को शिवगङ्गे नामक स्थान पर शरीर त्याग किया । शान्तलदेवी के पिता का नाम मारसिङ्गय्य और माता का नाम माचिकब्बे था । इन्होंने शान्तलदेवी के पश्चात् शरीरत्याग किया ।

लेख के दूसरे भाग मे,'जो पद्य २० से ३४ तक जाता है, शान्तल देवी की माता माचिकव्वे का वेल्गोल में आकर एक मास के अनशन व्रत के पश्चात् संन्यास विधि से देहत्याग करने का वर्णन है और पश्चात् उसके कुल का वर्णन है। दण्डाधीश नागवर्म और उनकी भार्या चन्दिकव्वे के पुत्र प्रतापी बलदेव दण्डनायक और उनकी भार्या बाचिकव्वे से ही माचिकव्वे की उत्पत्ति हुई थी। माचिकव्वे ने अपने गुरु प्रभाचन्द्र सिद्धान्तदेव, वर्धमानदेव और रविचन्द्रदेव की साक्षी से संन्यास ग्रहण किया था।

लेख के अन्तिम भाग में बलदेव दण्डनायक और उनके पुत्र सिङ्गिमय्य की प्रशस्ति के पश्चात् शान्तलदेवी द्वारा सवति गन्धवारण नामक जिन मन्दिर निर्माण कराये जाने और उसकी आजीविका आदि के लिये विष्णुवर्द्धन नरेश की अनुमति से कुछ भूमि का दान दिये जाने का उल्लेख है। यह दान मूलसंघ, देशिय गण, पुस्तक गच्छ के मेघचन्द्र त्रैविद्यदेव के शिष्य प्रभाचन्द्र सिद्धान्तदेव को दिया गया था।]

[नोट—लेख में शक सं० १०५० विरोधिकृत् कहा गया है। पर ज्योतिष गणना के अनुसार शक सं० १०५० कीलक व सं० १०५३ विरोधिकृत् सिद्ध होता है। आगे का लेख (५४) शक १०५० कीलक संवत्सर का ही है। दान शोभकृत् (शुभकृत्) संवत् मे दिया गया था जो विरोधिकृत् से आठ वर्ष पूर्व (शक सं० १०४४) में पड़ता है।]

५४ (६७)

पार्श्वनाथ बस्ति में एक स्तम्भ पर

(शक सं० १०५०)

(उत्तरमुख)

श्रीमन्नाथकुलेन्दुरिन्द्र-परिषद्वन्द्यश्रुत-श्री-सुधा--
धारा-धौत-जगत्तमोऽपह-महः-पिण्ड-प्रकाण्डं महत् ।
यस्मान्निर्म्मल-धर्म्म-वार्द्धि-विपुलश्रीर्व्वर्द्धमाना सतां
भर्त्तुर्भ्भव्य-चकोर-चक्रमवतु श्रीवर्द्धमानो जिनः ॥१॥

जीयादर्त्थयुतेन्द्रभूतिविदिताभिख्यो गणी गौतम--
स्वामी सप्तमहर्द्धिभिस्त्रिजगतीमापादयन्पादयोः ।
यद्बोधाम्बुधिमेत्य वीर-हिमवत्कुत्कीलकण्ठाद्बुधा--
म्भोदात्ता भुवनं पुनाति वचन-स्वच्छन्द-मन्दाकिनी ॥२॥

तीर्थेश-दर्शनभवत्रय-हक्सहस्र-विस्रब्ध-बोध-वपुषश्श्रु-
तकेवलीन्द्राः ।
निर्भिन्दतां विबुध-वृन्द-शिरोभिवन्द्यास्फूर्ज्जद्वचः-कुलिशतः
कुमताद्रिमुद्राः ॥३॥

वर्ण्यः कथन्नु महिमा भण भद्रबाहो-
र्म्मोहोरु-मल्ल-मद-मर्द्दन-वृत्तबाहोः ।
यच्छिष्यताप्तसुकृतेन स चन्द्रगुप्त-
श्शुश्रूष्यतेस्म सुचिरं वन-देवताभिः ॥ ४ ॥

वन्द्योविभुर्भुवि न कैरिह **कौण्डकुन्दः**
कुन्द-प्रभा-प्रणयि-कीर्त्ति-विभूषिताशः ।
यश्चारु-चारण-कराम्बुजचञ्चरीक-
श्चक्रे श्रुतस्य भरते प्रयतः प्रतिष्ठाम् ॥ ५ ॥

वन्द्योभस्मक-भस्म-सात्कृति-पटुः पद्मावती-देवता-
दत्तोदात्त-पदस्व-मन्त्र-वचन-व्याहूत-चन्द्रप्रभः ।
आचार्य्यस्स **समन्तभद्र**गणभृद्येनेह काले कलौ
जैनं वर्त्म समन्तभद्रमभवद्भद्रं समन्तान्मुहुः ॥ ६ ॥

चूर्णि ॥ यस्यैवंविधा वादारम्भसंरम्भविजृम्भिताभिव्यक्तय-
स्सूक्तयः ॥

वृत्त ॥ पूर्व्वं पाटलिपुत्र-मध्य-नगरे भेरी मया ताड़िता
पश्चान्मालव-**सिन्धु**-**ठक्क**-विषये **काञ्चीपुरे वैदिशे** ।
प्राप्तोऽहं **करहाटकं** बहु-भटं विद्योत्कटं सङ्कटं
वादार्त्थी विचराम्यहन्नरपते शार्द्दूल-विक्रीडितं ॥ ७ ॥

अवटु-तटमटतिझटिति स्फुट-पटु-वाचाटधूर्ज्जटेरपिजिह्वा ।
वादिनि समन्तभद्रे स्थितवति तव सदसि भूप कास्था-
न्येषां ॥ ८ ॥

योऽसौ घाति-मल-द्विषद्बल-शिला-स्तम्भावली-खण्डन —
ध्यानासिः पटुरर्हतो भगवतस्सोऽस्य प्रसादीकृतः ।
छात्रस्यापि स **सिंहनन्दि**-मुनिना नोचेत्कथं वा शिला-
स्तम्भोराज्य-रमागमाध्व-परिघस्तेनासिखण्डो घनः ॥ ९ ॥

वक्रग्रीव-महामुने-र्दश-शत-ग्रीवोऽप्यहीन्द्रो यथा—
जातं स्तोतुमलं वचोत्रलमसौ किं भग्न-वाग्मि-व्रजं ।
योऽसौ शासन-देवता-बहुमतो ह्री-वक्त्र-वादि-ग्रह—
ग्रीवोऽस्मिन्नथ-शब्द-वाच्यमवदद् मासान्समासेन षट् ॥१०॥

नवस्तोत्रं तत्र प्रसरति कवीन्द्राः कथमपि
प्रणामं वज्रादौ रचयत परन्नन्दिनि मुनौ ।
नवस्तोत्रं येन व्यरचि सकलार्हत्प्रवचन-
प्रपञ्चान्तर्भाव-प्रवण-वर-सन्दर्भ्भ सुभगं ॥ ११ ॥

महिमा स पात्रकेसरिगुरोः परं भवति यस्य भक्त्यासीत्
पद्मावती सहाया त्रिलचण-कदर्थनं कर्त्तुं ॥ १२ ॥

सुमति-देवममुं स्तुतयेन वस्सुमति-सप्तकमाप्ततयाकृतं ।
परिहृतापथ-तत्त्व-पथार्त्थिनांसुमति-कोटि-विवर्त्ति-भवार्त्ति-
हृत् ॥ १३ ॥

उदेत्य सम्यग्दिशि दच्चिणस्या कुमारसेनो मुनिरस्तमापत् ।
तत्रैव चित्रं जगदेक-भानोस्तिष्ठत्यसौ तस्य तथा प्रकाशः ॥१४॥

धर्म्मार्थकामपरिनिर्वृतिचारुचिन्तश्चिन्तामणिःप्रतिनिकेतम-
कारियेन ।
स स्तूयते सरससौख्यभुजा-सुजातश्चिन्तामणिर्म्मुनिवृषा
न कथं जनेन ॥१५॥

चूड़ामणिः कवीनां चूड़ामणि-नाम-सेव्य-काव्य-कविः ।
श्रीवर्द्धदेव एव हि कृतपुण्यः कीर्त्तिमाहर्त्तुं ॥१६॥

चूर्ण्णि ॥ य एवमुपश्लोकितो **दण्डिना** ॥

जह्नोः कन्यां जटाग्रेण बभार परमेश्वरः ।
श्रीवर्द्धदेव सन्धत्से जिह्वाग्रेण सरस्वतीं ॥१७॥

पुष्पास्त्रस्य जयो गणस्य चरणम्भूभृच्छिखा-घट्टनं
पद्भ्यामस्तु **महेश्वरस्त**दपिन प्राप्तुं तुलामीश्वरः ।
यस्याखण्ड-कलावतोऽष्ट-विलसद्दिक्पाल-मौलि-स्खलत्—
कीर्त्तिस्वस्सरितो **महेश्वर** इह स्तुत्य स्स कैस्स्यान्मुनिः
॥ १८ ॥

यस्सप्तति-महा-वादान् 'जिगायान्यानथामितान् ।
ब्रह्मरक्षोऽर्च्चितस्सोऽर्च्यो **महेश्वर**-मुनीश्वरः ॥ १९ ॥

तारा येन विनिर्ज्जिता घट-कुटी-गूढावतारा समं
बौद्धैर्य्यो धृत-पीठ-पीडित-कुदृग्देवात्त-सेवाञ्जलिः ।
प्रायश्चित्तमिवाङ्घ्रि-वारिज-रज-स्नानं च यस्याचरत्
दोषाणां सुगतस्स कस्य विषयो **देवाकलङ्कः**कृती ॥२०॥

चूर्ण्णि ॥ यस्येदमात्मनोऽनन्य-सामान्य-निरवद्य-विद्या-विभवोप-
वर्ण्णनमाकर्ण्यते ॥

राजन्**साहसतुङ्ग** सन्ति वहवः श्वेतातपत्रा नृपाः
किन्तुत्वत्सदृशा रणे विजयिनस्त्यागोन्नता दुर्ल्लभाः ।
त्वद्वत्सन्ति बुधा न सन्ति कवयो वादीश्वरा वाग्मिनो
नाना-शास्त्र-विचारचातुरधियः काले कलौ मद्विधाः ॥२१॥

नमो **मल्लिषेण**-मलधारि-देवाय ॥

(पूर्वमुख)

राजन्सर्व्वारि-दर्प्प-प्रविदलन-पटुस्त्वं यथात्र प्रसिद्ध—
स्तद्वत्ख्यातोऽहमस्यां भुवि निखिल-मदोत्पाटनः पण्डितानां।
नोचेदेषोऽहमेते तव सदसि सदा सन्ति सन्तो महान्तो
वक्तुं यस्यास्ति शक्तिः स वदतु विदिताशेष-शास्त्रो यदि स्यात् ॥
॥ २२ ॥

नाहङ्कार-वशीकृतेन मनसा न द्वेषिणा केवलं
नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्य-बुद्धया मया ।
राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो
बौद्धौघान्सकलान्विजित्य सुगतः पादेन विस्फोटितः ॥२३॥

श्रीपुष्पसेन-मुनिरेव पदम्महिम्नो
देवस्स यस्य समभूत्स भवान्सधर्म्मा ।
श्रीविभ्रमस्य भवनन्ननु पद्ममेव
पुष्पेषुमित्रमिह यस्य सहस्रधामा ॥२४॥

विमलचन्द्र-मुनीन्द्र-गुरोर्ग्गुरु प्रशमिताखिल वादिमदं पदं ।
यदि यथावदवैष्यत पण्डितैर्न्नुतदान्ववदिष्यतवाग्विभोः
॥ २५ ॥

चूर्णि ॥ तथाहि । यस्यायमापादित-परवादि-हृदय-शोकः पत्रा-लम्बन-श्लोकः ॥

पत्रं शत्रु-भयङ्करोरु-भवन-द्वारे सदा सञ्चरन्—
नाना-राज-करीन्द्र-वृन्द-तुरग-व्राताकुले स्थापितम् ।
शैवान्पाशुपतांस्तथागतसुतान्कापालिकान्कापिला—

तुद्दिश्योद्धत-चेतसा **विमलचन्द्रा**शाम्बरेणादरात् ॥२६॥

दुरित-ग्रह-निग्रहाद्भयं यदि भो भूरि-नरेन्द्र-वन्दितम् ।
ननु तेन हि भव्यदेहिनो भजतश्श्रीमुनिमिन्द्र**नन्दिनम्**
॥ २७ ॥

घट-वाद-घटा-कोटि-कोविदः कोविदां प्रवाक् ।
परवादिमल्ल-देवो देव एव न संशयः ॥२८॥

चूर्णि ॥ येनेयमात्म-नामधेय-निरुक्तिरुक्तानाम पृष्टवन्तं **कृष्ण-राजं** प्रति ॥

गृहीत-पक्षादितरः परस्स्यात्तद्वादिनस्ते परवादिनस्स्युः ।
तेषां हि मल्लः **परवादिमल्ल**स्तन्नाममन्नाम वदन्तिसन्तः
॥ २९ ॥

आचार्य्यवर्य्यो यति**रार्य्यदेवो** राद्धान्त-कर्त्ता
ध्रियतां स मूर्ध्नि ।
यस्स्वर्ग्ग-यानोत्सव-सीम्नि कायोत्सर्गस्थितः
कायमुदुत्ससर्ज ॥३०॥

श्रवण-कृत-तृणोऽसौ संयमं ज्ञातु-कामैः
शयन-विहित-वेला-सुप्त-लुप्तावधानः ।
श्रुतिमरभसवृत्योन्मृज्य पिच्छेन शिश्ये
किल मृदु-परिवृत्या दत्त-तत्कीट-वर्त्मा ॥३१॥

विश्वं यश्श्रुत-बिन्दुनावरुरुधे भावं कुशाग्रीयया
बुध्येवाति-महीयसा प्रवचसा बद्धं गणाधीश्वरैः ।
शिष्यान्प्रत्यनुकम्पया कृशमतीनैदं युगीनान्सुगी-

स्तं वाचाच्चर्चत **चन्द्रकीर्त्ति**-गणिनं चन्द्राभ-कीर्त्तिं बुधाः

॥३२॥

सद्धर्म्म-कर्म्म-प्रकृति प्रणामाद्यस्योग्र-कर्म्म-प्रकृति-प्रमोक्षः ।
तत्रास्त्रि **कर्म्म-प्रकृति**न्नमामो भट्टारकं दृष्ट-कृतान्त-पारम्

॥ ३३ ॥

अपि स्व-वाग्व्यस्त-समस्त-विद्यस्त्रैविद्य-शब्देऽप्यनुमन्यमानः ।
श्रीपालदेवः प्रतिपालनीयस्सवा यतस्तत्व-विवेचनी धीः

॥ ३४ ॥

तीर्थ्य श्री**मतिसागरो** गुरुरिला-चक्रं चकार स्फुर-
ज्ज्योतिः-पीत-तमर्पयः-प्रविततिः पूतं प्रभूताशयः ।
यस्माद्दू रि-परार्द्ध-पावन-गुण-श्रीवर्द्धमानोल्लस-
द्रन्नोत्पत्तिरिला-तलाधिप-शिरश्शृङ्गारकारिण्यभूत् ॥३५॥
यत्राभियोक्तरि लघुर्ल्लघु-धाम-सोम-सौम्याङ्गभृत्स च भवत्यपि-

भूति-भूमिः ।

विद्या-धनञ्जय-पद विशदंदधानो जिष्णु स एव हि महा-

मुनि**हेमसेनः** ॥३६॥

चूर्णि ॥ यस्यायमवनिपति-परिषदि निग्रह-मही-निपात-भीति-
दुस्थ-दुर्गर्व्व-पर्व्वतारूढ़-प्रतिवादिलोकः प्रतिज्ञाश्लोक. ॥

तर्क्के व्याकरणे कृत-श्रमतया धीमत्तयाप्युद्धतो
मध्यस्थेषु मनीषिषु क्षितिभृतामग्रे मया स्पर्द्धया ।
यः कश्चित्प्रतिवक्ति तस्य विदुषो वाग्मेय-भङ्ग परं
कुर्व्वेऽवश्यमिति प्रतीहि नृपतेहे **हेमसेनं** मतं ॥३७॥

हितैषिणां यस्य नृणामुदात्त-वाचा निवद्धा हित-रूप-सिद्धिः।
वन्द्यो **दयापाल**-मुनिः स वाचा सिद्धस्सताम्मूर्द्धनि यः
प्रभावैः ॥ ३८ ॥

यस्य श्री**मतिसागरो** गुरुरसौ चञ्चद्यशश्चन्द्रभूः
श्रीमान्यस्य स **वादिराज**-गणभृत्स ब्रह्मचारी विभोः।
एकोऽतीव कृती स एव हि **दयापाल**व्रती यन्मन—
स्यास्तामन्य-परिग्रह-ग्रह-कथा स्वे विग्रहे विग्रहः ॥३९॥
त्रैलोक्य-दीपिका वाणी द्वाभ्यामेवोदगादिह।
जिनराजत एकस्मादेकस्मा **द्वादिराजतः** ॥४०॥
आरुह्याम्बरमिन्दु-बिम्ब-रचितौत्सुक्यं सदा यद्यश-
श्छत्रं वाक्चमरीज-राजि-रुचयोऽभ्यर्ण च यत्कर्ण्णयोः।
सेव्यःसिंहसमर्च्च्य-पीठ-विभवः सर्व्व-प्रवादि-प्रजा-
दत्तोच्चैर्जयकार-सार-महिमाश्री**वादिराजो**विदां ॥४१॥
चूर्ण्णि ॥ यदीय-गुण-गोचरोऽयं वचन-विलास-प्रसरः कवीनां।
नमोऽर्हते ॥

(दक्षिणमुख)

श्रीमच्चालुक्य-चक्रेश्वर-जयकटके वाग्वधू-जन्म-भूमौ
निष्काण्डण्डिण्डिमः पर्य्यटति पटु-रटो **वादिराज**स्य
जिष्णोः।

जह्यु द्वद्वाद-दर्प्पो जहिहि गमकता गर्व्व-भूमा जहाहि
व्याहारेर्ष्यो जहीहि स्फुट-मृदु-मधुर-श्रव्य-काव्यावलेपः
॥ ४२ ॥

पाताले व्याल-राजो वसति सुविदितं यस्य जिह्वा-सहस्रं
निर्ग्गन्ता स्वर्गतोऽसौ न भवति धिषणो वज्रभृद्यस्यशिष्यः ।
जीवेतान्तावदेतौ निलय-वल-वशाद्वादिनः केऽत्रनान्ये
गर्व्वं निर्म्मुच्य सर्व्वं जयिनमिन-सभे **वादिराजं** नमन्ति
॥ ४३ ॥

वाग्देवी सुचिरप्रयोग-सुदृढ़-प्रेमाणमप्यादरा-
दादत्ते मम पार्श्वतोऽयमधुना श्री**वादिराजो** मुनिः ।
भो भो पश्यत पश्यतैप यमिनां किं धर्म्म इत्युच्चकै-
रब्रह्मण्य-पराः पुरातनमुनेर्व्वाग्वृत्तयः पान्तु वः ॥४४॥
गङ्गावनिश्वर-शिरो-मणि-बद्ध-सन्ध्या-रागोल्लसच्चरण-चारु-
नखेन्दु-लक्ष्मीः ।
श्रीशब्द-पूर्व्व-विजयान्त-विनूत-नामा धीमानमानुष-गुणोऽ-
स्ततमः प्रमांशुः ॥४५॥

चूर्णि ॥ स्तुतो हि स भवानेष श्री**वादिराज**-देवेन ॥
यद्विद्या-तपसोः प्रशस्तमुभयं श्री**हेमसेने** मुनौ
प्रागासीत्सुचिराभियोग-बलतो नीतं परामुन्नतिं ।
प्रायः श्रीविजये तदेतदखिलं तत्पीठिकायां स्थिते
सङ्क्रान्तं कथमन्यथानतिचिराद्विद्येदृगीदृक् तपः ॥४६॥
विद्योदयोऽस्ति न मदोऽस्ति तपोऽस्ति भास्व-
न्नोग्रत्वमस्ति विभुतास्ति न चास्ति मानः ।
यस्यश्रये **कमलभद्र**-मुनीश्वरन्तं
यः ख्यातिमापदिह शाम्यदयैर्ग्गुणौघैः ॥४७॥

स्मरण-मात्र-पवित्रतमं मनो भवति यस्य सतामिह तीर्त्थिनां।
तमतिनिर्म्मलमात्म-विशुद्धये **कमलभद्र**सरोवरमाश्रये
॥ ४८ ॥

सर्व्वाङ्गैर्य्यमिहालिलिङ्ग सुमहाभागं कलौ भारती
भास्वन्तं गुण-रत्न-भूषण-गणैरप्यग्रिमं योगिनां।
तं सन्तस्तुवतामलङ्कृत-**दयापाला**भिधानं महा-
सूरिं भूरिधियोऽत्र पण्डित-पदं यत्रैव युक्तं स्मृताः ॥४९॥

विजित-मदन-दर्प्पः श्री**दयापाल**देवो
विदित-सकल-शास्त्रो निर्जिताशेषवादी।
विमलतर-यशोभिर्व्याप्त-दिक्-चक्रवालो
जयति नत-महीभृन्मौलि-रत्नारुणाङ्घ्रिः ॥५०॥

यस्योपास्य पवित्र-पाद-कमल-द्वन्द्वन्नृपः **पोय्सलो**
लक्ष्मीं सन्निधिमानयत्स **विनयादित्यः** कृताज्ञाभुवः।
कस्तस्यार्हति **शान्तिदेव**-यमिनस्सामर्त्थ्यमित्थं तथे-
त्याख्यातुं विरलाः खलु स्फुरदुरु-ज्योतिर्दृशा स्तादृशाः ॥५१॥

स्वामीति **पाण्ड्य**-पृथिवी-पतिना निसृष्ट-
नामाप्त-दृष्टि-विभवेन निज-प्रसादात्।
धन्यस्स एव मुनिरा**हवमल्ल**भूभु—
गास्थायिका-प्रथित-शब्द-**चतुर्म्मुखाख्यः** ॥५२॥

श्रीमुल्लूर-विदूर-सारवसुधा-रत्नं स नाथो गुणो
नाल्लूणेन महीक्षितागुरु-महःपिण्डशिरो-मण्डनः।

आराध्यो गुणसेन-पण्डित-पतिस्स स्वास्थ्यकामैर्ज्जनै
यत्सूक्तागद-गन्धतोऽपि गलित-ग्लानिं गतिं लम्भिताः ॥५३॥

वन्दे वन्दितमादरादहरहस्स्याद्वाद-विद्या-विदां
स्वान्त-ध्वान्त-वितान-धूनन-विधौ भास्वन्तमन्यं भुवि ।
भक्त्या त्वाजितसेन मानतिकृतां यत्सन्नियोगान्मनः—
पद्मं सद्म भवेद्विकास-विभवस्योन्मुक्त-निद्रा-भरं ॥५४॥

मिथ्या-भाषण-भूषणं परिहरेतौद्धत्य...न्मुञ्चत
स्याद्वादं वदतानमेत विनयाद्वादीभ-कण्ठीरवं ।
नो चेत्तद्गु.. गर्ज्जित-श्रुति-भय-भ्रान्ता स्थ यूयं यत-
स्तूर्ण्णं निग्रह-जीर्ण्णकूप-कुहरे वादि-द्विपाः पातिनः ॥५५॥

गुणाः कुन्द-स्पन्दोड्डमर-समरा वगमृत-वाः—
प्लव-प्राय-प्रेयः-प्रसर-सरसा कीर्त्तिरिव सा ।
नखेन्दु-ज्योत्स्नाङ्घ्रेन्नृप-चय-चकोर-प्रणयिनी
न कासां श्लाघानां पदमजितसेन व्रतिपतिः ॥५६॥

सकल-भुवनपालानम्र-मूर्द्धावबद्ध—
स्फुरित-मुकुट-चूडालीढ-पादारविन्दं ।
मदवदखिल-वादीभेन्द्र-कुम्भ-प्रभेदी
गणभृदजितसेनो भाति वादीभसिंहः ॥५७॥

चूर्ण्णि ॥ यस्य संसार-वैराग्य-वैभवमेवंविधास्स्ववाच स्सूचयन्ति ।

प्राप्तं श्रीजिनशासनं त्रिभुवने यद्दुर्ल्लभं प्राणिनां
यत्संसार-समुद्र-मग्न-जनता-हस्तावलम्बायितं ।

यत्प्राप्ताः परनिर्व्यपेक्ष-सकल-ज्ञान-श्रियालङ्कृता-
स्तस्मात्किं गहनं कुतो भयवशः कावात्र देहे रतिः ॥५८॥
आत्मैश्वर्य्यं विदितमधुनानन्त-बोधादि-रूपं
तत्सम्प्राप्त्यै तदनु समयं वर्त्तते ऽत्रैव चेतः।
त्यक्तान्यस्मिन्सुरपति-सुखे चक्रि-सौख्ये च तृष्णा
तत्तुच्छार्थैरलमलमधी-क्षोभनैर्लोकवृत्तैः ॥५९॥
अजानन्नात्मानं सकल-विषय-ज्ञान-वपुष
सदा शान्तं स्वान्तःकरणमपि तत्साधनतया।
वही-रागद्वेषैः कलुषितमनाः कोऽपि यततां
कथं जानन्नेनं क्षणमपि ततोऽन्यत्र यतते ॥६०॥

(पश्चिममुख)

चूर्णिः॥ यस्य च शिष्ययोः**कविताकान्त-वादिकोला-
हला**परनामधेययोः **शान्तिनाथपद्मनाभ**-पण्डितयोरखण्ड-
पाण्डित्य-गुणोपवर्णनमिदमसम्पूर्णं ॥

त्वामासाद्य महाधियं परिगता या विश्व-विद्वज्जन-
ज्येष्ठाराध्य-गुणाचिरेण सरसा वैदग्ध्य-सम्पद्गिरा।
कृत्स्नाशान्त-निरन्तरोदित-यशश्श्रीकान्त शान्ते न तां
वक्तुं सापि सरस्वती प्रभवति ब्रूमः कथन्तद्वयं ॥६१॥
व्यावृत्त-भूरि-मद-सन्तति विस्मृतेर्ष्या-
पारुष्यमात्त-करुणारुति-कान्दिशीकं।
धावन्ति हन्त परवादिगजास्त्रसन्तः
श्रीपद्मनाभ-बुध-गन्ध-गजस्य गन्धात् ॥६२॥

दीक्षा च शिक्षा च यतो यतीना जैनंतपस्तापहरन्दधानात्
कुमारसेनोऽवतु यच्चरित्रं श्रेयः पथोदाहरणं पवित्रं ॥६३॥
जगद्दरिम-वस्मर-स्मर-मदान्ध-गन्ध-द्विप-
द्विधाकरण-केसरी चरण-भूष्य-भूभृच्छिखः ।
द्वि-षड्-गुण-वपुस्तपश्चरण-चण्ड-धामोदयो
दयेत मम **मल्लिषेण-मलधारिदेवो** गुरुः ॥६४॥
वन्दे तं **मलधारिणं** मुनिपति मोह-द्विषद्-व्याहति-
व्यापार-व्यवसाय-सार-हृदयं सत्संयमोरु-श्रियं ।
यत्कायोपचयीभवन्मलमपि प्रऽरक्त-भक्ति-क्रमा-
नम्राकम्र-मनो-मिलन्मल-मपि-प्रक्षालनैकक्षम ॥६५॥
अतुच्छ-तिमिर-च्छटा-जटिल-जन्म-जीर्णाटवी-
दवानल-तुला-जुपा पृथु-तपः-प्रभाव-त्विषां ।
पदं पद-पयोरुह-भ्रमित-भव्य-भृङ्गावलि-
र्म्ममोल्लसतु **मल्लिषेण**-मुनिराण्मनो-मन्दिरं ॥६६॥
नैर्म्मल्याय मलाविलाङ्गमखिल-त्रैलोक्य-राज्यश्रिये
नैष्किञ्चन्यमतुच्छ-तापहृदयेन्यश्चद्भुताशन्तप ।
यस्यासौ गुण-रत्न-रोहण-गिरिः श्री **मल्लिषेणो** गुरु-
र्व्वन्द्यो येन विचित्र-चारु-चरितै र्द्धात्री-पवित्री-कृता ॥६७॥
यस्मिन्नप्रतिमा क्षमाभिरमते यस्मिन्दया निर्द्दया-
श्लेषा यत्र-समत्वधीः प्रणयिनी यत्रास्पृहा सस्पृहा ।
कामं निर्वृ ति-कामुकस्त्वयमथाप्यग्रेसरो योगिना-
माश्चर्य्याय कथन्ननाम चरितैश्श्री**मल्लिषेणो** मुनिः ॥६८॥

यः पूज्यः पृथिवीतले यमनिशं सन्तस्स्तुवन्त्यादरात्
येनानङ्ग-धनु-र्ज्जितं मुनिजना यस्मै नमस्कुर्व्वते।
यस्मादागम-निर्णयोयमभृतां यस्यास्ति जीवेदया
यस्मिन्श्री **मलधारि**णिव्रतिपतौ धर्म्मोऽस्ति तस्मै नमः ॥६९॥
धवल-सरस-तीर्थे सैष सन्यास-धन्यां
परिणतिमनुतिष्ठं नन्दिमां निष्ठितात्मा।
व्यसृजदनिजमङ्गं भङ्गमङ्गोद्भवस्य
प्रथितुमिव समूलं भावयन्भावनाभिः ॥७०॥

चूर्णि ॥ तेन श्रीमद **जितसेन**-पण्डित-देव-दिव्य-श्री-पाद-कमल-मधुकरी-भूत-भावेन महानुभावेन जैनागमप्रसिद्धसल्लेखना-विधि-विसृज्यमान-देहेन समाधि-विधि-विलोकनोचित-करण-कुतूहल-मिलित-सकल-सङ्घ-सन्तोष-निमित्तमात्मान्तःकरण-परिणति-प्रकाशनाय निरवद्यं पद्यमिदमाशु विरचितं ॥

आराध्यरत्न-त्रयमागमोक्तं विधाय निश्शल्यमशेषजन्तोः
क्षमां च कृत्वा जिनपादमूले देहं परित्यज्य दिवंविशामः ॥७१॥

शाके शून्य-शराम्बरावनिमिते संवत्सरे कीलके
मासेफाल्गुनके तृतीय-दिवसेवारेसितेभास्करे।
स्वातौ श्वेत-सरोवरे सुरपुरं यातो यतीनां पति-
र्म्मध्याह्ने दिवसत्रयानशनतः श्री **मल्लिषेणो** मुनिः ॥७२॥

श्रीमन्मलधारि-देवरगुड्डं विरुद-लेखक-**मदनमहेश्वरं मल्लिनाथं** बरेदं विरुद-रूवारि-मुख-तिलकं गङ्गाचारि-कण्डरिसिदं ॥

५५ (६९)

कत्तिले बस्ती के द्वारे से दक्षिण की ओर एक स्तम्भ पर

(लगभग शक सं० १०२२)

(पूर्वमुख)

श्रीमत्परमगम्भीर-स्याद्वादामोघ-लाञ्छनं ।
जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनं ॥ १ ॥
भद्रमस्तु जिनशासनाय सम्पद्यतां प्रतिविधानहेतवे ।
अन्यवादि-मद-हस्ति-मस्तक-स्फाटनाय घटने पटीयसे ॥ २ ॥

श्लोक ॥ श्रीमतो वर्द्धमानस्य वर्द्धमानस्य शासने ।
श्री कोण्डकुन्द-नामाभून्मूलसङ्घाग्रणी गणी ॥ ३ ॥
तस्यान्वयेऽजनि ख्याते ..देशिके गणे ।
गुणी देवेन्द्रसैद्धान्त-देवो देवेन्द्र-वन्दित. ॥ ४ ॥

तच्छिष्यरु ॥

जयति चतुर्म्मुख-देवो योगीश्वर-हृदय-वनज-वन-दिननाथः ।
मदन-मद-कुम्भि-कुम्भस्थल-दलनोल्बण-पटिष्ठ-निष्ठुर-सिंहः ॥ ५ ॥

योन्दोन्दु दिग्विभागदो—
लोन्दोन्दष्टोपवासदि कायोत्स-
र्गोन्दलेने नेगल्दु तिङ्गल्—
सन्दडे पारिसि चतुर्म्मुखाख्येयनाल्दरु ॥ ६ ॥

अवर्गेलिगं शिष्यराद-
प्रविमल-गुणरमल-कीर्त्ति-कान्ता-पतिगल् ।
कवि-गमकि-वादि-वाग्मि—
प्रवर-नुतच्चतुरसीति-सङ्ख्यं यनुल्लर् ॥ ७ ॥

अवरोलगे **गोपणन्दि** —
प्रवर-गुणरदिष्ट-मुद्राघातयश-
ष्कविता पितामहर्त्तं—
र्कं-वरिष्ठर्व्वेकगच्छदोल् पेसर्व्वेडेदर् ॥ ८ ॥

जयति भुवि **गोपनन्दी** जिनमतलसदमृतजलधितुहिनकरः
देशीयगणग्रगण्यो भव्याम्बुज-षण्ड-चण्डकरः ॥ ९ ॥

वृत्त ॥ तुङ्गयशोभिराममनभिमान-सुवर्ण-धराधरं तपो-
मङ्गल-लक्ष्मि-वल्लभनिलातलवन्दितगोपनन्दिया—
वङ्गमसाध्यमप्प पलकालदनिन्द-जिनेन्द्र-धर्म्ममं
गङ्गनृपालरन्दिन विभूतिय रुढियनेय्दे माडिदं ॥ १० ॥

जिनपादाम्भोज-भृङ्गं मदन-मद-हरं कर्म्म-निर्म्मूलनं वाग्-
वनिता-चित्त-प्रियं वादि-कुल-कुधर-वज्रायुधं चारु-विद्व-
ज्जन-पात्रं भव्य-चिन्तामणि सकल-कला-कोविदं काव्यकश्रा-
सननेन्दानन्ददिन्दं पोगले नेगल्दनी **गोपणन्दि**व्रतीन्द्रं
॥ ११ ॥

मलेयदे **शाङ्ख्य** मट्टविरु **भौतिक** पोङ्गि कडङ्गि बागदि-
र्त्तोलतोलबुद्ध **बौद्ध** तले-दोरदे वैष्णवडङ्गडङ्गु वाग्—

वलद पोडर्प्पु वेड गड चार्व्वक चार्व्वक निम्म दर्प्पम
सलिपनं गोपणन्दि-मुनिपुङ्गवनेम्ब मदान्ध-सिन्धुरं ॥१२॥

(दक्षिण मुख)

तगयल् जैमिनि-तिप्पिकोण्डु परियल् वैशेषिकं पोगदु-
ण्डिडंगयोत्तल् सुगतं कडङ्गि वले-गोयल्क्षपादम्बिडल्—
पुगं लोकायतनेय्दे शाङ्ख्य नडसल्कम्मम्म षट्तर्क्क-वी-
थिगलोलत्तूल्दितुगोपणन्दि-दिगिभ-प्रोद्भासि-गन्धद्विपं ॥
॥ १३ ॥

दिटनुडिवन्यवादि-मुख-मुद्रितनुद्धतवादिवाग्वलो-
द्भट-जय-काल-दण्डनपशब्द-मदान्ध कुवादि-दैत्य-धू-
र्ज्जटि कुटिल-प्रमेय-मद-वादि-भयङ्करनेन्दु दण्डुलं
स्फुट-पटु-घोषदिक्-तटमनेय्दितु वाकु-पटु-गोपनन्दिय
॥१४॥

परम-तपो-निधान वसुधैक-कुटुम्ब जैनशासना-
म्बर-परिपूर्णचन्द्र सकलागम-तत्त्व-पदार्थ-शास्त्र-वि-
स्तर-वचनाभिराम गुण-रत्न-विभूषण गोपणन्दि नि-
न्नोरेगिनिसप्पडं दोरेगलिल्लेणे-गाणेनिला [तला] प्रदोल्
॥ १५ ॥

कन्द ॥ एननंननेले पेल्वेनण्ण स-
न्मान-दानिय गुण-न्नवङ्गलं ।
दान-शक्त्यभिमान-शक्ति वि-
ज्ञान-शक्ति सले गोपणन्दिय ॥१६॥

अवर सधर्म्मरु ॥

श्रीधाराधिप **भोजराज**-मुकुट-प्रोताश्म-रश्मि-च्छटा-
च्छाया-कुङ्कुम-पङ्क-लिप्त-चरणाम्भोजात-लक्ष्मीधवः ।
न्यायाब्जाकरमण्डने दिनमणिश्शब्दाब्ज-रोदोमणि-
स्थेयात्पण्डित-पुण्डरीक-तरणिश्रीमान्**प्रभाचन्द्र**मा: ॥१७॥
श्री**चतुर्म्मुख**-देवानां शिष्योऽधृष्य:प्रवादिभिः ।
पण्डितश्री**प्रभाचन्द्रो** रुद्रवादि-गजाङ्कुशः ॥ १८ ॥

अवर सधर्म्मरु ॥

बौद्धोर्व्वीधर-शम्बः **नय्यायिक**-कञ्ज-कुञ्ज-विधु-बिम्बः ।
श्री**दामनन्दि**विबुधः क्षुद्र-महा-वादि-**विष्णुभट्ट**घरट्ट
॥ १९ ॥

तत्सधर्म्मरु ॥

मलधारिमुनीन्द्रोऽसौ **गुणचन्द्रा**भिधानकः ।
बलिपुरे मल्लिकामोद-**शान्तीश**-चरणार्च्चकः ॥२०॥

तत्सधर्म्मरु ॥

श्री**माघनन्दि**-सिद्धान्त-देवो देवगिरि-स्थिरः ।
स्याद्वाद-शुद्ध-सिद्धान्त-वेदी वादि-गजाङ्कुशः ॥२१॥
सिद्धान्तामृत-वार्द्धि-वर्द्धन-विधुः साहित्य-विद्यानिधिः
बौद्धादि प्रवितर्क्क-कर्कश-मतिःशब्दागमे भारतिः ।
सत्यायुत्तम-धर्म्म-हर्म्य-निलयस्सद्वृत्त-बोधोदयः
स्थेयाद्विश्रुत**माघनन्दि**-मुनिप श्री**वक्रगच्छा**धिपः ॥२२॥

भवर सधर्म्मरु ॥

जैनेन्द्रे पूज्य [पादः] सकल-समय-तर्कें च भट्टाकलङ्कः
साहित्ये भारविस्स्यात्कवि-गमक-महावाद-वाग्मित्व-रुन्द्रः ।
गीते वाद्ये च नृत्ये दिशि विदिशि च संवर्त्ति सत्कीर्त्ति-
मूर्त्तिः
स्थेयाच्छ्रीयोगिबृन्दार्च्चितपदजिनचन्द्रो वितन्द्रो-
मुनीन्द्रः ॥ २३ ॥

भवर सधर्म्मरु ॥

(पश्चिममुख)

वन्द्यापुर-मुनीन्द्रोऽभूद् देवेन्द्रो रुन्द्र-सद्गुणः ।
सिद्धान्ताद्यागमार्थज्ञो सज्ज्ञानादि-गुणान्वित' ॥ २४ ॥

भवर सधर्म्मरु ॥

वासवचन्द्र-मुनीन्द्रो रुन्द्र-स्याद्वाद-तर्क-कर्कश-धिषणः ।
चालुक्य-कटक-मध्ये बाल-सरस्वतिरितिप्रसिद्धिप्राप्तः
॥२५॥

इवर्गे सहोदर-सधर्म्मरु ॥

श्रीमान्यशःकीर्त्ति-विशालकीर्त्तिस्स्याद्वाद-तर्काब्ज-
विबोधनार्कः ।
बौद्धादि-वादि-द्विप-कुम्भ-भेदी श्रीसिंहलाधीश-कृतार्घ्य-
पादः ॥२६॥

भवर सधर्म्मरु ॥

मुष्टि-त्रय-प्रमिताशन-तुष्टःशिष्ट-प्रिय-स्त्रिमुष्टि-मुनीन्द्रः ।

दुष्टपरवादि-मल्लोत्कृष्टश्री**गोपनन्दि**-यतिपतिशिष्यः ॥२७॥

अवर सधर्म्मरु ॥

मलदा [धा] रि **हेमचन्द्रो गण्डविमुक्तश्च गौल**-
मुनिनामा ।

श्री **गोपनन्दि**-यति-पति-शिष्योऽभूच्छुद्ध-दर्शनज्ञानाद्याः॥
॥ २८ ॥

कन्द ॥ धारिणियोल् मनसिजसं—

ह्वारिगलं नेनेयलुग्रपापं किडुगुं ।

सूरिगलनमल-गुण-स-

न्धारिगलं **गौल-देव-मल**धारिगलं ॥ २९ ॥

अवर सधर्म्मरु ॥

श्री **मूलसङ्घ**गतदोषमेघे **देशीगणे** सच्चरितादिसद्गुणे ।

भारत्यतुच्छे वरवक्रगच्छे जातः सुभावः **शुभकीर्त्ति** देवः॥
॥ ३० ॥

आजिरगे कीर्त्ति-नर्त्तकिगाजिर भूगोलवागे **शुभकीर्त्ति**
बुधं ।

राजावलि-पूजितनें राजिसिदनो **वक्रगच्छ देशीयगणं**
॥ ३१ ॥

अवर सधर्म्मरु ॥

श्री **माघनन्दि**सिद्धान्तामृत-निधि-जात-**मेघचन्द्रस्य**

श्रीसोदरस्य भुवन-ख्याताभय**चन्द्रिका** सुता जाता
॥ ३२ ॥

भवर नवर्न्नर ॥

कल्याणकीर्ति नामाभूद्भव्य-कल्याण-कारकः ।
शाकिन्यादि-महाग्रा च निर्द्धाटन-दुर्द्धरः ॥ ३३ ॥

भवर नवर्न्नर ॥

सिद्धान्तामृत-वार्द्धि-सूत-सुवचो-लक्ष्मी-ललाटेक्षण-
शब्द-व्याहृति नायिकान्य(क)चकोरानन्दचन्द्रोदय ।
माद्दिन्द-प्रमदाकटाक्ष-विशिख-व्यापार-शिक्षागुरुः
स्थेयाच्छ्रि-श्रुत-बालचन्द्रमुनिपः श्रीवक्रगच्छाधिपः ॥३४॥

श्रीमूलसङ्घ-कमलाकर-राजहंसा
देशीय-सद्गण-गुण-प्रवराब्जवंसः ।
श्रीपाश्रिजनागम-सुधार्णव-पूर्णचन्द्र
श्रीवक्रगच्छ-तिलको मुनिबालचन्द्र ॥३५॥

सिद्धान्ताखिलनागमार्त्थ-निपुण-व्याख्यानसच्छुद्धिथि
शुद्धात्मात्मक-तत्वनिर्ण्णय-वचो-विन्यासदि प्रौढिसं- ,
बद्ध-व्याकरणार्त्थ-शास्त्र-भरतालङ्कार-साहित्यदि
राद्धान्तोत्तम-बालचन्द्र-मुनियन्तात्म्यतिरा ... ॥ ३६ ॥

विश्वाशा-भरित-स्व-शीतलकर-प्रभ्राजितस्मागर-
श्रीद्व तत्कलानतः श्रवनयानन्दस्तवामीश्वरः ।
काम-ध्वंसन-भूपितः क्षितितले जातो यथार्त्थाह्वय-
स्सोऽयं विश्रुत-बालचन्द्र-मुनिपस्सिद्धान्त-चक्राधिपः ॥ ३७ ॥

(उत्तरमुख)

श्रीमूलसङ्घद देशीयगणद वक्रगच्छद कोण्डकुन्दान्वयद परियलिय **वड्डुदेवर** वलिय। **देवेन्द्र**सिद्धान्तदेवरु। अवर शिष्यरु **वृषभनन्द्या**चार्य्यरेम्ब **चतुर्म्मुख**देवरु। अवर शिष्यरु **गोपनन्दि**-पण्डितदेवरु। अवर सधर्म्मरु **महेन्द्र-चन्द्र**-पण्डित-देवरु। देवेन्द्र-सिद्धान्तदेवरु। **शुभकीर्त्ति**-पण्डित-देवरु- **माघनन्दि**-सिद्धान्त-देवरु। **जिनचन्द्र**-पण्डित-देवरु। **गुणचन्द्र**-मलधारि-देवरु। अवरोलगे**माघनन्दि**-सिद्धान्त-देवरशिष्यरु। **त्रिरत्ननन्दि**-भट्टारक-देवरु। अवर सधर्म्मरु **कल्याणकीर्त्ति**भट्टारकदेवरु। **मेघचन्द्र**-पण्डित-देवरु। **बालचन्द्र**-सिद्धान्त-देवरु। आ **गोपनन्दि**पण्डित-देवर शिष्यरु **जसकीर्त्ति**-पण्डित-देवरु। **वासवचन्द्र**-पण्डित-देवरु। **चन्दनन्दि**पण्डितदेवरु। **हेमचन्द्र**-मलधारि गण्डविमुक्तरेम्ब **गौल**देवरु **त्रिमुष्टि**-देवरु।

[यह लेख कुछ आचार्यों की प्रशस्तिमात्र है। लेख के अन्तिम भाग मे उपरिवर्णित आचार्यों के नामों की पुनरावृत्ति है। ये सब आचार्य मूलसंघ देशिय गण और वक्र गच्छ के देवेन्द्र सिद्धान्तदेव के समकालीन शिष्य थे। चतुर्मुखदेव इसलिए कहलाये क्योंकि उन्होंने चारों दिशाओं की ओर प्रस्तुत मुख होकर आठ आठ दिन के उपवास किये थे। गोपनन्दि अद्वितीय कवि और नैयायिक थे जिनके सम्मुख कोई वादी नहीं ठहरते थे। प्रभाचन्द्र धाराधीश भोजदेव द्वारा सम्मानित हुए थे। माघनन्दि, और जिनचन्द्र भारी कवि, नैयायिक और

वैयाकरण थे। देवेन्द्र चङ्कापुर के आचार्यों के नायक थे। वासवचन्द्र ने अपने वाद-पराक्रम से चालुक्य राजधानी में बालसरस्वती की उपाधि प्राप्त की थी। यशःकीर्त्ति सैद्धान्तिक सिंहल द्वीप के नरेश द्वारा सम्मानित हुए थे। त्रिमुष्टि मुनीन्द्र बड़े सैद्धान्तिक थे और तीन मुष्टि अन्न का ही आहार करते थे। मलधारि हेमचन्द्र और शुभकीर्त्तिदेव बड़े सदाचारी आचार्य थे। कल्याणकीर्त्ति शाकिनी आदि भूत प्रेतों को भगाने की विद्या में निपुण थे। बालचन्द्र आगम और सिद्धान्त के अच्छे ज्ञाता थे।]

५६ (१३२)

गन्धवारण बस्ति के पूर्व की ओर

(शक सं० १०४५)

त्रैविद्योत्तममेघचन्द्रसुतपःपीयूषवाराशिजः
सम्पूर्ण्णाक्षयवृत्तनिर्म्मलतनुःपुष्यद्बुधानन्दनः।
त्रैलोक्य प्रसरद्यशश्शुचिरुचिर्य्यैर्प्रास्तदोपागमः
सिद्धान्ताम्बुधिवर्द्धनो विजयते पूर्व्वः प्रभाचन्द्रमाः ॥ १ ॥

श्रीसोदराम्बुजभवाद्युदिताऽत्रिरत्रि-
जातेन्दुपुत्र-बुधपुत्र-पुरूरवस्तः।
आयुस्ततश्च नहुषो नहुषाद्ययातिः
तस्माद्यदुर्यदुकुले बहवो बभूवुः ॥ २ ॥

ख्यातेषु तेषु नृपतिः कथिवः कदाचित्
कश्चिद्वने मुनिवरंश्व(व्य)-चलः करालं।

शार्दूलकं प्रतिह **पोय्सल** इत्यतोऽभू-
त्तस्याभिधा मुनिवचोऽपि चमूरलक्ष्मः ॥ ३ ॥
ततो द्वारवतीनाथा **पोय्सला** द्वीपिलाञ्छना ।
जाताश्शशपुरे तेषु **विनयादित्य**भूपतिः ॥ ४ ॥
स श्रीवृद्धिकरं जगज्जनहितं कृत्वा धरां पालयन्
प ३ उयमसेट्टि बिदियमसेट्टि प ४ मह्ददेव सेट्टि रट्टे सेट्टि प २ पारिससेट्टि बसविसेट्टि रायिसेट्टि प ४ मारगूलिसेट्टि होय्सल-सेट्टि प २ नम्बिदेवसेट्टि प ५ चोकिसेट्टि प ५ जिन्निसेट्टि प ५ वाहुवलिसेट्टि प ५ पट्टणसामि अड्किसेट्टि मालिसेट्टि प ३ मह्ददेव-सेट्टि गोविसेट्टि प २ बम्मिसेट्टि मूकिसेट्टि प २ माराण्डिसेट्टि मह्ददेवसेट्टि प २ वैरिसेट्टि मारिसेट्टि प २ सोविसेट्टि दुद्दिसेट्टि प २ हारुवसेट्टि हरदिसेट्टि प २ बम्माण्डि प २ सान्तेय प १ कूतैय्य प २ मासणिसेट्टि कूविसेट्टि बसविसेट्टि प ३ चट्टिसेट्टि वसविसेट्टि प १ मल्लिसेट्टि प १ मह्ददेव वयिर प २ बम्मेय मसण प २ कालेय गाडेय प २ गवुड्डमासि मदवनिगसेट्टि प २ मालि-सेट्टि पारिससेट्टि प २ होन्निसेट्टि बोकिसेट्टि प २ गङ्गिसेट्टि आय्तसेट्टि देविसेट्टि (प) २ मालिसेट्टि दम्मिसेट्टि प २ मारि-सेट्टि आय्तमसेट्टि प २ मारज्ज हरियण कालेय प २ मारगौ-ण्डनहल्लिय गुम्मज्ज वैरेय प १ माकिसेट्टि बूविसेट्टि प १ एचि-सेट्टि प १ अक्कनेय मह्ददेवसेट्टि पारिस्ससेट्टि प १ निडिय मल्लिसेट्टि प १...

[मोसले के वड्ड व्यवहारि बसवसेट्टि द्वारा प्रतिष्ठापित चतुर्विंशति तीर्थंकरों की अष्टविधपूजन के लिए मोसले के महाजनों ने वक्त मासिक चन्दा देने का सकल्प किया ।]

८७ (२३६)

उसी पाषाण के पूर्व मुख पर

(लगभग शक सं० ११०७)

श्रीबसविसेट्टियर तीर्त्थकर अष्टविधार्च्चनेगे मोसलेय नकर वरिस निबन्धियागि चवुण्डेय जकण्ण किरिय-चवुण्डेय प २ मह्देवसेट्टि कम्बिसेट्टि प १ उयमसेट्टि पारिससेट्टि प १ बोकि-सेट्टि बूकिसेट्टि प १ माचिसेट्टि हेग्गिसेट्टि सुग्गि सेट्टि प १ सूकिसेट्टि प १ रामिसेट्टि हाविसेट्टि (प) १ मच्चिसेट्टि बसविसेट्टि प १ मल्लिसेट्टि गुड्डिसेट्टि चिक्कमल्लिसेट्टि(प)२ मसणिसेट्टि माचि-सेट्टि अम्माण्डिसेट्टि प २ अलियमारिसेट्टि सुग्गिसेट्टि प २ करि-किसेट्टि चिक्कमादि प २ करिय बम्मिसेट्टि मारिसेट्टि प १ मल्लि-सेट्टि अयिविसेट्टि कालिसेट्टि प २ मणिगार माचिसेट्टि सेट्टियण प १ तेरणिय चौण्डेय हेग्गडे वसवण्ण चन्देय रामेय हुल्लेय जक्कण प २ मालगौण्ड सेट्टियण माचय मारेय चिकण गोल्लेय प १ मादि-गौण्ड गौण्डेय माचेय बम्मेय होन्नेय जक्कगौण्ड प १

[तात्पर्य्य पूर्वोक्तानुसार ही है]

८८ (२३७)

पूर्वोक्त लेख के नीचे

(संभवतः शक सं० १११८)

नल संवत्सरद उत्तरायण-सङ्क्रान्तियल्लु श्रीमन्महापसा-यितं विजयण्णनवरलिय चिक्कमद्दुकण्ण श्रीगोम्मटदेवर

नित्यार्च्चनेगे २० वासिग हूविङ्गे श्रीमन्महामण्डलाचार्य्यरु चन्द्र-प्रभदेवर कैयलु मारुगोण्डु गङ्गसमुद्रदलु गद्दे स १ वेद्दलु कं २०० नूरनुं कोण्डु कोट्ट दत्ति मङ्गलमहाश्री।

[उक्त तिथि को महापसायित विजयण्ण के दामाद चिक्क मदुकण्ण ने गङ्गसमुद्र की कुछ भूमि महामण्डलाचार्य चन्द्रप्रभदेव से खरीदकर गोम्मटदेव की प्रतिदिन की पूजन के हेतु बीस पुष्प मालाओं के लिए अर्पण की।]

[नोट—लेख में नल संवत्सर का उल्लेख है। शक सं० १११८ नल था]

८९ (२३८)

पूर्वोक्त लेख के नीचे

(संभवतः शक सं० ११२०)

कालयुक्तिसंवत्सरद कार्त्तिक सु १ आ श्रीगोम्म टदेवर यर्च्चनेगं हुविन पडिगे श्रीमन्महामण्डलाचार्य्यरु हिरिय नयकीर्त्तिदेवर शिष्यरु चन्द्रप्रभदेवर कयलु यगलियद कबि सेट्टिय सोमेयनु गद्दे पडवलगंरय गद्दे को १० गङ्गसमुद्रदल्लि कोम्म तगलि को १० आर्व्वदलु गुलेय कयमेगे गधाणा ओन्दुहोन वेदलु अकलुन सीमे।

[उक्त तिथि को कविसेट्टि के (पुत्र) सोमेय ने उक्त भूमि का दान गोम्मटदेव की पुष्प-पूजन के हेतु हिरियनयकीर्ति देव के शिष्य महामण्डलाचार्य चन्द्रप्रभदेव को कर दिया।]

[नोट—लेख में कालयुक्त संवत्सर का उल्लेख है। शक सं० ११२० कालयुक्त था।]

९० (२४०)

गोम्मटेश्वर-द्वार के दाहिनी तरफ़ एक पाषाण पर

(लगभग शक सं० ११००)

श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छनम् ।
जीयात् त्रैलोक्यनाथस्य शासनं जिनशासनम् ॥१॥
भद्रमस्तु जिनशासनाय सम्पद्यतां प्रतिविधानहेतवे ।
अन्यवादि मदहस्तिमस्तकस्फाटनाय घटने पटीयसे ॥२॥
नमोऽस्तु ॥
जगत्त्रितयनाथाय नमो जन्मप्रमाथिने ।
नयप्रमाणवाग्रश्मिध्वस्तध्वान्ताय शान्तये ॥३॥
नमो जिनाय ॥

स्वस्ति समधिगतपञ्चमहाशब्दमहामण्डलेश्वरं । द्वारवती पुरवराधीश्वरं । यादव-कुलाम्बर-द्युमणि । सम्यक्त्वचूडामणि । मलपरोल् गण्डाद्यनेकनामावलीसमालङ्कृतरप्प श्रीमन्महामण्डलेश्वरं । त्रिभुवनमल्ल तलकाडुगोण्ड भुजवलवीर-गङ्ग-विष्णु-वर्द्धन-होय्सलदेवर विजयराज्यमुत्तरोत्तराभिवृद्धि-प्रवर्द्धमानमाचन्द्रार्क्कतारं सलुत्तमिरे तत्पाद पद्मोपजीवि ॥

वृत्त ॥ जनता धारनुदारनन्यवनितादूरं वचस्सुन्दरी-
घनवृत्तस्तनहारनुग्ररणधीरं मारनेनेन्दपै ।
जनकं तानेने माकणब्बे विबुधप्रख्यातधर्म्मप्रयु-
क्तनिकामात्तचरित्रे तायेनलिदेनेच महाधन्यनो ॥४॥

कन्द ॥ वित्रस्तमलं बुधजन-
मित्रं द्विजकुलपवित्रनेचं जगदोल् ।
पात्रं रिपुकुलकन्द-ख-
नित्रं कौण्डिन्यगोत्रनमलचरित्रं ॥५॥
मनुचरितनेचिगाङ्कन
मनेयोल् मुनिजनसमूहमुं बुधजनमुं ।
जिनपूजने जिनवन्दने
जिनमहिमेगलावकालमुं शोभिसुगुं ॥६॥
उत्तमगुणतिवनिता-
वृत्तियनोल्कोण्डुदेन्दु जगमेल्ल क-
य्येत्तुविनममलगुणस-
म्पत्तिगे जगदोलगे पोचिकव्वेये नोन्तल् ॥७॥
वचन ॥ अन्तेनिसिद् एचिराजन पोचिकव्वेय पुत्रनखिलतीर्थ-
करपरमदेव - परमचरिताकर्ण्णनोदीर्ण्ण - विपुलपुलकपरिक-
लितवारवाणनुमसमसमररसरसिक- रिपुनृपकलापावलेपलो
लुपकृपाणनुवाहाराभयभैषज्यशास्त्रदानविनोदनुं सकललोक
शोकापनोदनुं ॥
वृत्त ॥ वज्रं वज्रभृतो हलं हलभृतश्चक्रं तथा चक्रिण-
श्शक्तिश्शक्तिधरस्य गाण्डिवधनुर्गाण्डीवकोदण्डिनः ।
यस्तद्वद्वितनोति विष्णुनृपतेः कार्य्यं कथं मादृशै-
र्गाङ्गो गङ्गतरङ्गरञ्जितयशोराशिस्स वर्ण्यो भवेत् ॥८॥
वचन ॥ अन्तेनिप श्रीमन्महाप्रधानं दण्डनायकं द्रोहघरट्ट

गङ्गराज चोलन सामन्तनदियमं घट्टदिं मेलाद गङ्गवा-
डिनाड गडिय तलकाड वीडिनोल् पडियिप्पन्तिट्ट चोल
कोट्ट नाडं कोडदे कादि कोल्लिमेने विजिगीपुवृत्तियिन्द
मेत्ति बलमेरडु साच्चिदल्लि ॥

वृत्त ॥ इत्तधा भूमिभागदोलधन्यरदेके भवत्प्रतापस-
म्पत्तिय वर्णनाविधिगे गङ्गचमूप जिगीपुवृत्तिय-
न्देत्तिद निन्न कय्य निशितासिय तीमोने वेन्न बारने-
त्तुत्तिरे पोगि कञ्चि गुरियप्पिनमोडिद दामनेय्दने ॥९॥
कदनदोलन्दु निन्न तरवारिय वारिगे मेय्यनोड्डला-
रदे नलिदिन्तुवन्तदने जानिसि जानिसि गङ्ग तन्न न-
म्बिद सुदतीकदम्बदेर्दे पावने वोगिरे पुल्ले वेच्चु वे-
च्चिदपनहर्निशं तिगुलदामनरण्यशरण्यवृत्तियिं ॥१०॥
एनितानुं ववरङ्गलोलपलवरं वेङ्कोण्ड गण्डन्दमो-
वेनिसुत्तं तलकाडोलिन्नेवरमिर्द्दीगलकरं गङ्गरा-
जन खलगाहतिगलिके युद्धविधियोल्वेन्नित्तु नायुण्णदो-
डिनलुण्डिर्द्दपनत्त शैवशमिवोल्सामन्तदामोदरं ॥११॥

वचन ॥ एम्बिनमोन्दे मेय्योलवयवदिनेय्दि मूदलिसि धृतिगिडिसि
वेङ्कोण्डु मत्तं नरसिङ्गवर्म्म मोदलागे घट्टदिं मेलाद चोलन
सामन्तरेल्लरं वेङ्कोण्डु नाडादुदेल्लमनेकच्छत्रदुण्डिगेसाध्यं
माडि कुडे कृतज्ञं विष्णुनृपति मेच्चि मेच्चिदें वेडिकोल्लिमेने

कन्द ॥ अवनिपनेनगित्तपने-
न्दवरिवरवोलुलिद वस्तुवं बेडदे भू-

भुवनं वण्णिसे गोवि-
न्दवाडियं वेडिदं जिनार्च्चन लुब्धं ॥१२॥
गोम्मटमेने मुनिसमुदा-
यं मनदोलमेच्चि मेच्चि विचलिसुत्तुं ।
गोम्मटदेवर पूजेग-
दं मुदर्दि विट्टनल्ते धीरोदात्तं ॥१३॥

ग्रफर ॥ ग्रादियागिर्प्पुदार्हतसमयक्के मूलसङ्घं कोण्डकु-
दान्वयं
ग्रादु वेळदं वनेयिपुदल्लिय देसिगगणद पुस्तकगच्छद ।
वोधविभवद कुक्कुटासनमलधारि देवर शिष्यरेनिप पेम्पि-
ङ्गादमेसेदिर्प्पं शुभचन्द्रसिद्धान्तदेवर गुड्डं गङ्गचमूपति
॥ १४ ॥

गङ्गवाडिय वसदिगलेनितोलवनितुमं तानेय्दे पोसयिसिदं
गङ्गवाडिय गोम्मटदेवगे सुत्तालयमनेय्दे माडिसिदं ।
गङ्गवाडिय तिगुलरं वेङ्कोण्डु वीरगङ्गङ्गे निमिर्चिद कोट्टं
गङ्गराजनामुन्निन गङ्गर रायङ्गं नूर्म्मडि धन्यनल्ते ॥ १५ ॥
धर्म्मस्यैव वलाल्लोको जयत्यखिलविद्विषः ।
ग्रारोपयतु तत्रैव सर्व्वोऽपि गुणमुत्तमं ॥१६॥
श्रीमज्जैनवचोऽब्धिवर्द्धनविधुः साहित्यविद्यानिधि-
स्सर्प्पदर्पकहस्तिमस्तकलुठत्प्रोत्कण्ठकण्ठीरवः ।
स श्रीमान् गुणचन्द्रदेवतनयस्सौजन्यजन्यावनि-
स्स्थेयात् श्रीनयकीर्त्तिदेवमुनिपस्सिद्धान्तचक्रेश्वरः ॥१७॥

कृतदिग्जैत्रविदं बरुत्ते **नरसिंह**क्षोणिपं कण्डु स-
न्मतियिं **गोम्मटपार्श्वनाथजिनरं** मत्तोचतुर्व्विंशति-
प्रतिमागेहमनिन्तिवर्क्के विनुतं प्रोत्साहदिं विट्टन-
प्रतिमल्लं **सवणेरबेक्क**कगेरेयुमं कल्पान्तरं सल्विनं ॥१८॥

नरसिंहहिमाद्रितदुद्भूतकलशहृदकहुल्लकरजिह्विकेया-
नतधारागङ्गाम्बुनि **नयकीर्त्ति** मुनीशपादसरसीमध्ये ॥१९॥

ललनालीलेगे मुन्नवेन्तु कुसुमास्त्रं पुट्टिदों विष्णुगं
ललितश्रीवधुविङ्गवन्ते **नरसिंह**क्षोणिपालङ्गवे-
चलदेवीवधुगं परार्थचरितं पुण्याधिकं पुट्टिदों
वलवद्वैरिकुलान्तकं जयभुजं **बल्लाल**भूपालकं ॥२०॥

चिरकालं रिपुगलगसाध्यमेनिसिद्दुच्चङ्गियं मुत्ति
दुर्द्धरतेजोनिधि धूलिगोटेयने कोण्डाकामदेवावनी-
श्वरनं सन्दो**डेय**क्षितीश्वरननाभण्डारमं स्त्रीयरं
तुरगव्रातमुमं समन्दु पिडिदं **बल्लाल**भूपालकं ॥२१॥

स्वस्ति श्रीम**न्नयकिर्ति** सिद्धान्तचक्रवर्त्तिगल गुड्डं श्रीमन्म-
हाप्रधानं सर्व्वाधिकारि हिरियभण्डारि हुल्लय्यङ्गलु श्रीमत्प्रताप
चक्रवर्त्ति **वीरबल्लालदेवर** कय्यलु **गोम्मटदेवर पार्श्वदेवर**
चतुर्व्विंशति तीर्त्थकरर अष्टविधार्च्चनेगं रिषियराहारदानकं
बेडिकोण्डु **सवणेरबेक्क**कगेरेय बिट्ट दत्ति ॥

परमागमवारिधिहिम-
किरणं राद्धान्तचक्रि**नयकीर्त्ति**यमी-

श्वरशिष्यनमलनिजचित्-
परिगतनध्यात्मिबालचन्द्रमुनीन्द्रं ॥ २२ ॥
कन्तुकुलान्तकालयमनूर्ज्जितशासनमं निशिधिका-
सन्ततियं तटाक सरसींकुलमं नयकीर्त्ति देवसै-
द्धान्तिकरंगलपरोक्षविनयङ्गलनीतेरदिन्द मालपरा-
रिन्तिरे नोन्तरारेनिसिदं नयकीर्त्तिनिलाविभागदोल् ॥२३॥

[यह लेख आदि से आठवें पद्य तक लेख नं० ५६ (७३) के पूर्वभाग के समान ही है। केवल इसमें तीसरा पद्य अधिक है। इस लेख में भी विष्णु नरेश के महादण्डनायक गङ्गराज के पराक्रम का अच्छा वर्णन है। उन्होंने तलकाडु पर घेरा डालनेवाले चोल सामन्त अदियम नरसिंह वर्मा, दामोदर व तिगुलदाम को भारी पराजय दी। इस पर विष्णुवर्द्धन ने प्रसन्न होकर उनसे पारितोषक माँगने को कहा। उन्होंने गोम्मटेश्वर की पूजन निमित्त 'गोविन्द वाडि' का दान माँगा। इसे नरेश ने सहर्ष स्वीकार किया।

गङ्गराज कुन्दकुन्दान्वय के कुक्कुटासन मलधारिदेव के शिष्य शुभचन्द्र सिद्धान्तदेव के शिष्य थे। उनके तिगुलों को हराकर गङ्गवाडि की रक्षा करने, गङ्गवाडि के गोम्मटेश्वर का परकोटा बनवाने व अनेक जैन बस्तियों का जीर्णोद्धार करने का लेख नं० ५६ के सदृश यहाँ भी उल्लेख है और यहाँ भी वे चामुण्डराय से सौगुणे अधिक धन्य कहे गये हैं।

पद्य १७ और १८ में गुणचन्द्र देव के तनय नयकीर्ति देव का उल्लेख करके कहा गया है कि नरसिंह नरेश ने दिग्विजय से लौटते हुए गोम्मटेश्वर के दर्शन किये और सदा के लिए पूजनार्थ तीन ग्रामों का दान दिया। इसके पश्चात् नरसिंह नरेश और एचल देवी से उत्पन्न होनेवाले बल्लाल नृप का कामदेव और ओडेय राजाओं को जीतने, उच्चङ्गि

का क़िला विजय करने तथा अपने प्रधान कोषाध्यच, नयकीर्ति देव के शिष्य 'हुल्लय' द्वारा उक्त तीनों ग्रामों के दान को पूरा करने का उल्लेख है।

अन्त में नयकीर्ति देव के शिष्य अध्यात्मि बालचन्द्र के अपने गुरु के स्मारक अनेक शासन रचने व तालाब आदि निर्माण करवाने का उल्लेख है।]

[नोट—पद्य १७ से ऐसा विदित होता है कि उसके लिखे जाने के समय नयकीर्त्ति जीवित थे। किन्तु अन्तिम पद्य से स्पष्ट होता है कि उनके लिखे जाने के समय नयकीर्ति का स्वर्गवास हो चुका था। सम्भव है कि लेख का पूर्व भाग (पद्य २१ तक) नयकीर्ति के जीवन-काल में ही लिखा गया हो और शेष भाग पीछे से जोड़ा गया हो।]

९१ (२४१)

उपर्युक्त लेख के नीचे

(लगभग शक सं० ११००)

स्वस्ति समस्तगुणसम्पन्नरप्प श्रीबेलुगुलतीर्त्थद समस्त माणिक्य नखरङ्गलु श्रीगोम्मटदेवर पारिश्वदेवरिगे वर्षनिबन्नियागि हूविनपडिगे जातिहवलक्के तोलेगे ता १ करिदक्के वीस १ यिद आचन्द्रार्क्कतारं बरं सलिसुवरु ॥ मङ्गल महा श्री श्री ॥

[बेल्गुल के समस्त जौहरियों ने गोम्मट देव और पार्श्वदेव की पुष्प-पूजन के लिए अपने माणिक्यों पर उक्त वार्षिक चन्दा देने का सकल्प किया।]

८२ (२४२)

उपर्युक्त लेख के नीचे

(लगभग शक सं० ११००)

स्वस्ति श्री वेलुगुलतीर्थद गुमिसेट्टिय दसैय बिकैवेय केतय्य कोयन मरिसेट्टिय मग लखण्न लोकेयसहणिय मगलु सोमौवे मेलमेलद समस्तनखरङ्गलु गोम्मटदेवर हुविन पडगे गङ्गसमुद्रद हिन्दे गदे स १ आगोम्मटपुरद भूमियोलगे ओन्दुहोन्न वेद्दले गुलयकेय्य समुदायङ्गल कय्यलु मारुगोण्डु मा (म) लेगारगे आचन्द्रार्कतारं वरं सलुवन्तागि वरदुकोट्ट शासन ॥

[वेलुगुल के गुमिसेट्टि आदि समस्त व्यापारियों ने गङ्गसमुद्र और गोम्मटपुर की कुछ भूमि खरीद कर उसे गोम्मटदेव की पूजा के निमित्त पुष्प देने के लिए एक माली को सदा के लिए प्रदान कर दी।]

८३ (२४३)

उसी पाषाण की दूसरी बाजू पर

(सम्भवतः शक सं० ११८७)

स्वस्ति श्रीभावसंवत्सरद भाद्रपद शुक्रवारदन्दु श्री गोम्मटदेवरिगेवु तीर्थंकरिगेवु हूविन पडिगे चन्निसेट्टिय मग चन्द्रकीर्त्ति भट्टारकदेवर गुड्ड कल्लय्यनु अक्षयभण्डारवागि कोट्ट ग १ प २ $\frac{1}{8}$ यि-मरियादेयलु कुन्ददे ६ वासिग-हुव्वनि-कुवरु मङ्गलमहा श्री श्री ॥

[चेन्निसेट्टि के पुत्र व चन्द्रकीर्ति भट्टारक देव के शिष्य कल्लय्य ने कम से कम ६ पुष्प मालाएँ नित्य चढाये जाने के हेतु उक्त तिथि को उक्त दान दिया।]

[नोट—लेख में भाव संवत्सर का उल्लेख है शक सं० १११७ भाव संवत्सर था।]

९४ (२४४)

उपर्युक्त लेख के नीचे

(सम्भवतः शक सं० ११९७)

स्वस्ति श्रीभावसंवत्सरद पुष्य सुद्ध ५ त्रि (बृ) श्रीगोम्मट-देवर नित्याभिषेकक्के श्रीप्रभाचन्द्रभट्टारकदेवर गुड्ड बारकनूर मेधाविसेट्टिगे परोक्षविनेयक्के अक्षयभण्डारक्के कोट्ट गद्याण नाल्कु यहोन्निङ्ग अमृतपडिगे आचन्द्रार्क्क नित्यपाडि ३ य मान हाल नडसुवदु यि-धर्म्मव माणिक-नकरङ्गलुं एलयिगलुं आरैवरु मङ्गलमहा श्री श्री ॥

[प्रभाचन्द्र भट्टारक देव के शिष्य बारकनूर के मेधावि सेट्टि की स्मृति में गोम्मट देव के अभिषेकार्थ ३ 'मान' दुग्ध प्रति दिवस देने के लिए उक्त तिथि को ४ 'गद्याण' का दान दिया गया।]

[नोट—लेख में भाव संवत्सर का उल्लेख होने से समय उपर्युक्त।]

९५ (२४५)

उपर्युक्त लेख के नीचे

(लगभग शक सं० ११९७)

हलसूर सोयिसेटिय मग केतिसेटियरु गोम्मट-देवरिगे

नित्यपडि मूरुमान हालनु अभिषेकक्के कोट्ट ग ३ क्क होन्न
वडिगे हाल नडयिसुवरु माणिकनखर नडेयिसुवरु आचन्द्रार्क्क-
वुल्लनक्क मङ्गलमहा श्री ॥

[गोम्मट देव के नित्याभिषेक के हेतु सोमि सेटि के पुत्र हलसूर-
निवासी केति सेटि ने ३ 'मान' दूध के लिए ३ ग का दान दिया जिसके
ब्याज से दूध लिया जावे ।]

८६ (२४६)

उसी पाषाण की दायीं बाजू पर

(शक सं० ११६६)

श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छनं ।
जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनं ॥ १ ॥

श्रीमत्प्रतापचक्रवर्त्ति होय्सल श्रीवीरनारसिंहदेवरसरु
श्रीमद्राजधानिदोरसमुद्रदलु सुखसङ्कथा विनोददिं राज्यं गेय्युत्त-
मिरे शकवरुष ११८६ नेय श्रीमुखसंवत्सरद श्रावण सु १५
आदिवारदलु श्रीमन्महामण्डलाचार्य्यरु नयकीर्त्तिदेवर
शिष्यरु चन्द्रप्रभदेवर कय्यलु होन्नचगेरेय मादय्यन मग सम्भु-
देवनु सङ्गिसेट्टियर मग बोम्मण्ण अगप्पसेट्टियर मक्कलु दोरय
चवुडय्यनवरु श्रीगोम्मटदेवर अमृतपडिगे मत्तियकेरेय नट्टकल्ल
सीमामर्य्यादेयोलगाद गद्दे सुत्तालयद चतुर्व्विंशतितीर्त्थकर
अमृतपडिगे कोट्ट मोदलेरिय गद्दे सलगे वोन्दु-सहित सर्व्वबा-
धापरिहारवागि धारापूर्व्वकं माडिकोण्डु आचन्द्रार्कतारं बरं
सल्वन्तागि कोट्ट दत्ति । मङ्गलमहा श्री श्री श्री ॥

[होय्सल नरेश श्री वीर नारसिंह के समय में उक्त तिथि को होन्न-चगोरे के मादय्य के पुत्र सम्भुदेव ने महामण्डलाचार्य नयकीर्ति देव के शिष्य चन्द्रप्रभदेव से मात्तिय केरे की उक्त भूमि खरीदकर उसे गोम्मट देव और चतुर्विंशति तीर्थंकर के दुग्ध-पूजन के लिये प्रदान कर दी।]

८७ (२४७)

उपर्युक्त लेख के नीचे

(सम्भवतः शक सं० ११९७)

स्वस्ति श्रीभावसंवत्सरद भाद्रपद सुद्ध ५ आदिवार दलु श्रीगोम्मटदेवर नित्याभिषेकक्के अमृतपडिगे श्रीप्रभाचन्द्र-भट्टारकदेवरगुड्ड गेरसपेय गोविन्दसेट्टिय मग आदियण्न अक्षयभण्डारवागि इरिसिद गद्याण नाल्कु तिङ्गलिङ्गे होङ्गे हाग बडि आवडियलि नित्याभिषेकक्के वळ्ळ हाल नडसुवरु ई-होन्निङ्गे माणिक्यनकर एलमं ओडेयरु। आचन्द्रार्कतारं वरं सल्व-न्तागि नडसुवरु। मङ्गलमहा श्री श्री श्री॥

[उक्त तिथि को गेरसपे के गोविन्द सेट्टि के पुत्र व प्रभाचन्द्र भट्टारक देव के शिष्य आदियण्ण ने गोम्मटदेव के नित्याभिषेक के लिए ४ गद्याण का दान किया। इस रकम के एक 'होन' पर एक 'हाग' मासिक व्याज की दर से एक 'वल्ल' दुग्ध प्रति दिन दिया जाना चाहिए।]

---

९८ (२२३)

अष्टदिक्पालक मण्डप में एक स्तम्भ पर

(शक सं० १७४८)

(पूर्व मुख)

श्री स्वस्ति श्रीविजयाभ्युदय शालिवाहन शख वरुष १७४८ ने सन्द वर्त्तमानक्के सलुव व्ययनामसंवत्सरद फाल्गुण ब५ भानुवारदल्लु काश्यपगोत्रे अहनियसूत्रे वृषभप्रवरे प्रथमानुयोगशाखाया श्रीचावुण्डराज वंशस्थराद बिलिकेरे अनन्तराजै अरसिनवर प्रपौत्र तोटदेवराजै अरसिनवर पौत्र सत्यमङ्गलद चलुवै-अरसिनवर पुत्र श्रीमन्महिसूरपुरवराधीश श्रीकृष्णराज-वडेयरवर सम्मुखदल्लि भारिगाढु कन्दाचार सवारकचेरि—

(उत्तर मुख)

यिनाखं मच्चि देवराजै अरसिनवरु श्रीगोमटेश्वरस्वामियवर मस्तकाभिषेकपूजोत्सवदिवस स्वर्गस्थराद्दके श्रीमठदिन्द वर्षप्रति वर्षदल्लु श्रीगोमटेश्वरस्वामिय वरिगे पादपूजे मुन्ताद सेवार्त्थ नडेयुवहागे यिवर पुत्रराद पुट्टदेवराजै अरसिनवरु १०० वरह हाकिरुव पुटुवट्टिन सेवेगे भद्र, भूयाद्वर्द्धतां जिनशासनं । श्री ।

[काश्यप गोत्र, अहनिय सूत्र, वृषभ प्रवर और प्रथमानुयोग शाखा में चावुण्डराज के वंशज, बिलिकेरे अनन्तराजै अरसु के प्रपौत्र, तोटदेवराजै अरसु के पौत्र व सत्यमङ्गल के चलुवै अरसु के पुत्र, मैसूर नरेश श्री कृष्णराज वडेयर के प्रधान अङ्गरक्षक (मच्चि) देवराजै अरसु की मृत्यु गोम्मटेश्वर के मस्तकाभिषेक के दिवस हुई। अतएव उनके

पुत्र पुट्ट देवराजै अरसु ने गोम्मट स्वामी की वार्षिक पाद पूजा के लिए उक्त तिथि को १०० 'वरह' का दान किया।]

८८ (२२४)

उसी मण्डप में एक द्वितीय स्तम्भ के पश्चिम मुख पर

(शक सं० १४५६)

श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छन।

जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनं ॥ १ ॥

सखवर्ष साविरद १४५६ तनेय विलम्बि संवत्सरद माघ शुद्ध ५ यलु गेरसोप्पेय चवुडिसटिरु अगणिबोम्मय्यन मग कम्भय्यनु तन्न चेत्र अडहागिरलागि चवुडिसटिरु अडनु बिडिसि कोट्टु दक्के वोन्दु तण्डक्के आहारदान त्यागद ब्रह्मन मुन्दण हूविन तोट वोन्दु पडि अक्कि अन्नतेपुञ्ज इट्टनु आचन्द्रार्कस्थायियागि नावु नडसि बद्देनु मङ्गलम श्री श्री श्री श्री श्री ॥

[गेरसोप्पे के चवुडि सेट्टि ने मेरी भूमि रहन से मुक्त कर दी है इसलिए मैं अगणि बोम्मय्य का पुत्र कम्भिय्य सदैव निम्नलिखित दान का पालन करूँगा—एक संघ (तण्ड) को आहार, त्यागद ब्रह्म के सामने के बाग (की देख-रेख) व अक्षत पुञ्ज के लिए एक 'पडि' तण्डुल।]

१०० (२२५)

उसी स्तम्भ के दक्षिण मुख पर

(शक सं० १४५९)

तत्संवत्सरदलु गेरसोप्पेय चौडिसेट्टिरिगे दोडदेवप्पगल मग चिक्कणनु कोट्ट धर्म्मसाधन नमगे अनुमत्य बरलागि नीवु नवगे परिहरिसि कोट्टदक्के १ तण्डक्के आहार दानवनु आचन्द्रार्कस्थायि यागि नडसि वहेवु मङ्गलमहा श्री श्री श्री श्री श्री ॥

[दोड देवप्प के पुत्र चिकण ने यह 'धर्म साधन' चौडि सेट्टि को दिया कि 'आपने हमारे कष्ट का परिहार किया है इसके उपलक्ष्य में मैं सदैव एक संघ (तण्ड) को आहार दूँगा ।]

१०१ (२२६)

नं० १०० के नीचे

(शक सं० १४५९)

तत्संवत्सरदलु गेरसोप्पेय चावुडिसेट्टरिगे कविगल मग वोम्मणनु कोट धर्मसाधन नमधि अनुपत्य बरलागि नीवु नवगे परिहरिसि कोट्टु दक्के वर्ष १ क्के आरतिङ्गलु पर्य्यन्त १ तण्डक्के आहारदानवनु आचन्द्रार्कस्थायियागि नडसि वहेवु मङ्गलमहा श्री श्री श्री श्री ॥

['कवि, के पुत्र बोम्मण ने चवुडि सेट्टि को यह 'धर्म-साधन' दिया कि 'आपने हमारी आपद् का परिहार किया है इसके उपलक्ष्य में मैं सदैव वर्ष में छह मास एक संघ (तण्ड) को अहार दूँगा' ।]

१०२ (२२७)

उसी स्तम्भ के पूर्व मुख पर

(शक सं० १४५९)

इ मोद्दल...तत्संवत्सरदलु गेरसोप्पेय चवुडिसट्टिरिगे हूविन चेन्नय्यनु कोट धर्मसाधनद सम्बन्ध नम्म क्षेत्रवु अड हाकिरलागि नीवु आक्षेत्रवनु बिडिसि को.............. ॥

[चेनय्य माली (हूविन) ने चवुडि सेट्टि को यह 'धर्म-साधन' दिया कि 'आपने मेरी जमीन रहन से मुक्त की है इसलिए मैं ' ।]

१०३ (२२८)

उसी मण्डप में तृतीय स्तम्भ के पूर्व मुख पर

(शक सं० १४३२)

सखवरुष१४३२ डनेय शुक्लसंवत्सरद वैशाख् व० १०लू मण्डलेश्वरकुलो ङ्ग चङ्गाल्वमहदेवमहीपालन प्रधानसिरोमणि केशव-नाथ-वर-पुत्र कुल-पवित्रं जिनधर्म्मसहायप्रतिपालकरह बोम्मयणमन्त्रिसहोदररह सम्यक्तचूडामणि चेन्नबोम्मरसन नञ्जरायपट्टणद श्रावकभव्यजनङ्गल गोष्टिसहाय श्री गुम्मटस्वा- मिय बलिवाडव जीर्णोद्धारव माडिसिदरु श्री ॥

[मण्डलेश्वर कुलोत्तुंग चङ्गाल्व महदेव महीपाल के प्रधान मन्त्री, केशवनाथ के पुत्र, बोम्मण मन्त्री के भ्राता चन्न बोम्मरस व नञ्जराय पट्टण के श्रावकों ने गोम्मट स्वामी के 'बलिवाड' (? ऊपर की मञ्जिल) का जीर्णोद्धार कराया ।]

१०४ (१८५)

गोम्मटेश्वर के दक्षिण की ओर कूष्माण्डिनी के पादपीठ पर

(लगभग शक सं० ११००)

श्रीनयकीर्त्ति सिद्धान्त-चक्रवर्त्तिगल शिष्यरु श्रीबाल-चन्द्रदेवर गुड्ड केतिसेट्टिय मग बम्मिसेट्टि माडिसिद यक्षदेवते॥

[नयकीर्त्ति सिद्धान्त चक्रवर्त्ति के शिष्य बालचन्द्र देव के शिष्य बम्मि सेट्टि, केटि सेट्टि के पुत्र, ने यह यक्ष देवता प्रतिष्ठित कराया ।]

१०५ (२५४)

सिद्धरबस्ती में उत्तर की ओर एक स्तम्भपर

(शक सं० १३२०)

(पश्चिम मुख)

श्रीमत्परमगम्भीरस्याद्वादामोघलाञ्छनं ।
जीयात्त्रैलोक्यनाथस्य शासनं जिनशासनं ॥ १ ॥
श्रीनाभेयोऽजितःशम्भव-नमिविमलास्सुव्रतानन्तधर्म्मा-
श्चन्द्राङ्कश्शान्तिकुन्थू ससुमतिसुविधिश्शीतलो वासुपूज्यः ।
मल्लिश्श्रेयस्सुपार्श्वौ जलजरुचिररोनन्दनः पार्श्वनेमी
श्रीवीरश्चेति देवा भुवि ददतु चतुर्व्विंशतिर्म्मङ्गलानि ॥ २ ॥
वीरो विशिष्टां विनताय रातीमिति त्रैलोकैरभिवर्ण्ण्यते यः
निरस्तकर्म्मा निखिलार्त्थवेदी
पायादसौ पश्चिमतीर्त्थनाथः ॥३॥

तस्याभवन् सदसि वीरजिनस्य सिद्ध-
सम्प्रद्धयो गणधराः किल रुद्रसङ्ख्याः ।
ये धारयन्ति शुभदर्शनबोधवृत्ते
मिथ्यात्रयादपि गणान् विनिवर्त्य विश्वान् ॥४॥

इन्द्राग्नि भूतीअपि **वायुभूतिरकम्पनो मौर्य्य सुध-
र्म्म**पुत्राः ।
मैत्रेयमौण्ड्यौपुनर**न्धवेलः प्रभासक**श्चेति तदीय-
संज्ञाः ॥५॥

पूर्व्वज्ञानिह वादिनोऽवधिजुषो धीपर्य्ययज्ञानिनः
सेवे वैक्रियकांश्च शिक्षकयतीन्कैवल्यभाजोऽप्यमून् ।
इत्यग्न्यम्बुनिधित्रयोत्तरनिशानाथास्तिकायैश्शतै
रुद्रोनैकशताचलैरपि मितान्सप्तैव नित्यं गणान् ॥६॥

सिद्धिं गते वीरजिनेऽनुबद्ध-केवल्यभिख्यास्त्रयएव जाताः ।
श्री**गौतमस्तौ** च **सुधर्म्मजम्बू** यैः केवली वै तदिहानु-
बद्धं ॥७॥

जानन्ति **विष्णुरपराजितनन्दिमित्रौ
गोवर्द्ध**नेन गुरुणा सह **भद्रबाहुः** ।
ये पञ्चकेवलिवदप्यखिलं श्रुतेन
शुद्धा ततोऽस्तु मम धीः श्रुतकेवलिभ्यः ॥८॥

विद्यानुवादपठने स्वयमागताभि-
र्व्विद्याभिरात्मचरितादमलादभिन्नाः ।

पूर्व्वाणि ये दशपुरूण्यपि धारयन्ति

तान्नौम्यभिन्नदशपूर्व्वधरान् समस्तान् ॥९॥

तेष्वत्रियः प्रोष्ठिल गङ्गदेवौ

जयस्सुधर्म्मा विजयो विशाखः।

श्रीबुद्धिलोऽन्यौ धृतिषेणनागौ

सिद्धार्त्थकश्चेत्यभिधानभाजः ॥१०॥

नक्षत्रपाण्डू जयपालकंसा-

चार्य्यावपि श्रीद्रुमषेणकश्च।

एकादशाङ्गधरणेन रूढा ये पञ्च तेऽमी हृदि मे वसन्तु ॥११॥

आचार-संज्ञाङ्ग-भृतोऽभवंन्ते

लोहस्सुभद्रो जयपूर्व्वभद्रः।

तथा यशोबाहुरमी हि मूल-

स्तम्भा जिनेन्द्रागमरत्नहर्म्म्ये ॥ १२ ॥

श्रीमान्कुम्भो विनीतो

हलधरवसुदेवाचला मेरुधीरः

सर्व्वज्ञः सर्व्वगुप्तो

महिधर-धनपालौमहावीरवीरौ।

इत्याद्यानेक सूरिष्वथ सुपदमुपेतेषु दीव्यत्तपस्या-

शास्त्राधारेषु पुण्यादजनि सजगतां

कोण्डकुन्दो यतीन्द्रः ॥ १३ ॥

रजोभिरस्पृष्टतमत्वमन्तर्ब्बाह्ये ऽपि संव्यञ्जयितुं यतीशः।

रजः पदं भूमितलं विहाय चचार मन्ये चतुरङ्गुलं सः ॥१४॥

श्रीमानुमास्वातिरयं यतीश-

स्तत्वार्त्थसूत्रं प्रकटीचकार ।

यन्मुक्तिमार्ग्गाचरणोद्यतानां पाथेयमर्घ्यं भवति प्रजानां॥१५॥

तस्यैव शिष्योऽजनि **गृद्ध्रपिञ्छ**-द्वितीयसंज्ञस्य बलाक-

पिञ्छः ।

यत्सूक्तिरत्नानि भवन्ति लोके

मुक्त्यङ्गनामोहनमण्डनानि ॥ १६ ॥

समन्तभद्रस्स चिराय जीयाद्वादीभवज्राङ्कुशसूक्तिजालः ।

यस्य प्रभावात्सकलावनीयं वन्ध्यास दुर्व्वादुकवा

र्त्तयापि ॥ १७ ॥

स्यात्कार-मुद्रित-समस्त-पदार्त्थ-पूर्ण्णं

त्रैलोक्य-हर्म्म्यमखिलं स खलु व्यनक्ति ।

दुर्व्वादुकोक्तितमसा पिहितान्तरालं

सामन्तभद्र-वचन-स्फुट-रत्नदीपः ॥ १८ ॥

तस्यैव शिष्य**श्शिवकोटि**सूरिस्तपो लतालम्बनदेहयष्टिः ।

संसार-वाराकर-पोतमेतत्तत्वार्त्थसूत्रं तदलञ्चकार ॥ १६ ॥

प्रागभ्यधायि गुरुणा किल **देवनन्दी**

बुद्ध्या पुनर्व्विपुलया स **जिनेन्द्रबुद्धिः** ।

श्री**पूज्यपाद**इति चैष बुधैः प्रचख्ये

यत्पूजितः पदयुगे वनदेवताभिः ॥ २० ॥

भट्टाकलङ्कोऽकृत सौगतादिदुर्व्वाक्यपङ्कैस्सकलङ्कभूतं ।

जगत्स्वनामेव विधातुमुच्चैः सार्थं समन्तादकलङ्कमेव ॥२१॥

जीयाज्जगत्यां **जिनसेनसूरि**र्य्यस्योपदेशोज्ज्वलदर्प्पणेन ।
व्यक्तीकृतं सर्व्वमिदं विनेयाः पुण्यं पुराणं पुरुषा विदन्ति ॥ २२ ॥

विनय-भरण-पात्रं भव्यलोकैकमित्रं
विबुधनुतचरित्रं तद्गणेन्द्राग्रपुत्रं ।
विहितभुवनभद्रं वीतमोहोरुनिद्रं
विनमत **गुणभद्रं** तीर्ण्णविद्यासमुद्रं ॥ २३ ॥

सद्व्यञ्जनस्वरनभस्तनु लक्षणाङ्ग-
च्छिन्नाङ्ग-भौम-शकुनाङ्ग-निमित्तकैर्य्यः ।
कालत्रयेऽपि सुखदुःखजयाजयाद्य
तत्साक्षिवत्पुनरवैति समस्तमेव ॥२४॥

यः **पुष्पदन्ते**न च **भूतबल्या**ख्येनापि शिष्य-द्वितयेन रेजे ।
फलप्रदानाय जगज्जनानां प्राप्तोऽङ्कुराभ्यामिव कल्पभूजः ॥२५॥

अर्हद्बलि स्सङ्घचतुर्व्विधं स श्रीकोण्डकुन्दान्वयमूलसङ्घं ।
कालस्वभावादिह जायमानद्वेषेतराल्पीकरणाय चक्रे ॥२६॥

सिताम्बरादौ विपरीत-रूपे खिले विसङ्घे वितनोतु भेदं ।
तत्सेन-नन्दि-त्रिदिवेश-सिंहसङ्घेषु यस्त मनुते कुदृक्सः ॥२७॥

सङ्घेषु तत्र गणगच्छ-बलि-त्रयेण
लोकस्य चक्षुषि मिदाजुषि नन्दिसङ्घ

देशीगणे धृतगुणेऽन्वितपुस्तकाच्छ-
गच्छेऽङ्गुलेश्वरवलिर्ज्जयति प्रभूता ॥२८॥

तत्रासन्नाग-देवोदय-रवि जिन - मेघ - प्रभा-बाल-
चन्द्रा

देवश्रो-भानुचन्द्रश्रुतनय गुणधर्म्मादयः कीर्त्तिदेवाः।

देश-श्रीचन्द्र-धर्म्मेन्द्र-कुल-गुण-तपो भूषणास्सुर-
योऽन्ये

विद्या दामेन्द्रपद्मामरवसु-गुण-माणिक्कनन्द्या
ह्वयाश्च ॥२९॥

(उत्तर मुख)

विहितदुरितभङ्गा भिन्नवादीभशृङ्गा
वितत-विविध-मङ्गाः विश्वविद्याब्जभृङ्गाः ।

विजितजगदनङ्गावेशदूरोज्झलाङ्गा
विशदचरणतुङ्गा विश्रुतास्तेऽस्तसङ्गाः ॥३०॥

जीयाच्छ्रीनेमिचन्द्रःकुवलयलयकृत् कूटकोटीद्धगोत्रो
नित्योद्यन्दृष्टिबाधाविरचनकुशलस्तत्प्रभाकृत्प्रतापः ।
चन्द्रस्येव प्रदत्तामृत-वचन-रुचा नीयते यस्य शान्ति
धर्म्मव्याजस्य नेतुस्स्वमभिमतपदं यश्च नेमी रथस्य ॥३१॥

श्रीमाघनन्दी विबुधो जगत्यामन्वर्थमेवातनुतात्मनाम ।
समुल्लसत्संवरनिर्ज्जरेण न येन पापान्यभिनन्दितानि ॥३२॥

तुङ्गे तदीये धृत-वादिसिंहे गुरुप्रवाहोन्नतवंशगोत्रे ।

अथोदितोऽभून्निजपादसेवाप्रमोदिलोकोऽभयचन्द्रदेवः
॥ ३३ ॥

जयति जिततमोऽरिस्त्यक्तदोषानुषङ्गः
पदमखिलकलानांपात्र-मम्भोरुहायाः ।
अनुगतजयपत्तश्चात्तमित्रानुकूल्य-
स्सततमभयचन्द्रस्सत्सभारत्नदीपः ॥३४॥

तदीयतनुजश्श्रुतमुनिर्गणाग्रपदेशस्तपोभरनियन्त्रिततनुस्स्तु-
तजिनेशः ।
ततोऽजनि जिनेन्द्रवचनाम्तविषयाशस्तवस्वयशसाभृत-
समस्तवसुधाशः ॥३५॥

भव-विपिनकृशानुर्भव्यपङ्केजभानु-
स्स विततनमसोतु स्सम्पदे कामधेनुः ।
भुविदुरिततमोऽरिप्रोत्थसन्तापवारि-
श्रुतमुनिवरसूरिश्शुद्धशीलोऽस्तनारिः ॥३६॥
चण्डोद्दण्डत्रिदण्डं परम-सुख-पद पापबीजं परागो-
वारागारोरुकार-त्रिविधमधिकृता गौरवं गारवं च ॥
तुल्यंभल्लोन-शल्य-त्रयमतुलवपुश्शर्म्ममर्म्मच्छिदं द्वा-
भापोन्मेपि त्रिदोपं श्रुतमुनिमुनिपो निर्म्मुमोचैक एव ॥३७॥
प्रशिष्यभगणेन्द्रमहसा भुवितदीये प्रवर्द्धयति पूर्ण्णकलइन्दु-
रिवयस्स ।
अनादिनिधनादि-परमागम-पयोधिमभूदभिनवश्रुतमुनि-
र्गणाग्रपदे सः ॥३८॥

मार्गे दुर्गे निसर्गात्प्रतिभटकटुजल्पेन वादेन वापि
श्रव्ये काव्येऽतिनव्ये मृदुमधुरपदैः शर्म्मदैर्न्नर्म्मदैश्च ।
मन्त्रे तन्त्रेऽपि यन्त्रे नुतसकलकलायां च शब्दार्णवे वा
को वान्यः कोविदोऽस्ति **श्रुतमुनि**मुनिवद्विश्व-विद्या-
विनोदः ॥३९॥

शब्दे श्री **पूज्यपादः** सकल-विमत-जित्तर्क्कतन्त्रेषु**देवः**
सिद्धान्ते सत्यरूपे जिन-विनिगदिते **गौतमः कोण्डकुन्दः**।
अध्यात्मे **वर्द्धमानो** मनसिज-मथने वारिमुग्दुःखवन्हा-
वित्येवं कीर्त्तिपात्रं **श्रुतमुनि**वदभूद्भूत्रये कोऽत्र कश्चित्
॥४०॥

श्रद्धां शुद्धां प्रवृद्धां दधतमधिकृतां जैनमार्गे सुसर्गे
सिद्धिं बुद्धेर्म्महद्भिर्ब्बुध-वर-निवहैरद्भुतामर्त्यमानां ।
मित्रं चित्रं चरित्रं भवचय-भयदं भव्यनव्याम्बुजाना-
मप्येनोव्यूनमेनं **श्रुतमुनि**-मुनिपं चन्द्रमाराधयध्वं ॥४१॥
श्रीमानितोऽस्याभय**चन्द्रसू**रेस्तस्यानुजात [श्] **श्रुतकीर्त्ति-
देवः** ।
अभूज्जिनेन्द्रोदितलक्षणानामापूर्णलक्षीकृत-चारु-वृत्तः ॥४२॥
विदित-सकलवेदे वीत-चेतो-विषादे
विजित-निखिल-वादे विश्वविद्याविनोदे ।
विततचरितमोदे विस्फुरच्चित-प्रसादे
विनुत-जिनप-पादे विश्वरक्षां प्रपेदे ॥४३॥
स श्रीमांस्तत्तनूजस्तदनु गणिपदे सन्न्यधाच्च**चारुकीर्त्तिः**

कीर्त्याकीर्णत्रिलोक्या मुहुरयति विधुः कार्श्यमद्याप्यतुल्यः।

(तृतीय मुख)

यस्योपन्यास-वन्य-द्विप-पटु-घटयोत्पाटिताश्चाटुवाचः
पद्मामद्मात्तमित्रोज्वलतररुचयोऽप्युद्दिधताशादिपद्मा : ॥४४॥
चारुश्रीश्चारुकीर्त्तिः पदनतवसुधाधोश्वरोऽधोश्वरोऽयं
गर्व्वं कुर्व्वन्तमुर्व्वीश्वर-सदसि महावादिनं वादवन्ध्यं ।
चक्रे दिक्कोडदभ्रेसरसरसवचाः साधिताशेषसाध्यो
ऽवेद्यावेद्याद्यविद्याव्यपगमविलसद्विश्वविद्याविनोदः ॥४५॥
बल्लाल-चोणिपालं वलित-वलि-बल वाजिभिर्व्वेजिताजि
रोगावेगाढ्तासु स्थितिमपि स हसोल्लाघतामानिनाय ।
आतीर्थ्यैव स्वयं सोऽखिलविदभयसूरेस्तथातारयत्त-
न्निस्सीमाशेष-शास्त्राम्बुनिधिमभयसूरिं परं सिंहणार्य्यं
॥४६॥

शिष्टो दुष्टाघ-पिष्टी-करण-निपुण-सूत्रस्य तस्योपदेष्टु-
श्शिष्यः पीयूष-निष्यन्दन-पटु-वचनः पण्डितः खण्डिताघः ।
सूरिस्सूरो विनेयाम्बुरुहविकसने सर्व्वदिग्व्यापिधामा
श्रीमानस्थात्कृतास्थो बेलुगुलनगरे तत्र धर्म्माभिवृद्ध्यै ॥४७॥
यस्मिंश्चामुण्डराजो भुजवलिनमिनं गुम्मटं कर्म्मठाङ्गं
भक्त्या शक्त्या च मुक्त्यैजित-सुर-नगरे स्थापयद्भद्रमद्रौ ।
तद्वत्काल-त्रयोत्थोज्वल-तनु-जिन-विम्बानि मान्यानि चान्यः
कैलासे शीलशाली त्रिभुवन-विलसत्कीर्त्ति-चक्रीव चक्रे ॥४८॥
स्थाने तत्स्थानमन्त्रोज्वलतरमतुलं पण्डितोऽलङ्करोतु

श्रीमानेषोऽर्क्ककीर्त्तिर्न्नृप इव विलसत्सालसोपानकाद्यैः।
चित्रं शीर्षेऽभिषिच्य त्रिभुवनतिलकं तं पुनस्सप्तवारान्
पट्टोन्मुक्तं विधायाखिलजगदुरुपुण्यैस्तथालञ्चकार ॥४९॥
किंवा क्षीराभिषेकाद्भुतनिजयशसो निर्म्मलाच्छङ्कराद्रीन्
गोत्राद्रीन्स्फाटिकीं च क्षितिममरगजान्दिग्गजानेष धीरः।
क्षीरोदान्सप्तसिन्धूनुदरिजलधरान्शारदान्नागलोकं
शेषाकीर्न्न विदीर्न्नामृतकलशमपि स्वर्व्वितेने न चित्रः ॥५०॥
मेरौ जन्माभिषेकं सुरपतिरिव तत्तथैवात्र शैले
देवस्यादर्शयन्नो परमखिलजनस्यैष सूरिर्व्विधाय।
सन्मार्ग्गं चाधुनैनं पिहितमपि चिरं वामदृग्वाक्तमोभि-
स्त्रिंशो तानि पूर्व्वं पुरुरिव पुनरत्राकलङ्कोऽपनीय ॥५१॥
रे रे **काणाद** कोणं शरणमधिवस क्षुद्रनिद्रानिवासं
मैमांसच्छामतुच्छां त्यज निजपटुवादेषु कृच्छ्राशुगच्छ।
बौद्धाबुद्धे विमुग्धोऽस्यपसर सहसा **साङ्ख्य**मारब्ध सङ्ख्ये
श्रीमान्मथ्नाति वादीन्द्रगजमभय**सूरिः** परं वादिसिंहः ॥५२॥
ऐश्वर्य्यं वहतश्च शाश्वतसुखे धत्तश्च सर्व्वज्ञतां
बिभ्राते च गिरीशतां शिवतया श्री**चारुकीर्त्ती**श्वरौ।
तत्रायं जिनभागसावजिनभाग्धीमानयं मार्ग्गणे
हेमाद्रिं समधत्त मार्ग्गणमुरुस्थेमा स हेमाचले ॥५३॥
स्फूर्ज्जद्धूर्ज्जटि-भाल-लोचन-शिखि-ज्वालावलीढस्य ते
हं हो मन्मथजीवनौषधिरभूदेषा पुरा शैलजा।

सर्व्वज्ञोत्तम**चारुकीर्त्ति**सुमुनेस्सम्यक्तपो-वह्निना
निर्दग्धस्य चरित्रचण्डमरुतोद्धूतस्य का ते गतिः ॥५४॥
पितामहपरिष्वङ्गसङ्गतेनःप्रशान्तये ।
चारुकीर्त्तिवचोगङ्गालिङ्गिताङ्गी सरस्वती ॥५५॥
आस्यं वाणीनिवास्यं हृदयमुरुदयं स्वं चरित्रं पवित्रं
देहं शान्त्यैकगेहं सकलसुजनतागण्यमुद्भूत-पुण्यं ।
अन्या भव्या गुणालिन्निखिलबुधवतेर्य्यस्य सोऽयं जगत्यां
अत्यारूढप्रसादो जयतु चिरमयं **चारुकीर्त्ति**व्रतीन्द्रः ॥५६॥
मूढं प्रौढं दरिद्रं धनपतिमधमं मानवं मानवन्त
दुष्टं शिष्टं च दुःखान्वितमपि सुखिनं दुर्म्मद धर्म्मशीलं ।
कुर्व्वन् **सामन्तभद्रं** चरितमनुसरन्नत्र सामन्तभद्रं ।
(चतुर्थमुख)
तन्वन् श्री**चारुकीर्त्ति**र्जगति विजयते चन्द्रिका-चारु-
कीर्त्तिः ॥५७॥
रे रे **चार्व्वाक** गर्व्वं परिहर विरुदालिं पुरैव प्रमुञ्च
साङ्ख्यासङ्ख्येय-राजत्परिकर-निकरादात्तघट्टोऽसि
भट्ट ।
पूर्ण्णं **काणाद** तूर्ण्णं त्यज निजमनिशं मानमापन्निदानं
हिंसन्पुंसोऽभिशंस्यो व्रजवियदपरान्वादिनः**सिंहणार्य्यः**
॥५८॥
सत्पण्डिताङ्घ्रनुरतौ तदिलादिनाथौ
सम्यक्त्व-बोध-चरणोत्रवदाननिष्ठौ,

जातावुभौ **हरियणो** हरिणाङ्कचारु-
म्माणिक्कदेवइतिचा**र्जुन**देवकल्पः ॥५९॥

धन्या मन्ये न सन्यासपरमविधिना नेतुमेव स्वयं स्वं
धर्म्मं कर्म्मारिमर्म्मच्छिदमुरुसुखदं दुर्ल्लभं वल्लभं च।
शान्ताश्शान्तेर्न्नि शान्तीकृत-सकल-जनाः सूक्तिपीयूषपूरै-
स्तेऽमी सर्व्वेऽस्तदेहास्सुरपदमगमन्ध्यात-जैनेन्द्र-पादाः ॥६०॥

तत्र **त्रयोदशशतैश्च दशद्वयेन**
शाकेऽब्दके परिमितेऽभवदीश्वराख्ये।
माघे चतुर्द्दशतिथौ सितभाजिवारे
स्वातौ शनेस्सुरपदं **पुरु** पण्डितस्य ॥६१॥

आसीदथाभिनव**पण्डितदेव**सूरि-
राशाननाच्छमुकुरीकृत कीर्त्तिरेषः।
शिष्ये निधायनिजधर्म्मधुरीणभावं
यत्रात्मसंस्कृतिपदेऽजनि **पण्डितार्य्यः** ॥६२॥

तथ्यं मिथ्या-कदम्बं सततमपि विधिस्सुर्व्वृथा ताम्यसीदं
तत्वं ताथागतत्वं तरलजनशिरोरत्नतावत्प्रधाव।
जीवं भद्राणि पश्यत्युरुजगदुदितात्त्यक्तवादाभिलाषो
यस्माद्भसीकरोत्यग्निरिव भुवितरून्वादिनः **पण्डितार्य्यः**
॥६३॥

संसारापारवाराकर-धर-लहरी-तुल्य-शल्योत्थ-देह-
व्यूहे मुह्यज्जनानामसुखजलचरैरर्द्दितानाममीषां।

पांतो नीतो विनीतोऽद्भुततिगतवन्नन्यभव्याचि ताङ्घ्रि-
र्भद्रोन्निद्रस्सुमुद्रस्सततम **भिनवो**राजते **पण्डिताग्र्यः** ॥६४॥
श्रयमथ गुरुभक्त्याकारयत्तन्निषद्या-
मपरगणिभिरुच्चैर्गोष्ठिभिस्तैस्सहैव ।
शुभ-दिन-सुमुहूर्त्ते पूरितोद्घाखिलाशं
युगपदखिलवाद्यध्वानरत्नप्रदानैः ॥६५॥
इत्यात्मशक्त्या निजमुक्तयेऽर्हं **द्दासो**दितं शासनमेतदुर्व्यां ।
शास्त्रौघकर्तृ-त्रयशंसनाङ्कमाचन्द्रतारा-रविमेरु जीयात्॥ ६६ ॥

१०६ (२५५)

उपर्युक्त लेख के नीचे

(शक सं० १०३१)

श्रीमत्कर्णाटदेशे जयति पुरवरं **गङ्गवत्याख्यमेतत्**
सद्दृक्दानापवासव्रतरुचिरभवत्तत्र **माणिक्यदेवः** ।
वाचायी धर्म्मपत्नी गुणगणवसतिस्तस्य सूनुस्तयोश्च
श्रीमान्**मायण्ण**नामाजनि गुणमणिभाक् **चन्द्रकीर्त्तेश्च**
शिष्यः ॥ १ ॥

सम्यक्त्वचूडामणियेनिसिद **आभव्योत्तमनु** स्वस्ति श्री शक
वरुष १३३१ नेय **विरोधिसंवत्सरद चैत्र ब ५ गु** श्री
गुम्मटनाथन मध्याह्नद अष्टविधार्च्चना निमित्तवागि **बेलुगुलद**
गङ्गसमुद्रद केरेय केलगे दानशालेय गद्दे ख २ गवनू **बेलुगुलद**
माणिक्यनखरद **हरियगौडन** मग गुम्मटदेव **माणिक्यदेवन**

मग बोम्मणननोळगाद गौडुगल समचदलि देवरिगे पादपूजेय माडि क्रयवागि कोण्डु कोट्टु असाधारणवहन्त कीर्त्तियनू पुण्य-वनू उपार्ज्जिसि कोण्डनु मङ्गलमहा श्री श्री श्री ॥

[कर्नाट देश की गङ्गवती नामक नगरी में माणिक्यदेव और उनकी भार्या बाचायि रहते थे। इनके मायण्ण नामक पुत्र हुआ जो चन्द्र-कीर्त्ति का शिष्य था। मायण्ण ने उक्त तिथि को बेल्गुळ के गङ्गसमुद्र नामक सरोवर की दो खण्डुग भूमि खरीद कर उसे गोम्मट स्वामी के अष्टविध पूजन के लिये बेल्गुळ के कई पुरुषों के समक्ष दान की।]

१०७ (२५६)

उपर्युक्त लेख के नीचे

(लगभग शक सं० ११०३)

शीलदि चन्द्रमौलिविभुवाचलदेवि निजोद्घकान्तेया-
लोलमृगाचि बेल्गुलद गुम्मटनाथन पादद-
र्च्चालिगे वेडे बेक्कन शीमेयनित्तनुदारवीरब-
ल्लाल-नृपालकनुर्व्वियुमब्धियुमुल्लिनमेटद्दे सल्विनं ॥ १ ॥

अन्तु धारापूर्व्वकवं माडिकोटन्त ग्रामसीमे। मूड होन्नेन-हल्लि तेङ्क बस्तिहल्लि देवरहल्लि पडुव चोलेनहल्लि हाडोनहल्लि

(पूर्व मुख के नीचे)

बडग मञ्चेनहल्लिय बिट्टु कोट ग्रामौ आचन्द्रार्कस्थायियागि सल्लुगे मङ्गलमहा श्री श्री श्री ॥

[चन्द्रमौलि की पत्नी आचल देवी की प्रार्थना पर वीरबल्लाल नृप ने 'बेक्क' नामक ग्राम का दान गोम्मटनाथ के पूजन के हेतु किया। लेख में ग्राम की सीमा दी हुई है।

नोट—आचल देवी के अन्य अनेक दानों का उल्लेख शक सं० ११०३ के लेख न० १२४ (३२७) में है। अतएव प्रस्तुत लेख का समय भी शक स० ११०३ के लगभग होना चाहिये। पर आश्चर्य यह है कि यह लेख इससे बहुत पीछे के दो लेखों (न० १०९ और १०६) के नीचे खुदा हुआ है। लिपि भी इसकी उतनी पुरानी प्रतीत नहीं होती। सम्भव है कि किसी आधार पर लेख पीछे से ही लिखा गया हो।]

१०८ (२५८)

सिद्धरबस्ती में दक्षिण ओर एक स्तम्भ पर

(शक सं० १३५५)

(प्रथममुख)

श्री जयत्यजय्यमाहात्म्यं विशासितकुशासनं।
शासनं जैनमुद्भासि मुक्तिलक्ष्म्यैकशासनं ॥ १ ॥
अपरिमितसुखमनल्पावगममयं प्रबलबलहृतातङ्कं।
निखिलावलोकविभवं प्रसरतु हृदये परं ज्योति. ॥ २ ॥
उद्दीप्ताखिलरत्नमुद्धृतजडं नानानयान्तर्गृहं
सस्यात्कारसुधाभिलिप्तिजनिभृत्कारुण्यकूपोच्छ्रितं।
आरोप्य श्रुतयानपात्रममृतद्वीपं नयन्तः परा-
नेते तीर्थकृतो मदीयहृदये मथ्यंभवाब्ध्यासतां ॥ ३ ॥
तत्राभवत् त्रिभुवनप्रभुरिद्धवृद्धिः
श्रीवर्द्धमानमुनिरन्तिम-तीर्थनाथः।
यद्देहदीप्तिरपि सन्निहिताखिलाना
पूर्व्वोत्तराश्रितभवान् विशदीचकार ॥ ४ ॥

तस्याभवच्चरमचिज्जगदीश्वरस्य
यो यौव्वराज्यपदसंश्रयतः प्रभूतः ।
श्री**गौतमो**गणपतिर्भगवान्वरिष्ठः
श्रेष्ठैरनुष्ठितनुतिर्म्मुनिभिस्स जीयात् ॥ ५ ॥

तदन्वये शुद्धिमति प्रतीते समग्रशीलामलरत्नजाले ।
अभूद्यतीन्द्रो भुवि **भद्रबाहुः** पयःपयोधाविव पूर्ण्ण-
चन्द्रः ॥ ६ ॥

भद्रबाहुरग्रिमः समग्रबुद्धिसम्पदा
शुद्धसिद्धशासनं सुशब्द-बन्ध-सुन्दरं ।
इद्धवृत्तसिद्धिरत्र बद्धकर्म्मभित्तपो-
वृद्धिवर्द्धितप्रकीर्त्तिरुद्दधे महर्द्धिकः ॥ ७ ॥

यो **भद्रबाहुः** श्रुतकेवलीनां मुनीश्वराणामिह पश्चिमोऽपि ।
अपश्चिमोऽभूद्विदुषां विनेता सर्व्वश्रुतार्त्थप्रतिपादनेन ॥ ८ ॥

तदीय-शिष्योऽजनि **चन्द्रगुप्तः** समग्रशीलानतदेववृद्धः ।
विवेश यत्तीव्रतपःप्रभाव-प्रभूत-कीर्त्तिर्भ्भुवनान्तराणि ॥ ९ ॥

तदीयवंशाकरतः प्रसिद्धादभूददोषा यतिरत्नमाला ।
बभौ यदन्तर्म्मणिवन्मुनीन्द्रस्स **कुण्डकुन्दो**दित-चण्ड-
दण्डः ॥ १० ॥

अभूदु**मास्वाति**मुनिः पवित्रे वंशे तदीये सकलार्त्थवेदी ।
सूत्रीकृतं येन जिनप्रणीतं शास्त्रार्त्थजातं मुनिपुङ्गवेन ॥११॥
स प्राणिसंरक्षणसावधानो बभार योगी किल गृद्धपक्षान् ।

तदा प्रभृत्येव बुधा यमाहुराचार्य्यशब्दोत्तरगृद्ध-
पिञ्छं ॥ १२ ॥

तस्मादभूद्योगिकुलप्रदीपो **बलाकपिञ्छः** स तपो-
महर्द्धि. ।

यदङ्गसंस्पर्शनमात्रतोऽपि वायुर्व्विषादीनमृतीचकार ॥ १३ ॥

समन्तभद्रोऽजनि भद्रमूर्त्तिस्तत. प्रणेता जिनशासनस्य ।

यदीयवाग्वज्रकठारपातश्चूर्णीचकार प्रतिवादिशैलान् ॥१४॥

श्री **पूज्यपादो** धृतधर्म्मराज्यस्ततो सुराधीश्वर-पूज्य-
पादः ।

यदीयवैदुष्यगुणानिदानीं वदन्ति शास्त्राणि तदुद्धृतानि ॥१५॥

धृतविश्वबुद्धिरयमत्र योगिभिः
कृतकृत्यभावमनुविभ्रदुच्चकैः ।

जिनवद्बभूव यदनङ्गचापहृत
स जिनेन्द्रबुद्धिरिति साधुवर्ण्णित. ॥ १६ ॥

श्रीपूज्यपादमुनिरप्रतिमौषधर्द्धि-
र्ज्जीयाद्विदेहजिनदर्शनपूतगात्रः ।

यत्पादधौतजलसंस्पर्श'प्रभावा-
त्कालायसं किल तदा कनकीचकार ॥ १७ ॥

ततः परं शास्त्रविदां मुनीना
मग्रेसरोऽभूद**कलङ्कसूरिः** ।

मिथ्यान्धकारस्थगिताखिलार्त्थाः
प्रकाशिता यस्य वचोमयूखैः ॥ १८ ॥

तस्मिन्गते स्वर्ग्गभुवं महर्षौ दिवःपतीन्नर्त्तुमिव प्रकृष्टान् ।
तदन्वयोद्भूतमुनीश्वराणां बभूवुरित्थं भुवि सङ्घभेदाः ॥१९॥

स योगिसङ्घश्चतुरः प्रभेदानासाद्य भूयानविरुद्धवृत्तान् ।
बभावयं श्रीभगवान्जिनेन्द्रश्चतुर्म्मुखानीव मिथस्समानि ॥२०॥

देव-नन्दि-सिंह-सेन-सङ्घभेदवर्त्तिनां
देशभेदतः प्रबोधभाजि देवयोगिनां ।
वृत्ततस्समस्ततोऽविरुद्धधर्म्मसेविनां
मध्यतः प्रसिद्ध एष **नन्दिसङ्घ** इत्यभूत् ॥ २१ ॥

नन्दिसङ्घे स**देशीय**गणे गच्छे च **पुस्तके** ।
इंगुलेशबलिर्ज्जीयान्मङ्गलीकृतभूतलः ॥ २२ ॥

तत्र सर्व्वशरीरिरक्षाकृतमतिर्व्विजितेन्द्रिय-
स्सिद्धशासनवर्द्धनप्रतिलब्ध-कीर्त्तिकलापकः ।
विश्रुत-**श्रुतकीर्त्ति**-भट्टारकयतिस्समजायत
प्रस्फुरद्वचनामृतांशुविनाशिताखिलहृत्तमाः ॥ २३ ॥

कृत्वा विनेयान्कृतकृत्यवृत्तोन्निधाय तेषु श्रुतभारमुच्चैः ।
स्वदेहभारं च भुवि प्रशान्तस्समाधिभेदेन दिवं स भेजे ॥२४॥

(द्वितीयमुख)

गते गगनवाससि त्रिदिवमत्र यस्योच्छ्रिता
न वृत्तगुणसंहतिर्व्वसति केवलं तद्यशः ।
अमन्दमदमन्मथप्रणमदुग्रचापोज्वल-
त्प्रतापहतिकृत्तपश्चरणभेदलब्धं भुवि ॥ २५ ॥

श्रीचारुकीर्त्तिमुनिरप्रतिमप्रभाव-
स्तस्मादभून्निजयशोधवलीकृताशः ।
यस्याभवत्तपसि निष्ठुरतोपशान्ति-
श्चित्ते गुणे च गुरुता कृशता शरीरे ॥ २६ ॥
यत्तपोवल्लिभिर्व्वेल्लिताबद्रुमो
वर्त्तयामास सारत्रयं भूतलं ।
युक्तिशास्त्रादिकं च प्रकृष्टाशय-
श्शब्दविद्याम्बुधेर्वृद्धिकृच्चन्द्रमाः ॥ २७ ॥
यस्य योगीश्विन. पादयोस्सर्व्वदा
सङ्गिनीमिन्दिरा पश्यतश्शार्ङ्गिणः ।
चिन्तयेवाभवत्कृष्णता वर्ष्मणः
नान्यथा नीलता किं भवेत्तत्तनोः ॥ २८ ॥
येषां शरीराश्रयतोऽपि वातो रुजः प्रशान्तिं विततान तेषां ।
वल्लालराजोत्थितरोगशान्तिरासीत्किलैतत्किमु
भेषजेन ॥ २९ ॥
मुनिर्म्मनीषा-बलतो विचारितं समाधिभेदं समवाप्य सत्तमः ।
विहाय देहं विविधापदां पदं विवेश दिव्यं वपुरिद्ध-
वैभवं ॥ ३० ॥
अन्तमायाति तस्मिन्कृतिनि यर्थ्य-
न्धिण नामविष्यत्तदा पण्डितयति-
स्सोमः वस्तुमिथ्यातमस्तोमपिहितं
सर्व्वमुत्तमैरित्ययं वक्तृभिरूपाघोषि ॥ ३१ ॥

विबुधजनपालकं कुबुध-मत-हारकं । ।
विजितसकलेन्द्रियं भजत तमलं बुधाः ॥ ३२ ॥

धवल-सरोवर-नगर-जिनास्पदमसदृशमाकृतवदुरु-
तपोमहः ॥ ३३ ॥

यत्पादद्वयमेव भूपतिततिश्चक्रे शिरोभूषणं
यद्वाक्यामृतमेव कोविदकुलं पीत्वा जिजीवानिशं ।
यत्कीर्त्या विमलं बभूव भुवनं रत्नाकरेणावृतं
यद्विद्या विशदीचकार भुवने शास्त्रार्थजातं महत् ॥ ३४ ॥

कृत्वा तपस्तीव्रमनल्पमेधास्सम्पाद्य पुण्यान्यनुपप्लुतानि ।
तेषां फलस्यानुभवाय दत्तचेता इवाप त्रिदिवं स योगी ॥३५॥

तस्मिन्जातो भूम्नि **सिद्धान्तयोगी**
प्रोद्यद्वाचा वर्द्धयन् सिद्धशास्त्रं ।
शुद्धे व्योम्नि द्वादशात्मा करौघै-
रर्थंद्रुत्पद्मव्यूहमुन्निद्रयन्स्वैः ॥ ३६ ॥

. दुर्व्वाधयुक्तं शास्त्रजातं विवेकी वाचानेकान्वार्थसम्भूतया यः ।
इन्द्रोऽशन्या मेघजालोत्थया भूवृद्धां भूभृत्संहतिं वा
बिभेद ॥ ३७ ॥

यद्वत्पदाम्बुजनतावनिपालमौलि-
रत्नांशवोऽनिशममुं विदधुः सरागं ।
तद्वन्न वस्तु न वधूर्न च वस्त्रजातं
नो यौव्वनं न च बलं न च भाग्यमिद्धं ॥ ३८ ॥

प्रविश्य शास्त्राम्बुधिमेष धीरो जग्राह पूर्व्वं सकलार्थरत्नं ।
परेऽमर्त्यास्तदनुप्रवेशादेकैकमेवात्र न सर्व्वमापुः ॥३९॥

सम्पाद्य शिष्यान्स मुनिः प्रसिद्धा-
नध्यापयामास कुशाग्रबुद्धीन् ।
जगत्पवित्रीकरणाय धर्म्म-
प्रवर्त्तनायाखिल संविदे च ॥ ४० ॥

कृत्वा भक्तिं ते गुरोस्सर्व्वशास्त्र
नीत्वा वत्सं कामधेनुं पयो वा ।
स्वीकृत्योच्चैस्तदपिवन्तोऽतिपुष्टाः
शक्तिं स्वेषां ख्यापयामासुरिद्धां ॥ ४१ ॥

तदीयशिष्येषु विदांवरेषु गुणैरनेकैश्श्रुतमुन्यभिख्यः ।
रराज शैलेषु समुन्नतेषु स रत्नकूटैरिव मन्दराद्रिः ॥ ४२ ॥

कुलेन शीलेन गुणेन मत्या शास्त्रेण रूपेण च योग्य एषः ।
विचार्य्य तं सूरिपदं स नीत्वा कृतक्रियं स्व
गणयाञ्चकार ॥ ४३ ॥

अथैकदा चिन्तयदित्यनेना स्थितिं समालोक्य निजायुषोऽल्पं ।
समर्प्य चास्मिन् स्वगणं समर्थे तपश्चरिष्यामि समाधि-
योग्य ॥ ४४ ॥

विचार्य्य चैवं हृदयं गणाग्रणीर्न्निवेदयामास विनेयबान्धवः ।
मुनिः समाहूय गणाग्रवर्त्तिनं स्वपुत्रमित्थं श्रुतवृत्त-
शालिनं ॥ ४५ ॥

(तृतीयमुख)

मदन्वयादेष समागतोऽयं गणो गुणानां पदमस्य रक्षा।
त्वयाङ्ग मद्वत्क्रियतामितीष्टं समर्प्पयामास गणी गणं
स्वं ॥ ४६ ॥

गुरुविरहसमुद्यद्दुःखदूनं तदीयं
मुखमगुरुवचोभिस्स प्रसन्नोचकार।
सपदि विमलिताब्द-श्लिष्ट-प्रांसु-प्रतानं
किमधिवसति योषिन्मन्दफूत्कारवातैः ॥ ४७ ॥

कृतितितिहितवृत्तस्सत्त्वगुप्तिप्रवृत्तो
जितकुमतविशेषश् शोषिताशेषदोषः।
जितरतिपति-सत्त्वस्तत्त्व-विद्या प्रभुत्व-
स्सुकृतफल-विधेयं सोऽगमद्दिव्यभूयं ॥ ४८ ॥

गतेऽत्र तत्सूरिपदाश्रयोऽयं
मुनीश्वरस्सङ्घमवर्द्धयत्तराम्।
गुणैश्च शास्त्रैश्चरितैरनिन्दितैः
प्रचिन्तयन्तद्गुरुपादपङ्कजम् ॥ ४९ ॥

प्रकृत्य कृत्यं कृतसङ्घरक्षो विहाय चाकृत्यमनल्पबुद्धिः।
प्रवर्द्धयन् धर्म्ममनिन्दितं तद्गुरूपदेशान् सफलीचकार ॥५०॥

अखण्डयदयं मुनिर्व्विमलवाग्भिरत्युद्धतान्
अमन्द-मद-सञ्चरत्कुमत-वादिकोलाहलान्।
भ्रमन्नमरभूमिभृद् भ्रमितवारिधिप्रोच्चलत्
तरङ्ग-ततिविभ्रम-ग्रहण-चातुरीभिर्भुवि ॥ ५१ ॥

का त्वं कामिनि कथ्यतां श्रुतमुनेः कीर्त्तिः किमागम्यते
ब्रह्मन् मत्प्रियसन्निभो भुवि बुधस्सम्मृग्यते सर्व्वतः ।
नेन्द्रः किं स च गोत्रभिद् धनपतिः किं नास्त्यसौ किन्नरः
शेषः कुत्रगतस्स च द्विरसनो रुद्रः पशूनां पतिः ॥ ५२ ॥

वाग्देवताहृदय-रञ्जन-मण्डनानि
मन्दार-पुष्प-मकरन्दरसोपमानि ।
आनन्दिताखिल-जनान्यमृत वमन्ति
कर्णेषु यस्य वचनानि कवीश्वराणां ॥ ५३ ॥

समन्तभद्रोऽप्यसमन्तभद्रः
श्री-पूज्यपादोऽपि न पूज्यपादः ।
मयूरपिञ्छोऽप्यमयूरपिञ्छ-
श्चित्रं विरुद्धोऽप्यविरुद्ध एष ॥ ५४ ॥

एवं जिनेन्द्रोदितधर्म्ममुच्चैः प्रभावयन्तं मुनि-वंश-दीपिनं ।
अदृश्यवृत्त्या कलिना प्रयुक्तो वधाय रोगस्समवाप
दूतवत् ॥ ५५ ॥

यथा खलः प्राप्य महानुभावं तमेव पश्चात्कवलीकरोति ।
तथा शनैस्सोऽयमनुप्रविश्य वपुर्व्वबाधे प्रतिबद्धवीर्य्यः ॥५६॥

अङ्गान्यभूवन् सकृशानि यस्य न च व्रतान्यद्भुत-वृत्त-भाजः ।
प्रकम्पमापद्वपुरिद्धरोगान्न चित्तमावश्यकमत्यपूर्व्वं ॥ ५७ ॥

स मोक्ष-मार्गे रुचिमेष धीरो मुदं च धर्म्मे हृदये प्रशान्ति
समादधे तद्विपरीतकारिण्यस्मिन् प्रसर्प्पत्यधिदेहमुच्चैः ५८

अङ्गेषु तस्मिन् प्रविजृम्भमाणे
निश्चित्य योगी तदसाध्यरूपतां ।
ततस्समागत्य निजाग्रजस्य
प्रणम्य पादाववदत् कृताञ्जलिः ॥ ५९ ॥

देव **पण्डितेन्द्र** योगिराज धर्म्मवत्सल
त्वत्पद-प्रसादतस्समस्तमर्जितं मया ।
सद्यशः श्रुतं व्रतं तपश्च पुण्यमक्षयं
किं ममात्र वर्त्तित-क्रियस्य कल्प-काङ्क्षिणः ॥ ६० ॥

देहतो विनात्र कष्टमस्ति किं जगत्त्रये
तस्य रोग-पीडितस्य वाच्यता न शब्दतः ।
देय एव योगतो वपु-र्व्विसर्ज्जन-क्रम-
स्साधु-वर्ग्ग-सर्व्व-कृत्य-वेदिनां विदांवर ॥ ६१ ॥

विज्ञाप्य कार्य्यं मुनिरित्थमर्थ्यं
मुहुर्म्मुहुर्व्वारयतो गणीशात् ।
स्वीकृत्य सल्लेखनमात्मनीनं
समाहितो भावयति स्म भाव्यं ॥ ६२ ॥

उद्यद्-विपत्-तिमि-तिमिङ्गिल-नक्र-चक्र-
प्रोत्तुङ्ग-मृत्यमृति-भीम-तरङ्ग-भाजि ।
तीव्राजवञ्जव-पयोनिधि-मध्य-भागे
क्लिश्नात्यहर्न्निशमयं पतितस्स जन्तुः ॥ ६३ ॥

इदं खलु यदङ्गकं गगन-वाससां केवलं
न हेयमसुखास्पदं निखिल-देह-भाजामपि ।

अतोऽस्य मुनयः परं विगमनाय बद्धाशया
यतन्त इह सन्ततं कठिन-काय-तापादिभिः ॥ ६४ ॥

अयं विषयसञ्चयो विषमशेषदोषास्पदं
स्पृशञ्जनिजुषामहो बहुभवेषु सम्मोहकृत ।
अतः खलु विवेकिनस्तमपहाय सर्व्वं सदा
विशन्ति पदमच्चय विविध-कर्म्म-हान्युत्थितं ॥ ६५ ।

(चतुर्थ मुख)

उद्दाम-दुःख-शिखि-सङ्गतिमङ्गयष्टिं
तीव्राजवञ्जव-तपातप-ताप-तप्तां ।
स्रक्-चन्दनादि-विषयामिष-तैल-सिक्तां
को वावलम्ब्य भुवि सञ्चरति प्रबुद्धः ॥ ६६ ॥

स्रष्टुः स्त्रीणामेनसां सृष्टितः किं
गात्रस्याधोभूमिसृष्ट्या च किं स्यात् ।
पुत्रादीनां शत्रु-कार्य्यं किमर्थं
सृष्टेरित्थं व्यर्थता धातुरासीत् ॥ ६७ ॥

इदं हि बाल्यं बहु-दुःख-बीज-
मियं वयश्रीर्ग्घन-राग-दाहा ।
स वृद्धभावोऽसमपाखिशाला
दशेयमङ्गस्य विपत्फला हि ॥ ६८ ॥

लब्धं मया प्राक्तन-जन्म-पुण्यात्
सुजन्म सद्गात्रमपूर्व्वबुद्धि ।

मदाश्रयः श्रीजिन-धर्म्मसेवा
ततो विना मा च परः कृती कः ॥ ६९ ॥
इत्थं विभाव्य सकल भुवन-स्वरूपं
योगी विनश्वरमिति प्रशमं दधानः ।
अर्द्धावमीलितदृगस्खलितान्तरङ्गः
पश्यन् स्वरूपमिति सोऽवस्थितः समाधौ ॥ ७० ॥
हृदय-कमल-मध्ये सैद्धमाधाय रूपं
प्रसरदमृतकल्पैर्म्मूलमन्त्रैः प्रसिञ्चन् ।
मुनि-परिषदुदीर्ण्न-स्तोत्र-घोषैस्सहैव
श्रुतमुनिरयमङ्गं स्वं विहाय प्रशान्तः ॥ ७१ ॥
अगमदमृतकल्पं कल्पमल्पीकृतैना
विगलितपरिमोहस्तत्र भोगाङ्कुकेषु ।
विनमदमर-कान्तानन्द-बाष्पाम्बु-धारा-
पतन-हृत-रजोऽन्तर्द्धाम-सोपानरम्यं ॥ ७२ ॥
यतौ याते तस्मिन् जगदजनि शून्यं जनिभृतां
मनो-मोह-ध्वान्तं गत-प्रलमपूर्यप्रतिहतं ।
व्यदीप्युद्यच्छोको नयन-जल-मुष्णं विरचयन्
वियोगः किं कुर्य्यादिह न महतां दुस्सहतरः ॥ ७३ ॥
पादा यस्य महामुनेरपि न कैर्भूभृच्छिरोभिधृता
वृत्तं सत्र विदांवरस्य हृदयं जग्राह कस्यामलं ।
सोऽयं श्रीमुनि-भानुमान् विधि-वशादस्तं प्रयातो महान्
यूयं तद्विधिमेव हन्त तपसा हन्तुं यतध्वं बुधाः ॥७४॥

यत्र प्रयान्ति परलोकमनिन्द्यवृत्ता-

स्थानस्य तस्य परिपूजनमेव तेषा ।

इज्या भवेदिति कृवाकृतपुण्यराशेः

स्थेयादियं श्रुतमुनेस्सुचिरं निषद्या ॥ ७५ ॥

इषु-शर-शिखि-विधु मित-शक-

परिधावि-शरद्द्वितीयगाषाढ़े

सित-नवमि-विधु-दिनोदयजुषि

सविशाखे प्रतिष्ठितेयमिह ॥ ७६ ॥

विलीन-सकल-क्रियं विगत-रोधमत्यूर्ज्जितं

विलङ्घित-तमस्तुला-विरहितं विमुक्ताशयं ।

अवाङ्-मनस-गोचरं विजित-लोक-शक्त्यग्रिमं

मदीय-हृदयेऽनिशं वसतु धाम दिव्यं महत् ॥ ७७ ॥

प्रबन्ध-ध्वनि-सम्बन्धात्सद्रागोत्पादन चमा ।

मङ्गराज-कवेर्व्वाणि **वाणी-वीणा**यतेतरां ॥ ७८ ॥

[**नोट**—मंगराज कवि-कृत यह श्रुतमुनि की प्रशस्ति ऐतिहासिक उपयोगिता के अतिरिक्त अपने काव्य-सौन्दर्य्य में भी अनुपम है ।]

१०६ (२८१)

त्यागदब्रह्मदेवस्तम्भ पर

(लगभग शक सं० ६५०)

(उत्तर मुख)

ब्रह्म-चत्र-कुलोदयाचल-शिरोभूषामणिर्भानुमान्

ब्रह्म-चत्रकुलाब्धि-वर्द्धन-यशो-रोचिस्सुधा-दीधितिः ।

ब्रह्म-क्षत्र-कुलाकराचल-भव-श्री-हार-वल्लीमणिः
ब्रह्म-क्षत्र-कुलाग्निचण्डपवनश्चावुण्डराजोऽजनि ॥ १ ॥
कल्पान्त-क्षुभिताब्धि-भीषण-बलं **पातालमल्ला**नुजम्
जेतुं **वज्जिवलदेव**मुद्यतभुजस्येन्द्र-क्षितीन्द्राज्ञया ।
पत्युश्श्री**जगदेकवीर** नृपतेर्जैत्र-द्विपस्याग्रतो
धावद्दन्तिनि यत्र भग्नमहितानीकं मृगानीकवत् ॥ २ ॥
अस्मिन् दन्तिनि दन्त-वज्र-दलित-द्विट्-कुम्भि-कुम्भोपले
वीरोत्तंस-पुरोनिषादिनि रिपु-व्यालाङ्कुशे च त्वयि ।
स्यात्कोनाम न गोचरप्रतिनृपो मद्बाण-कृष्णोरग-
ग्रासस्येति **नोलम्बराज**समरे यः श्लाघितः स्वामिना ॥३॥
खात'क्षार-पयोधिरस्तु परिधिश्चास्तु **त्रिकूटः पुरी**
लङ्कास्तु प्रति नायकोऽस्तु च सुरारातिस्तथापि क्षमे ।
त जेतुं **जगदेकवीर**-नृपते त्वत्तेजसेतिक्षणात्-
निर्व्यूढं **रणसिङ्ग**-पार्थिव-रणे येनोर्ज्जितं गर्ज्जितम् ॥४॥
वीरस्यास्य रणेषु भूरिषु वयं कण्ठग्रहोत्कण्ठया
तप्तास्सम्प्रति लब्ध-निर्वृतिरसास्त्वत्खड्ग-धाराम्भसा।
कल्पान्तं **रणरङ्गसिङ्ग**-विजयी जीवेति नाकाङ्गना
गीर्व्वाणी-कृत-राज-गन्ध-करिणे यस्मै वितीर्ण्णाशिषः ॥ ५ ॥
आक्रष्टुं भुज-विक्रमादभिलषन् **गङ्गाधिराज्य-श्रियं**
येनादौ **चलदङ्क-गङ्ग**नृपतिर्व्व्यर्थाभिलाषीकृतः ।
कृत्वा वीर-कपाल-रत्न-चषके वीर-द्विषश्शोणितम्
पातुं कौतुकिनश्च **कोणप-गणाः**पूर्ण्णाभिलाषीकृताः ॥६॥

[नोट—केवल यही एक लेख है जिसमें चामुण्डराय मंत्री का स्वतन्त्र और विस्तृत रूप में वर्णन पाया जाता है। दुर्भाग्यवश यह लेख का एक खण्ड मात्र है। ज्ञात होता है कि अपना एक छोटा सा लेख नं० ११० (२८२) लिखाने के लिये हेग्गडे कण्णने इस महत्त्वपूर्ण लेख की तीन बाजू घिसवा डाली है। यदि यह लेख पूरा मिल जाता तो सम्भव है कि उसमें चामुण्डराय और गोम्मटेश्वर मूर्ति के सम्बन्ध की अनेक बातें विदित हो जातीं जिनके विषय में अब केवल अनेक अनुमान ही लगाये जाते हैं।]

११० (२८२)

उसी स्तम्भ पर

(लगभग शक सं० ११२२)

(दक्षिणमुख)

श्री-गोम्मट-जिन-पाग्रद चागद कम्बक्के यचनं माडिसिदं ।
धीगम्भीरगुणाढ्यं भोग-पुरन्दरनेनिप्प हेग्गडे कण्णं ॥

[गम्भीर बुद्धि और गुणवान् हेग्गडे कण्ण ने गोम्मट जिन के सन्मुख त्यागद स्तम्भ के लिये यक्ष देवता निर्माण कराया।]

१११ (२७४)

अखण्ड बागिलु के पूर्व की ओर चट्टान पर

(शक सं० १२९५)

श्रीमत्परम-गम्भीर-स्याद्वादामोघ-लाञ्छनं ।
जीयात् त्रैलोक्यनाथस्य शासनं जिन-शासनं ॥ १ ॥

श्रीमूल-सङ्घपयःपयोधिवर्द्धनसुधाकराःश्रीवलात्कारगणक-मल-कलिका-कलाप-विकचन-दिवाकराः...वनवा.. तकीर्त्ति-

देवाःतच्छिष्याः राय-भुजसुदाम......आचार्य्य महा-वादि-वादीश्वर राय-वादि-पितामह सकल-विद्वज्जन-चक्रवर्त्ति देवेन्द्र-विशाल-कीर्त्ति-देवाःतच्छिष्याःभट्टारक-श्रीशुभकीर्त्तिदेवास्त च्छिष्याः कलिकाल-सर्व्वज्ञ-भट्टारक-धर्म्मभूषणदेवाः तच्छिष्याः श्री-अमरकीर्त्याचार्य्याः तच्छिष्याः मालिर्वा...ति-नृपाणां प्रथमानल...........रसित...नुत-पा......... ..यमुष्ठासक ......देसक...चार्य्यपट्टविपुलायाचला ... करण-मार्त्तण्ड-मण्डलानां भट्टारक-धर्म्मभूषण-देवानां.. ...तत्वार्थ-वार्द्धि-वर्द्धमान-हिमांशुना...वर्द्धमान-स्वामिना कारितोऽहं आचार्य्याणां...स्वस्तिशक-वर्ष १२८५ परिधावि संवत्सर वैशाख-शुद्ध ३ बुधवारे ॥

११२ (२७३)

उसी चट्टान पर

(लगभग शक सं० १३२२)

श्री शान्तिकीर्त्तिदेवर शिष्यरु हेमचन्द्र-कीर्त्ति-देवर निसिद्धि॥ मङ्गलमहाश्री ॥

११३ (२६८)

उसी चट्टान पर

(सम्भवतः शक सं० १०६६)

श्रीमत्परम-गम्भीर-स्याद्वादामोघ-लाञ्छनं ।
जीयात् त्रैलोक्य-नाथस्य शासनं जिन-शासनं ॥ १ ॥

स्वस्ति समधिगत-पञ्च-महा-शब्द महा-मण्डलाचार्य्यादि-प्रशस्तय-विराजित-चिह्नालङ्कृतरुं विसम्बोधावबोधितरुं सकल-विमल-केवल-ज्ञान-नेत्र-त्रयरुं अनन्त-ज्ञान-दर्शन-वीर्य्य-सुखात्म-करुं विदितात्म-सद्धर्म्मोद्धारकरुं एकत्व-भावना-भावितात्मरुं उभ-नय-समर्त्थिसखरुं त्रिदण्ड-रहितरुं त्रिशल्य-निराकृतरुं चतु-कषा-विनाशकरुं चतुर्व्विधवुपसर्ग्गगिरिकन्दरादि-दैरेय-समन्वितरुं पञ्च-दस-प्रमाद-विनास-कर्त्तुगलु पञ्चाचार-वीर्य्याचार-प्रवीणरुं सड्डुदरुशतद भेदाभेदिगलुं सट्ट-कर्म्म मारुरुं सप्तनयनिरतरुं अष्टाङ्ग-निमित्त कुशलरुं अष्ट-विध-ज्ञानाचार-सम्पन्नरुं नव-विध-ब्रह्मचरिय-विनिर्म्मुक्तरुं दश-धर्म्म-शर्म्म-शान्तरु मेकादशश्रावकाचारवुपदेशव्रताचार-चारित्ररुं द्वादशातप-निरतरु द्वादशाङ्ग-श्रुतप्रविधान सुधाकररुं त्रयोदशाचार-शील-गुण-धैर्यमं सम्पन्नरुं एम्बत-नाल्कु-लक्ष-जीव-भेद-मार्ग्गणरुं सर्व्व-जीव-दया-पररुं श्रीमत्कोण्डकुन्दान्वय-गगन-मार्त्तण्डरुं विदितोतण्ड-कुष्मसाण्डरुं देशिगण-गजेन्द्र-सिन्धूरमदधारावभा-सुररुं श्री-महादेशि-गण-पुस्तक गच्छ कोण्ड-कुन्दान्वय श्रीमत् त्रिभुवनराज-गुरु-श्रीभानुचन्द्र-सिद्धान्त-चक्रवर्त्तिगलुं श्री-सोमचन्द्र-सिद्धान्त चक्रवर्त्तिगलुं चतुर्म्मुखभट्टारकदेवरुं श्रीसिंहनन्दिभट्टाचार्य्यरुं श्री शान्तिभट्टारकाचार्य्यरुं श्री-शान्तिकीर्त्ति...र...भट्टारकदेवरुं... श्रीकनकचन्द्रमल-धारिदेवरुं श्री नेमिचन्द्र मलधारिदेवरुं चतुसङ्घश्रीसकल-गण-साधारण......ड-देवधामरुं कलियुग-गणधर-पञ्चासद

मुनीन्द्ररुं अवर शिष्यरु **गौरश्री**कन्तियरु **सोमश्री**कन्तियरु ...**नश्री**कन्तियरु **देवश्री**कन्तियरुं **कनक-श्री**कन्तियर शिष्य...यिप्पत्तु-एण्ड्रुतण्ड-शिष्यरु वेरसु **हेवणन्दि संवत्सरद फाल्गुणसु** ८ त्रि श्री **गोम्मटदेवर** तीर्त्थनन्द......पञ्च कल्याण ....

[इस लेख में कुन्दकुन्दान्वय, देशी गण, पुस्तकगच्छ के महाप्रभावी आचार्यों—त्रिभुवनराजगुरु भानुचन्द्र सिद्धान्तचक्रवर्त्ति, सोमचन्द्र सिद्धान्तचक्रवर्त्ति, चतुर्मुख भट्टारकदेव, सिंहनन्दि भट्टाचार्य, शान्ति भट्टारकाचार्य, शान्तिकीर्त्ति भट्टारकदेव, कनकचन्द्र मलधारिदेव, और नेमिचन्द्र मलधारिदेव—के उल्लेख के पश्चात् कहा गया है कि इन सब आचार्यों व अनेक गणों और संघों के आचार्य, कलियुग के गणधर पचास मुनीन्द्र, व उनकी शिष्यायें गौरश्री, सोमश्री, देवश्री, कनकश्री व शिष्यों के अट्ठाइस संघों ने उक्त तिथि को एकत्रित होकर पञ्चकल्याणोत्सव मनाया।]

नोट—लेख में संवत्सर का नाम हेवणन्दि दिया हुआ है जिससे सम्भवतः हेमलम्ब का तात्पर्य है। शक सं० १०६६ हेमलम्ब था।]

११४ (२६६)

एक शिला पर जो उस चट्टान के सामने खड़ी है

(सम्भवतः शक सं० १२३८)

स्वस्ति श्रीमूलसङ्घदेशीगण-पुस्तकगच्छ-कोण्डकुन्दान्वय श्री**त्रैविद्य-देवर** शिष्यरु **पद्मणन्दिदेवरु नल-संवत्सरद चैत्र-सु-१ सोमवारदन्दु नाक-श्री**मनस्सरोजिनीराजमरालरादरु मङ्गलमहाश्री ॥

[उक्त तिथि को त्रैविद्यदेव के शिष्य पद्मनन्दिदेव ने, समाधिमरण किया।]

[नोट—लेख में नल संवत्सर का उल्लेख है। शक सं० १२३८ नल था]

११५ (२६७)

अखण्डवागिलु की शिला पर

(लगभग शक सं० १०८१)

स्वस्ति श्रीमन्महाप्रधान भव्य-जन-निधानं सेनेयङ्कार रण-रङ्ग-नीर श्रीमन्मरियाने-दण्डनाथानुजं दानभानुजनेनिसिद भरतमय्य-दण्डनायकनी-भरतबाहुबलिकेवलिगल प्रतिमेग-लुमनी - बसदिगलुमातीर्थ-द्वार-पच-शोभात्थमाडिसिदनी-रङ्गद हप्पलिगेयुमनामहासोपानपङ्क्तियुमं रचिसिदं श्रीगोम्मटदेवर सुत्तलु रङ्गम हप्पलिगेयं चिगियिसिदनन्तुमल्लदेयुमी-गङ्गवाडिना-डालछिगल्लिगंछि नोर्प्पडं ।

कन्द ॥ प्रकट-यशो-विभुवेण्ब-
त्तु कन्ने-बसदिगलनोसेदु जीर्ण्णोद्धार-
प्रकरमनिन्नूरनलौ-
किक-धृति माडिसिदनेसेये भरत-चमूपं ॥ १ ॥
भरत-चमूपतिसुते सु-
